विष्णुपक्षे भगवन्तहेतुभूतैः ननु लब्धे हे कुतस्तेषां प्रवेशः सत्यं तथापि प्रतिच्छन्नैर्वेषान्तरेणाच्छन्नैः ॥७॥ दैत्येन्द्रगेहमानीतं ॥८॥ बालान्सर्वान्
अति अतिक्रम्य तुभ्यं तव ॥१०॥ अहो मायामोहिनां भवतां मामाक्षिपंतीत्याशयेनाह ॥ नावदाह ॥ परः स्वश्चेति मिथ्याभिनिवेशो यया मायया
येव कृतः ननु घासत्वः अतएव तया विमोहिता बुद्धीनां भवतामेव दृष्टः ननु मम तस्मै अचिंत्यमायैश्वर्याय नमः ॥११॥ अहो किमेतत्मलय

सम्पग्विचार्यैतं बालो गुरुगेहे द्विजातिभिः ॥ विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥७॥ गृहमानी
तमाहूय प्रह्लादं दैत्ययाजकाः ॥ प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ॥८॥ वत्स प्रह्लाद भद्रं ते सत्यं
कथय मा मृषा ॥ बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥९॥ बुद्धिभेदः परकृत उताहो ते स्वतोभव
त् ॥ भण्यतां श्रोतुकामानां गुरूणां कुलनंदन ॥१०॥ प्रल्हाद उवाच ॥ परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मा
यया कृतः ॥ विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ॥ अन्य

सितव बुद्धिभेदो यतो ज्ञानस्तत्कथयेत्याक्षिप्तः ततस्तत्प्रसादादेवेत्युत्तरमाह सइतिद्वि
एष तथान्योहमिति भेदगतासती ॥१२॥
भिः स भगवान् यदा अनुव्रतः अनुकूलो भवति तदा पशूनामिव बुद्धिर्भेदगता असती मिथ्याविषयाभिपद्यते अभिन्नात्मनिष्ठा भवति ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥२२॥

भेदस्मा सत्वं साधयति स एषा परमात्मैव स्वः पर इति च ॥ अविवेकिभिर्निरूप्यते युक्तं चैतन्न पुनः यस्य वर्त्मनि जिज्ञासायां ब्रह्मादयोपि मुह्यंति
तत्र हेतुः दुरत्ययं दुर्घटमनुक्रमणं अनुचरितमनुवर्त्तनं वा यस्य सः ॥२३॥ ननु निर्विकारस्य कथं मतिभेदकत्वं तत्राह यथा अयो लोहं
आकर्षस्यायस्कांतस्य समीपे स्वयमेव भ्रमति ॥ चेतश्चक्रपाणेः संनिधिरेव कुतो ज्ञातस्तत्राह यदृच्छयेति ॥ कस्य तपोदानादेः फलमेतदिति

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ॥ मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मा
दयो ह्येष भिनत्ति मे मतिं ॥२३॥ यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसंनिधौ ॥ तथा मे भिद्यते
चेतश्चक्रपाणेर्यदृच्छया ॥२४॥ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ॥ तं निर्भर्त्स्याथ
कुपितः सदीनो राजसेवकः ॥२५॥ आनीयतामरे वेत्रमस्माकमयशस्करः ॥ कुलांगारस्य दुर्बुद्धे
श्चतुर्थोस्योदितो दमः ॥२६॥

न ज्ञायत इत्यर्थः ॥२४॥ राजसेवक उवाचेति शेषः ॥२५॥ वेत्रं कशा उपायानां मध्ये चतुर्थः द
मो दंडः ॥ अस्य दुर्बुद्धेः उदितः उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः ॥ कुलस्यांगारवन्नाशहेतोः ॥२६॥ गंकुं श्रीकृष्णायनमः छ ॥

राम॰
॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्कुतः स्तत्राह॥ दैतेया एव चंदनद्रुमाः तेषां वने अयं कंटकद्रुमस्तुल्यो जातः तदेवाह यस्य दैत्यस्य वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोः स्य
मर्भक एव नालायितः नालमिवाचरत् यथा परशोश्छेदके त्व बबुरादिनिर्मितो दंडः सहकारी तं विना छेदनासंभवात् तथायं विष्णोर्दैत्यमूल

दैतेयचंदनवने जातोयं कंटकद्रुमः॥ यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः॥१७॥ इति
तं विविधोपायैर्भीषयंस्तर्जनादिभिः॥ प्रल्हादं ग्राहयामास त्रिवर्गस्योपपादनं॥१८॥ तत एनं
गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं॥ दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतं॥१९॥ पादयोः पतितं
बालं प्रतिनंद्याशिषासुरः॥ परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं॥२०॥ ॥ ॥छ॥

च्छेदे हेतुर्जात इत्यर्थः॥१७॥ इति तं प्रह्लादं भीषयन् धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास॥१८॥ ज्ञातं ज्ञेयमुपायचतुष्ट
यं येन तं ज्ञात्वा दैत्येंद्रं प्रति मात्रा मृष्टं शुद्धस्नापितं॥१९॥ २०॥ ॥ ॥श्रीरामायनमः॥ ॥ ॥छ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादसेवनं परिचर्या अर्चनं पूजा दास्यं कर्मार्पणं सख्यं तन्हि विश्वासादि॥ आत्मनिवेदनं देहसमर्पणं॥ यथा विक्रीतस्य गवाश्वादेर्भरणपालनादि
चिंता न क्रियते तथा देहं तस्मै समर्प्य तत् चिंता न क्रियते तथा देहं तस्मै समर्प्य तच्चिंतावर्जनमित्यर्थः॥ २४॥ इति नवलक्षणानि यस्याः साऽ

आरोप्यांकमवघ्राय मूर्द्धन्यश्रुकलांबुभिः आसिंचन्विकसद्वक्त्रमिदमाह युधिष्ठिर॥ २१॥ हिर
ण्यकशिपुरुवाच॥ प्रल्हादानूच्यतां तात स्वधीतं किंचिदुत्तमं॥ कालेनैतावतायुष्मन्यदशिक्ष
द्गुरोर्भवान्॥ २२॥ प्रह्लाद उवाच॥ श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं॥ अर्चनं वंदनं दास्यं स
ख्यमात्मनिवेदनं॥ २३॥ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा॥ क्रियते भगवत्यद्धा तन्मन्ये
धीतमुत्तमं॥ २४॥ निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा॥ गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताध
रः॥ २५॥ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता॥ असारं ग्राहितो बालो मामनादृत्य दुर्मते॥ २६॥

द्धा अधीतेन चेद्भगवति विष्णौ भक्तिः क्रियेत सा च अर्पितैव सती यदि क्रियेत न तु कृता सती पश्चादर्प्यते तदुत्तमम् अधीतं मन्ये न तु स्मात् गुरोरधी
तेशिक्षितं वा तथाविधं किंचिदस्तीति भावः॥ २४॥ २६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्रत्वेनवर्त्तमानस्यापितवविरोधाचरणंनासंभावितमित्याहसंतिहीतिदुष्टंमैत्रंमित्रत्वंयेषांतेरोगइति॥ब्रह्महाक्षयरोगीस्यात्सुरापःश्यावदं
तकःस्वर्णहारीतुकुनखीदुश्चर्मागुरुतल्पगइत्यादिस्मृतुके॥पातकिनांरोगायथोदेतितथातेषाममविद्वेषावकमुदेतीसर्थः॥२७

संतिह्यसाधवोलोकेदुर्मैत्राःछद्मवैरिणः॥तेषामुदेत्यघंकालेरोगःपातकिनामिव॥२७॥गु
रुपुत्रउवाच॥नमत्परगीतंनपरप्रणीतंसुनोवदस्येषतवेंद्रशत्रो॥नैसर्गिकीयंमतिरस्यराजन्वि
यच्छमस्युंकदहाससमानः॥२८॥नारदउवाच॥गुरुरेवंभणितेप्रोक्तोभूयआहासुरःसुतं॥नवेदु
रमुखीयंतेकुतोऽभद्रासतीमतिः॥२९॥ ॥छ॥ ॥छ॥ ॥ ॥छ॥ ॥

मत्परणीतमयापाठितं॥मोस्मभ्यंकुनकुतस्तिनंदोषंमासमअदाःअञागमअर्थःमयिदोषारोपंमाकृथाइत्यर्थःइंद्रशत्रोइतिनहिप्राद
रोषुजवकोपठितइतिभावः॥२८॥ ॥ छ ॥ श्रीगुरुभ्योनमः ॥ श्रीगोविंदायनमः ॥

भा· स·
॥२४॥

आस्तामियंवार्त्ताभवादृशानांविशयाशक्तानामत्रानधिकारएवेत्याशयेनाह॥मतिरिति॥परतःगुरोःस्वतोवामिथोवाअन्योन्यतःनाभिपद्येतनसं
पद्येतकेषांगृहव्रतानांसंकल्पइजिहृत्यांव्रतंयेषांअतएवअदान्तैरनुपरतैर्गोभिरिन्द्रियैर्हेतुभूतैः॥तमिस्रंसंसारंविशतांतत्रचर्वितचर्व
णंयेषां॥३०॥ननुश्रीकृष्णस्यपरमानंदरूपत्वात्तेषांमतिर्निष्ठाएववाकिंनस्युः॥तदज्ञानादित्याह॥नेतियेदुराशयाःविषयावासितान्तःकर
णाःतेहिविष्णुंनविदुः॥तत्रहेतुःस्वस्मिन्नेवार्थःपुरुषार्थोयेषांतेषांगतिंगम्यंनचतेषांगुरूपदेशाद्विष्णुज्ञानंस्यादितित्राहवहिर्विषयेष्वर्थो

प्रल्हादउवाच॥मतिर्नकृष्णेपरतःस्वतोवामिथोभिपद्येतगृहव्रतानां॥अदान्तगोभिर्विशतांतमि
स्रंपुनःपुनश्चर्वितचर्वणानां॥३०॥नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेवहिरर्थमानिनः
अंधायथांधैरुपनीयमानावाचीशतंत्यामुरुदाम्निबद्धाः॥३१॥ ॥ छ ॥ ॥

येषांतेवहिरर्थास्तानेवगुरुत्वेनमन्यन्तेअनुशीलयेषांतेअज्ञाःअंधैरुपनीयमानाअंधायथायथायथानविदुःकिन्तुगर्त्तेपतन्तितथातेपिईशस्यतंत्यांदी
र्घरज्ज्वांवेदलक्षणायामुरूणिदामानिब्राह्मणादिनामानियस्यांतस्यांकाम्यैःकर्मभिर्बद्धाएवमेवंनीत्यर्थः॥तदुक्तं॥विषयाविष्टचित्तानां
विष्ण्वावेशःसुदूरतः॥वारुणीदिग्गतंवस्तुव्रजन्नैंद्रींकिमाप्नुयादिति॥३१॥ ॥ श्रीगोविंदायनमः ॥ छ

राम
॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुचएकोदेवः सर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्मेतिश्रुतेः प्रतिपादितंविष्णुंकथंनविदुः कुतोवातेषांनमतिप्रवेशस्तत्राह नैषा
मिति निष्कंचनानांनिरस्तविषयाभिमानिनांमहत्तमानांपादरजसांअभिषेकंयावन्नवृणीत॥तावत्तुभिराकांतोजानांपिएषांमतिरुरुक्र
मस्यांघ्रिंनस्पृशतिनप्राप्नोतिअसंभावनादिभिर्विहन्यतइत्यर्थः अनर्थस्यसंसारस्यापगमोयदर्थः यस्यांघ्रिस्पर्शिन्याः मतेरर्थः प्रयोजनंमह

नैषांमतिस्तावदुरुक्रमांघ्रिंस्पृशत्यनर्थापगमोयदर्थः॥महीयसांपादरजोभिषेकंनिःकिंचनानां
नवृणीतयावत्॥३२॥इत्युक्त्वोपरतंपुत्रंहिरण्यकशिपूरुषा॥अंधीकृतात्मास्वोत्संगान्निरस्यतम
हीतले॥३३॥आहामर्षरुषाविष्टःकषायीभूतलोचनः॥वध्यतामाश्वयंवध्योनिःसारयतनैर्ऋ
ताः॥३४॥अयमेभ्रातृहासोयंहित्वास्वान्सुहृदोधमः॥पितृव्यहंतुर्यःपादौविष्णोर्दासवदर्चति
॥३५॥

नुग्रहाभावान्नतत्त्वनिश्चयोनापीहमोक्षस्तेषामित्यर्थः॥३२॥ निरस्यनिरास्यतचिक्षेप॥३३॥ अमर्षोसहनंतेनसहि
तयारुषाआविष्टोव्याह॥ कषायीभूतेआताम्रेलोचनेयस्यहेनैर्ऋताःराक्षसाः॥३४॥ वध्यत्वेहेतुः यतोयंमेभ्रातृहाकुतोयोविष्णोः
पादावर्चतिनत्वस्वपक्षपातीत्यर्थः॥३५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥२५॥

अहो विस्रुरप्य विश्वसनीयं किमिति स्वीकृतवानित्याह विस्रोर्वेति अहातजहौ ॥३६॥ ननु नवायमपत्यं चकथं वध्यस्तत्राह परोप्योषधमि
वहितकृत्त चेत्तत्तदपत्यमेववेद्यं ॥ सुतः स्वदेहजोपि अहितश्चेत्तत् आमयइव आहातां ममतास्य दस्यकयाओंगमपि करवराणादि तदप्या

विस्रोर्वासाध्वसो किंतु करिष्य स्वसमंजसः ॥ सोहंदं दुस्त्यजं पित्रोः रहाद्यः पंचहायनः ॥३६॥ परोप्य
पत्यं हितकृद्यथौषधं स्वदेहजोप्यामयवत्सुतोहितः ॥ छिंद्यात्तंदंगवद्दुतात्मानोऽहितं शेषसुखं
जीवति यद्विवर्जनात् ॥३७॥ सर्वैरुपायैर्हंतव्यः संभोजरायनासनैः ॥ सुहृल्लिंगधरः शत्रुमुने
र्दुष्टमिवेंद्रियं ॥३८॥ नैर्ऋतास्ते समादिष्टाः औमत्रौवैश्रूलपाणयः ॥ तिग्मदंष्ट्रकरालास्याः स्ता
म्रश्मश्रुशिरोरुहाः ॥३९॥ नंदतो भेरवंनानावांच्छिधिभिंधीतिवादिनः ॥ आसीनंचाहनच्छूलैः प्रल्हा
दं समवेममेसत् ॥४०॥

त्मनोऽहितं चेत् ॥ छिंद्यादेवेत्यर्थः ॥३७॥ अतः सर्वैरुपायैः हंतव्यः संभोज्जो भोजनं भोजनादिषु विषादि
मयोगैरिष्टैत्यर्थः ॥ यथा दुष्टमिंद्रियं मुनेः शत्रुः ॥३८॥ तिग्मातीक्ष्णदंष्ट्रायेषां करालानि आस्यानि येषां ते च तेचताम्राणि श्मश्रूणि शिरोरु रुहाः ॥३९॥

राम
॥२५॥

परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन् तेषां प्रहारा निष्फला जाताः तत्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये भगवति निरतिशयैश्व
र्ये अखिलात्मनि शस्त्रादीनामपि नियंतरि ॥ एवंभूते परे अपुण्यस्य सत्क्रिया महोद्यमा इव ॥४२॥४३॥ अभिचारः कृत्यादयः अवपातनानि नि

परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ॥ युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥४१॥
प्रयासेऽपहते तस्मिन् दैत्येंद्रः परिशंकितः ॥ चकार तद्वधोपायान्निर्बंधेन युधिष्ठिर ॥४२॥ दिग्गजैर्दं
दशूकेंद्रैरभिचारावपातनैः ॥ मायाभिः संनिरोधैश्च गरदानैरभोजनैः ॥४३॥ हिमवाय्वग्निसलि
लैः पर्वताक्रमणैरपि ॥ न शशाक यदा हंतुमपापमसुरः सुतं ॥ चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्य
पद्यत ॥४४॥ ॥ श्रीगोविंदाय नमः ॥ ॥ ७ ७

रिंखगाद्यः पातनानि तैः अवटादिषु संनिरोधैश्च ॥४३॥ पर्वताक्रमणैः पर्वतानां तदुपरि प्रक्षेपैः बहुवचनेनाभिचाराद्यावृत्तिं दर्शयति
तत्तद्धननं कर्तुं नाभ्यपद्यत न प्राप न अशक्नोदित्यर्थः ॥४४॥ ॥ ७ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥२६॥

चिंतामेवाह ॥ एष इति त्रिभिः ॥ मे मया असाधुपुरुषं यथा भवति तथोक्तः असद्धर्मैरपकारैः अभिचारैर्वा ॥ ४४ ॥ अविहरेर्वर्त्तमानो ऽपि वालोप्ययं अ
जडधीः निर्भयचित्तः मे अन्यायं अनार्य्यं शत्रुत्वात् न विस्मरति अजीगर्त्तस्य मध्यमपुत्रः शुनःशेफो नाम पितृभ्यां हरिश्चंद्राय विक्रीतः स न यथा त
योरपकारमविस्मरंस्तद्धि पक्षं विश्वामित्रमाश्रित्य गोत्रांतरमापन्नस्तद्वा तत्पद्वास्वभावापरित्यागे दृष्टांतः शुनःशेफः पुच्छमिवेति ॥ ४५ ॥ ४६ ॥

एष मे बहु साधु कृतो वधोपायाश्च निर्मिताः ॥ नैलैर्द्रोहैरसद्धर्मैः मुक्तः स्वेनैव तेजसा ॥ ४५ ॥ वर्त्तमानोपि
हरेर्वैवालोप्यजडधीरयं ॥ न विस्मरति मेनार्य्यं शुनःशेफ इवममुः ॥ ४६ ॥ अप्रमेयानुभावोयमकुत
श्चिद्भयो मरः ॥ नूनमेतद्विरोधेन मत्युर्मे भविता न वा ॥ ४७ ॥ इति तं चिंतयाकिंचिन्मानश्रियमधो
मुखं ॥ शंडामर्क्कौ वौशनसौ विविक्त इति होचतुः ॥ ४८ ॥ जितं त्वयैकेनयदं त्रयं भुवोर्विजंभणात्रस्तस
मस्तधिष्ण्यपं ॥ न तस्य चिंत्यं तवनाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदं ॥ ४९ ॥ ॥ ॥ ४९ ॥

अप्रमेयः अपरिमेयोनुभावो यस्य ॥ न कुतश्चिद्भयं यस्य स न वा भविता अन्यथा मत्युर्नैव भविष्यतीत्यर्थः ॥ ४७ ॥ औशनसौ उशनसः पुत्रौ नीतिज्ञौ वि
विक्ते एकांते ॥ ४८ ॥ भुवोर्विजंभणेनैव त्रस्ता धिष्ण्यपा यस्मिन् न तस्य चिंत्यं चक्ष्महे न पश्यामः पदमालंबनं नैवास्ति यद्वा शिशूनां गुणदोषयोः प
दं विषयो न भवतीत्यर्थः ॥ ४९ ॥ छ

राम
॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापितुर्बंधनमस्योचितमित्याहतुः ॥ इमंत्विति ॥ यावद्गुरुरागमिष्यतितावद्बद्ध्वानिधेहि ॥ ननुः किं अत उचतुः ॥ बुद्धिश्चमहतीचीनावयसाभवतीति
५०॥ अनुज्ञायतथेत्यंगीकृत्य ॥५१॥ ततश्चतौप्रल्हादायधर्मादिकमूचतुः ॥ प्रश्रितस्त्वासावनतश्चतस्मैयथायथावत्त्रिवर्गमनुशिक्षित

इमंतुपाशैर्वरुणस्यबद्ध्वानिधेहिभीतोनपलायतेयथा ॥ बुद्धिश्चपुंसोवयसार्यसेवयायावद्गुरु
र्भार्गवआगमिष्यति ॥५०॥ तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ॥ धर्मोह्यस्योपदेष्टव्योराज्ञांयो
गृहमेधिनां ॥५१॥ धर्ममर्थंचकामंचनितरांचानुपूर्वशः ॥५२॥ प्रल्हादायोचतूराजन्प्रश्रयाव
नतायचयथात्रिवर्गंगुरुभिरात्मनेउपशिक्षितं ॥ नसाधुमेनेतच्छिक्षांद्वंद्वारामोपवर्णितां ॥५२॥ यदा
चार्यः परावृत्तोगृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्रसोपहूतः कृतक्षणैः ॥५३॥ अथतान्श्ल
क्ष्णयावाचाप्रत्याहूयमहाबुधः ॥ उवाचविद्वांस्तन्निष्ठांकृपयाप्रहसन्निव ॥५४॥ तेतुतद्गौरवात्स
र्वेत्यक्तक्रीडापरिच्छदाः ॥ बालानदूषितधियोद्वंद्वारामेरितेहितैः ॥५५॥

मपिसाधुनमेनेतांशिक्षांचकुतः द्वंद्वैरागद्वेषादिभिर्विष
येष्वारमणंयेषांतेरुपवर्णितां ॥५२॥ परावृत्तः अन्यत्रगतः उपहूतः संधिः पादप्रहरणार्थः क्रीडार्थंकृतक्षणैः कृतोत्सवैर्बलध्याचप्रस्तैरितिवा ॥५३॥ तेषांनि

ष्ठांजन्ममरणादिलक्षणांविद्वान् ॥५४॥ द्वंद्वारामाणामीरितैरी
हितैश्चनदूषिताधीर्येषांयतोबालाः ॥५५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰ ॥२७॥

तस्मिन्नेव न्यस्तं हृदयमीक्षणं च यस्य ॥ ५६ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे पंचमोऽध्यायः ॥५॥ षष्ठे गुरोर्गृहेऽभ्यस्य प्रह्लादो दैत्यबालकान्
॥ अनुकंप्यपरं तत्त्वं नारदोक्तमुपादिशत् ॥१॥ निरर्थकक्रियालापैरायुर्व्ययमजानतां ॥ प्रल्हादः सदयं प्राह धर्मं भागवतं कृतां ॥२॥
कौमार इत्यादिना इहैव मानुषजन्मनि धर्मानाचरेत् ॥ यतोऽर्थदमेतत् ॥ तत्र कौमार एव यतः ॥ तदप्यां ॥१॥ इह भागवतानेव धर्मानाचरे

पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः ॥ नानाहं कुरुणो मैत्रो महाभागवतोऽसुरः ॥ ५६ ॥ इति श्रीभागवते
महापुराणे सप्तमस्कंधे पंचमोऽध्यायः ॥५॥ प्रह्लाद उवाच ॥ कौमार आचरेत्प्राज्ञो धर्मान्भागवता
निह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ॥१॥ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं ॥ य
देष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥२॥ सुखमैंद्रियकं दैत्या देहयोगेन देहिनां ॥ सर्वत्र ल
भ्यते दैवाद्यथा दुःखमयत्नतः ॥३॥

दित्युपपादयति ॥ यथा हीति चतुर्भिः ॥ इह पुरुषस्य विष्णोः पादोपसर्पणमेव य
था अनुरूपं योग्यमिति सर्वथा ॥ यद्यस्मात् एष प्रिय इत्यादि ॥२॥ भोगोद्यमः कथं त्याज्य इति चेत्तत्राह ॥ सुखमिति ॥ सर्वत्र पश्वादावपि
देवात् सर्वोहृष्यादेव ॥३॥ ॥

राम ॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नत्र दृष्टं प्रयासेनकर्त्तव्यः प्रयत्नः प्रयासात्परं लोके न वलं आयुषोव्ययएव॥ यतस्तथानेन प्रकारेणक्षेमं न प्राप्नोति॥४॥ भयमाश्रि
तः संसारं प्राप्तः पुरुषरूपं शरीरं यावत्पुष्कलमलिनविपद्येत अक्षमं नभवेत्तन्नन्दपरिशिनिचानावच्छीघ्रं यत्नेन॥ उक्तंच॥ यावत्स्व
स्थमिदं शरीरमरुजं यावज्जरा दूरतो यावच्चेंद्रिय शक्तिरप्रतिहता यावत्क्षयो नायुषः आत्मश्रेयसितावदेव विदुषा कार्यः प्रय
त्नो महान् संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥५॥ आयुर्व्ययक्रममाह॥ पुंसइति त्रिभिः यद्यस्मात् शेते॥६॥ विंशतिवर्षो

नत्प्रयासेन कर्त्तव्यो यत्न आयुर्व्ययः परं॥ न तथापि क्रियते क्षेमं मुकुंदचरणांबुजं॥४॥ नतो यत्नेन कुश
लः क्षेमाय भयमाश्रितः॥ शरीरं पौरुषं यावत्तन्न विपद्येत पुष्कलं॥५॥ पुंसा वर्षशतं ह्यायुस्तदर्द्धं चा
जितात्मनः॥ निःष्फलं यदसौ रात्र्यां शेते अंधं प्रापितस्तमः॥६॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंश
तिः॥ जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः॥७॥ दुरापूरेण कामेन मोहेन च बलीयसा॥ शेषं गृहे
षु सक्तस्य प्रमत्तस्याऽपयाति हि॥८॥ को गृहेषु पुमान् सक्तमात्मानमजितेंद्रियः॥ स्नेहपाशैर्दृढैर्बद्ध
मुत्सहेत विमोचितुं॥९॥

शतिः आयुर्याति॥७॥ दुरापूरेण दुःखैः समंतादापूर्यमाणेन॥८॥ मनुष्यो वने गृहासक्तोऽपि प्र
श्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्याह॥ न दशमभवे दर्शयन् कौमार एवाचरेद्विसेनदुपपायात्ति॥ को गृहेष्विति सप्तभिः॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अं अर्थं असुभिः ॥ क्रीणाति प्राणहानिमंगीकृत्यापि तस्करादिरर्थं साधयति ॥ तस्मिन्नर्थे तृष्णां को नु विसृजेत् ॥१०॥ किंच कथमिति त्रि-
प्रियायाः संगादिकं स्मरन् कथं त्यजेदिति त्रिभिरन्वयः ॥ मंत्रान् हितशिक्षालापान् सुहृत्सु च संगं तेषां स्नेहेन सितो बद्धः कलानि
मधुराण्यक्षराणि येषां तेषां च संगं तेष्वनुरक्तं चित्तं यस्य ॥११॥ ताः श्वशुरगृहे स्थिताः हृदय्याः हृदयंगमाः मनोज्ञाः ॥ उरवः परिच्छदा

कोन्वर्थतृष्णां विसृजेत्प्राणेभ्योपि य ईप्सितः ॥ यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥१०॥
कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् ॥ सुहृत्सु तत्स्नेहसितः शिशूनां कला-
क्षराणामनुरक्तचित्तः ॥११॥ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ ॥ गृहान्म-
नोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥१२॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लो-
भादवितृप्तकामः ॥ औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरंतमोहः ॥१३॥ ॥ छ

येषु तान् वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः ॥१२॥ कोशस्कृत् कोशकारी कीटः स यथा गृहं कुर्वन्नात्मनो निर्गमापद्वारम-
पिधाय रोधयति तथा कर्माणीहमानः न त्ववितृप्तोपि दोषदर्शनेन विरक्तः सन् त्यजेत् ॥ तत्राह ॥ औपस्थ्यं च शैश्न्यं जैह्व्यं च सुखं तदे-
वाधिकं मन्यमानाः अतो दुरंतो मोहो यस्य सः कथं विरज्येत विरक्तः स्यात् ॥१३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुरंतमोहत्वं दर्शयन्नाह ॥ कुटुंबपोषणाय वियत्क्षीयमाणां निजमायुः पुरुषार्थं च विहितं न बुध्यते अत एव तापत्रयेण दुःखितोऽपि न
निर्विद्यते दुःखबुद्धिं न करोति ॥ यतः । स्वकुटुंबे रामे रतिर्यस्य ॥१४॥ यस्तु न चौर्यं करोतीत्याह ॥ वित्तेषु नित्यमभिनिविष्टं चेतो यस्य
सः परवित्तहर्ता ॥ प्रेत्य नरकलक्षणां इह च दंडादिरूपं दोषं यद्यपि विद्वान् अप्राप्यशांताभिलाषः सन् परवित्तं हरत्येव ॥१५॥ न

कुटुंबपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः । सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्व
कुटुंबरामः ॥१४॥ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्ता ॥ प्रेत्येह चाथाप्यजि
तेंद्रियस्त्वशांतकामो हरते कुटुंबी ॥१५॥ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्प
ते वै ॥ यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत य

देवं कोऽपि गृहेषु पुमानित्यादिसप्तभिः श्लोकैरुपपादितं गृहा
दिषु प्रसक्तस्य वैराग्याद्यसंभवमुपसंहरति विद्वानपीति स्वकोकेषु आत्मपरामर्शाय न कल्पते ॥ किंतु विमूढो यथा तथा विद्वान
पि तमः अभिनिवेशमेव प्रपद्यते तत्र हेतुः यद्इति स्वीयमिदं पारक्यमिदमिति भिन्नो भावो भावना यस्य सः ॥१६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्कौमार एव भागवतान्धर्मान् आचरेदिति सहेतुकमुपसंहरति ॥ यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थः ततः नारायणमु-
पेत शरणं यातेत्युत्तरेणान्वयः ॥ असामर्थ्ये हेतवः ॥ अलंदीनो लंपटः ॥ अतः कामो दृशि यासां तासां विहारे क्रीडानिमित्ते क्रीडयंनिमि-
त्तेक्रिय मृगः ॥ विहारमिति पृथक्पाठे तासां विहारसाधनमात्मानं यतस्तासां क्रीडामृगः स इत्यन्वयः ॥ किंच यत्यासुनिगडः शृंख-

यतो न कश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः ॥ विमोचितुं कामदृशां विहारक्रीडामृगो य-
न्निगडो विसर्गः ॥१७॥ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु ॥ उपेत नारायणमादि-
देवं स मुक्तसंगैरिषितोऽपवर्गः ॥१८॥ न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ॥ आत्मत्वात्स-
र्वभूतानां सिद्धत्वादिह सर्वतः ॥१९॥ ॥ ॥ छ ॥

लातुल्यो विसर्गः पुत्रादिरूपो भवति ॥१७॥ विदूरात् दूरतः संगं परिहृत्य ॥ यद्वा नारायणमुपेतेत्यन्वयः ॥ यस्मात्स एवापवर्गः इ-
षितः इष्टः ॥१८॥ बालानामस्माकं न तद्भजनमशक्यमिति चेत्तत्राह ॥ न हीति ॥ बह्वायासः अतिप्रयासः ॥१९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मत्वात्सर्वत्र शमि इत्यादि निवहेतु हृदयमुपसंपाश्यति ॥ परावरेष्विति चतुर्भिः ॥ ब्रह्मा अंतो येषां स्थावर आदिर्येषां तेषु जीवेषु भौतिकेषु
घटादिषु जीवेषु घटादिषु महत्सु च भूतेषु आकाशादिषु ॥२०॥ गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्त्वादौ च परः ब्रह्मस्वरूपः ॥२१॥
कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः मायये त्याह ॥ प्रत्यगात्मा नंतं द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं दे

परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु ॥ भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥२०॥ गुणेषु गुणसा
म्ये च गुणव्यतिकरे तथा ॥ एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥२१॥ प्रत्यगात्मस्वरूपेण दृ
श्यरूपेण च स्वयं ॥ व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥२२॥ केवलानुभवानंद
स्वरूपः परमेश्वरः ॥ माययांतर्हितैश्वर्य्य ईयते गुणसर्गया ॥२३॥ तस्मात्सर्वेषु भूतेषु दयां कुरुत
सौहृदं ॥ आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥२४॥

हादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयते इत्युत्तरेणान्वयः ॥ वस्तु
तस्तु स्वयं अविकल्पितो निर्देश्योऽपि सन् ॥ यद्वा अनिर्देश्योऽपि एवं निर्देश्यः सन् विकल्पित ईयत इत्यन्वयः ॥२२॥ यतः केवलो अनुभवात्म
क आनंद एव स्वरूपं यस्य ॥ ननु स एव चेत्सर्वत्र तर्हि सर्वं तत्त्वाद्युपलभ्येत तत्राह ॥ गुणात्मकः सर्गो यस्याः स गुणसर्गा तया मायया अंतर्हित
मैश्वर्यं येन सः ॥२३॥ यस्मादेवं तस्मात्सर्वेषु यथोचितं दयां सौहृदं च कुरुत ॥ यया दयया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किमत आह॥ तुष्टे च तत्र किमलभ्यं॥ तथापि गुणपरिणामाद्दैवादेव स्वसिद्धाः अयत्नतः सिद्धा ये धर्मादयः तैः किं अगुणेन च मोक्षे
ण कांक्षितेन च किं तमुपगायतां नोऽस्माकं अकांक्षितस्यापि तस्य सिद्धेः॥ यद्वा माभून्मोक्षः तस्य चरणयोः सारं जुषां सुधां सेवमानानां
तेनापि किमित्यर्थः॥२५॥ ननु च धर्मादेः पुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वेन सत्य एवाभिहितः॥ तत्राह॥ धर्मोऽर्थः काम
श्चेति यस्त्रिवर्गः तदर्थं च ये उपायाः अभिहिताः॥ ईक्षा आत्मविद्या नयदमौ तर्कदंडनीती च विविधा च वार्त्ता जीविका तदेत

तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः॥ धर्मादयः किमगुणेन च कां
क्षितेन सारं जुषां चरणयोरुपगायतां नः॥२५॥ धर्मार्थकाम इति योऽभिहितस्त्रिवर्गः ईक्षात्रयी नय
दमौ विविधा च वार्त्ता॥ मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः॥२६॥

त्स्वार्थं जातं स्वांतर्यामिणः परस्य पुंसः स्वात्मार्पणं साधनं चेत् तदा हि सत्यं मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेव यद्वैतत्स्वार्थजातं
यद्वा नदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये॥ सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेव स्वार्थः
तदुक्तं भगवता॥ अर्जुनं प्रति भगवद्गीतायां॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन॥ निर्द्वंद्वो नित्यसत्वस्थ इत्यादि॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां विश्वासार्थं गुरुसंप्रदायमाह ॥ ज्ञानमिति यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इत्याशंक्याह ॥ भगवत एकांतभक्तानां यस्य पादरजः तेन आप्लुतानां देहिनां स्यात् ॥ तत्तन्नमानामेवेति नियमः ॥ २७ ॥ अत एव मयापि नारदात् श्रुतं विज्ञानसंयुतं अनुभवपर्यंतं धर्मं च श्रुतं ॥ २८ ॥ तत्र विस्मिताः पृच्छंति प्रल्हादेति ॥ एताभ्यां मत्तेऽन्यं न गुरुं न विद्मः ॥ एताभ्यां गमनात् पूर्वमेवाह नारदप्रा

ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ॥ एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् ॥ २७ ॥ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं ॥ धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥ दैत्यपुत्रा ऊचुः ॥ प्रल्हाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः छिंधि नः संशयं सौम्य स्याच्चेद्विस्रंभकारणं ॥ ३० ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रल्हादानुचरिते षष्ठोऽध्यायः ॥ ६ ॥

र्वं गत इति चेत् तत्राहुः ॥ बालानामपि अतिशिशूनामस्माकमेतावीश्वरौ नियंतारौ अतस्तवा न्यत्र गमनं न संभवति ॥ २९ ॥ स एवात्रागत इत्यपि न संभवतीत्याहुः ॥ बालस्येति दुरन्वयः दुर्घटः विस्रंभकारणं विश्वासहेतुः ॥ ३० ॥
इति श्रीभागवते सप्तमे षष्ठः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰
॥३९॥

सप्तमे मातृगर्भस्थेनस्मिन्नारदभाषितं ॥ प्रल्हादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥१॥ अस्त्राविनारशादेतन्मया गर्भे इतीरितं । ततः प्रस्ताव
कथया पाद्यैः षोडशभिः सुधीः ॥२॥ अस्माकं हिरण्यकशिपो ॥२॥ स्वच्छेनैनैव पापेन पापो सौ अभक्षि भक्षितः इति हर्षेण वदंतो युद्धोद्य
मं चक्रुः ॥२॥३॥ राज्ञः शिबिरं आवासं व्यलुपन् ॥ सर्वस्वापहारेणानाशितवन्तः ॥६॥ ७॥ अनागसं निरपराधां एनां नेतुं मार्हसि अतिप्रा

नारद उवाच ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ॥ उवाच स्मयमानस्तान्स्मरन्मदनुभाषितं ॥१॥ प्र
ल्हाद उवाच ॥ पितरि प्रस्थितेऽस्माकं तपसे मंदराचलं ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥२॥ पि
पीलिकैरहिरिव दिष्ट्या लोकोपतापनः ॥ पापेन पापोऽभक्षीति वदंतो वासवादयः ॥३॥ तेषामतिब
लोद्योगं निशम्यासुरयूथपाः ॥ वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं ॥४॥ कलत्रपुत्रमित्राप्तान्
गृहान्पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥५॥ व्यलुंपन्राजशिबिरममरा ज
यकांक्षिणः ॥ इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥६॥ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ॥ यदृ
च्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥७॥ प्राह नैनां सुरपते नेतुमर्हस्यनागसं ॥ मुंच मुंच महाभाग सतीं परप
रिग्रहं ॥८॥ इंद्र उवाच ॥ आस्तेऽस्या जठरे वीर्य
मविषह्यं सुरद्विषः ॥ आस्यतां यावत्प्रसवं मो
क्ष्येऽर्थपदवीं गतः ॥९॥

ह ॥८॥ अविषह्यं दुःसहं अमः अनया प्रसवपर्यन्तं मत्रास्थितां ततश्च अर्थपदवीं मार्गे गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामीत्यर्थः।
९

राम
॥३९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षात्त्वगुरौरेवमहानन्तपित्रादिसंबंधात॥ तस्याहेतुम्हतेन संस्थां मत्तुं न यास्मानितत्रहेतवो निः किल्बिषत्स्यादय:॥१०॥ अने
न स्यपि प्रयोयो यो हंसचप्रियो यस्यतस्य ममभ त्यारेनां प्रदक्षिणीकृत्य॥११॥ इहोष्यतामित्याहेति शेष:॥१२॥ तथेत्यअंतिसमीपे

नारदउवाच॥ अयं निः किल्बिषः साक्षान्महाभागवतो महान्॥ त्वयानुप्राप्य नेसंस्थां मनंतानुचरो
वली॥१०॥ इत्युक्त्वा तां विहायेंद्रो देवर्षेर्मानयन्वचः॥ अनंतप्रियभक्तैनां परिक्रम्य दिवं ययौ॥११॥ त
तो नो मातरमृषिः समानीय निजाश्रमं॥ आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः॥१२॥ तथेत्य
वात्सीद्दैवर्षेरंतिसाप्यकुतोभया॥ यावद्दैत्यपतिर्घोरात्तपसो नन्यवर्तत॥१३॥ ऋषिं पर्यचरत्तत्रभ
क्त्या परमया सती॥ अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये॥१४॥ ऋषिः कारुणिकस्तस्याः प्रदादुभ
यमीश्वरः॥ धर्मंच तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलं॥१५॥ तत्तु कालस्य दीर्घत्वात्स्त्रीत्वान्मातुस्ति
रोधैर्ये॥ ऋषिणानुगृहीतां मां नाधुनाव्यजहात्स्मृतिः॥१६॥

१३॥ अंतर्वत्नी गर्भिणी इच्छया भर्तुरागमनानंतरं प्रसूतये एवमपि
स्वस्यगर्भस्यक्षेमाय॥१४॥ तस्याः शोकशांत्यै धर्मस्य तत्त्वं भक्तिलक्षणं ज्ञानमात्मानात्मविवेकः॥ तदुभयं प्रादात् ईश्वरः समर्थः॥१५
॥१६॥

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰ ॥३२॥

भूयात्‌ भवेत्‌ वैशारदी स्वार्थे तद्धितः॥ देहाद्यहंकारच्छेदनिपुणेत्यर्थः॥१७॥ कासौ वैशारदी॥ धीरित्यपेक्षायां नारदोक्तमेव देहात्मवि
वेकप्रकारमाह॥ जन्मेति द्वाभ्यां॥ जन्माद्याः जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवं तन्नाम इमे षट्‌ भावविकाराः वृ
क्षस्येव यथा फलानां दृश्यंते न तु स्थाणुमित्यर्थः कस्येत्येवं देहस्य दृष्टा इत्यर्थः॥ ईश्वरो विकारस्य मर्यादामूर्तिर्तस्या॥१८॥ तदेवं देह
धर्मैस्तैर्लक्षणैः पनात्मनो देहात्भेदो दर्शितः॥ इदानीमात्मधर्मैरेव भेदं स्फुटयति॥ तदहंकारादिकं त्याजयति आत्मा नित्यः अ

भवतामपि भूयान्मे यदि श्रद्दधते वचः॥ वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा॥१७॥ जन्मा
द्याः षडिमे भावाः दृष्टा देहस्य नात्मनः॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्त्तिना॥१८॥ आत्मा नि
त्योऽव्ययः शुद्धः एकः क्षेत्रज्ञ आश्रयः॥ अविक्रियः स्वदृग्धेतुः व्यापकोऽसंग्यनावृतः॥१९॥

नाशी वा अरे यमात्मेति श्रुतेः॥ अव्ययः अपक्षयशून्यः कृत्वो अक्षरे परमे व्योमन्निति श्रुतेः॥ शुद्धः निरवद्यं निरंजनमिति श्रुतेः॥ ए
कः एकमेवाद्वितीयं ब्रह्मेति श्रुतेः॥ क्षेत्रज्ञः विज्ञातारमरे केन विजानीयादिति श्रुतेः॥ आश्रयः यस्मिन्‌ द्यौः पृथिवी चांतरिक्षमिति
श्रुतेः॥ अविक्रियः निष्कलं निष्क्रियं शांतमिति श्रुतेः॥ स्वदृक्‌ आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः॥ हेतुः स इमांल्लोकानसृ
जतेति श्रुतेः॥ व्यापकः सत्यं ज्ञानमनंतमिति श्रुतेः॥ असंगी असंगो ह्ययं पुरुष इति श्रुतेः॥ अनावृतः सर्वस्य सर्वोमादाय सर्गमेवा

वासिष्ठे॥ लिङ्क्तः॥ १८

राम ॥३२॥

परैः श्रेष्ठैः विवेकसमर्थैर्देहाद्वैरविद्यान्तः असद्ज्ञानं मिथ्याबुद्धिं सृजेत् ॥२०॥ नन्वेवं विक्कात्मज्ञानेनोप्यपरोक्षानुभवेन ब्रह्मताप्राप्तिः
कथं स्यात् यतोऽहंकारादिकं त्यजेत् इत्यपेक्षायां न प्राप्तिप्रकारं सदृष्टांतमाह ॥ स्वर्णाकरक्षेत्रेषु स्फुरत्स्वर्णं करोत्युपायवत्सुयोगैर्ध
मानाद्युपायैस्तद्रुपायाभिज्ञो हेमकारो यथा स्वर्णमाप्नुयात् आत्मयोगैः ॥ आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मतां अध्यात्मवित् आत्मा
धिकृतकार्यकारणसंघातज्ञाता ॥२१॥ अध्यात्मविवेकमात्मप्राप्त्युपायमाह ॥ अष्टाविनिविभिः मूलप्रकृतिः सह देहेऽहंकारे पंच

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ॥ अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥२०॥ स्वर्णं यथा
ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं
लभेत ॥२१॥ अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्व
यात् ॥२२॥ ॥ छ

तन्मात्राणि चेत्यष्टौ त्रयः सत्वादयः । ते च प्रकृतिगुणा एव न तु भिन्नाः एकादशेंद्रियाणि महाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः
कपिलादिभिराचार्यैः एकत्वे हेतुः एषु साक्षित्वेनान्वयात् ॥ तदुक्तं ॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ॥ षोड
शकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति ॥२२॥ ॥ छ ॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥३२॥

जगत्तज्जंगमं तस्थुः स्थावरं अत्रैव सर्वसंघातात्मके देहे एव मृग्यः अन्वेष्टव्यः सुशकं चैतदित्याह ॥ नेति नेतीत्यन्यापोहेन निक्रियमाणे स्व
यमेव अतत्त्यजन् अनात्मवर्गात्पृथग्गुपलभ्यमान इत्यर्थः ॥२३॥ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः ॥ अत एव मणिभ्यः
सूत्रस्येवैकैकव्यतिरेकश्च तयोर्द्वैरूपमेतेयोर्विवेकः सर्वोत्कर्षो वाजेनउशता शुद्धेनात्मनामनसा सर्गस्थानसमाम्नायैः स्थिति

देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा ॥ अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ॥२३॥ अन्वयव्य
तिरेकेण विवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥२४॥ बुद्धेर्जागरणं स्वप्नः
सुषुप्तिरिति वृत्तयः ॥ तायेनैवानुभूयंते सोध्यक्षः पुरुषः परः ॥२५॥ ॥ छ ॥

तिसंहारैः यतो वा इमानि भूतानि जायंते इत्यादि श्रुत्युक्तसर्गाद्यनुसंधानेनेत्यर्थः ॥ विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैः
मृग्य इति सर्वेषामन्वयः ॥२४॥ विमर्शप्रकारमाह ॥ बुद्धेरिति द्वाभ्यां अध्यक्षः साक्षी ॥२५॥ ॥ ॥ छ

राम॰
॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतएभिर्बुधेर्भेदैः परिणामैः परितः स्थितैः। आनात्मधर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः। त्रिवर्गैः त्रिगुणात्मकैः क्रियोद्भवैः
कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात् कर्मकर्तृकत्वाच्च न त्वस्यात्मन एवैत अवस्थाः आत्मा तु बुध्यत्वया तत्तदवस्थावानिव भाति न
तत्वतः इत्यात्मनः स्वरूपं बुध्येत जानीयादित्यर्थः॥ अत्र दृष्टान्तः कुसुमधर्मैर्गंधैस्तदाश्रयं वायुमिव॥२६॥ ननु तर्हि यथा कु
सुमोपाधिकोपि वायोर्गंधो विवेकज्ञानेन निवर्त्तते एवमात्मनः संसारोपि निवर्त्तेतेत्याशंक्याह॥ एतद्द्वारः बुद्धिद्वारकस्तदव

एभिस्त्रिवर्गैः पर्यस्तैः बुद्धिभेदैः क्रियोद्भवैः॥ स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्वयात्॥२६॥ ए
तद्द्वारो हि संसारो गुणकर्मनिबंधनः॥ अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवानघ॥२७॥ तस्माद्भव
द्भिः कर्त्तव्यं कर्मणां त्रिगुणात्मनां॥ बीजनिर्हरणं योगः प्रवाहोपरमो धियः॥२८॥ ॥ श्री०

स्याद्द्वारको वा न स्वतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैर्निबध्यते इति तथा स चाज्ञानमूलः अतो अपार्थो मिथ्याभूतोपि स्वप्न इ
वेष्यते॥ वायोस्तु गंधवत् इव्यक्तं व घस्य वा स्वत्वाद्विषमो दृष्टान्तः॥२७॥ यस्मादेवं निवृत्तिर्घटेत तस्मात् बीजमज्ञानं तस्य निर्हर
णं दहनं किं तत् योगः कथंभूतः धियः प्रवाहं जाग्रदादिरूपमुपयतीति तथा॥२८॥ ॥ ॥२८॥ ॥ ॥२८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाह ॥ तत्रेति पंचभिः ॥ यैर्धर्मैर्यथानुष्ठितैर्वा रतिरिति यत्तत् ॥ अयमुपायो भग
वतोक्तः ॥ तथाहि गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति भक्त्या माममभि
भिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादि ॥२९॥ तत्रैवांतरंगान्धर्मानाह ॥ गुरोः शुश्रूषया भक्त्या प्रेमणा सर्वेषां लब्धानामर्पणे

तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यैरंजसा रतिः ॥२९॥ गुरुशुश्रूषया
भक्त्या सर्वलब्धार्पणेन च ॥ संगेन साधुभक्तानामीश्वराराधनेन च ॥३०॥ श्रद्धया तत्कथायां च की
र्तनैर्गुणकर्मणां ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥३१॥ हरिः सर्वेषु भूतेषु भगवा
नास्त ईश्वरः ॥ इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥३२॥ एवं निर्जितषड्वर्गैः क्रियते भक्ति
रीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिं ॥३३॥ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीला

न च ॥३०॥ तस्य लिंगानां मूर्तीनामीक्षणामर्हणं चादिशब्देन वंदनादीनां तैश्च ॥३१॥३२॥ निर्जितः षट्कामक्रोधलोभमोहमदमत्सरा
णामिंद्रियाणां वा षड्वर्गो यैः ॥३३॥ भगवद्भक्तेर्लिंगान्याह निशम्येति त्रिभिः गुणान्भक्तवात्सल्यादीन् ॥ अतिहर्षेणोद्भूताः पुलकाः अ

ननृतिः क्वनानि ॥ यद्वा निर्हर्षाश्रुपुलका
श्रुगद्गदं मोक्षं दउद्गायति नैति नृत्यति ॥२४॥
श्रूणिर्नगद्गदं यथा भवसे वं मोक्षं दउद्गायति ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५॥ तस्य भावस्त्वेति तिष्टादिः। तस्य भावो भावनानेनानुकृते आशयाकृती मनःशरीरे यस्य निर्दग्धं बीजमनुशयो वासना च यस्य सः सम्य
गेति प्राप्नोति॥ ३६॥ ततः किमत आह अधोक्षस्यालंभेन मनसा स्पर्शनं पाठांतरे तस्याश्रयणं अशुभः। रागादियुक्त आत्मा मनो यस्य सं
सृतिचक्रशातनं तल्लिवर्तकं बुधा विदुः। तदेवं ब्रह्मणि निर्वाणं लयो मोक्षः। तदात्मकं सुखं विदुः। हृदीश्वरमंतर्यामिणं॥ ३७॥ मक्ति

यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं॥ मुहुः श्वसन्वक्ति हरे जगत्पते नारायणे
त्यात्ममतिर्गतत्रपः॥ ३५॥ यदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः॥ निर्दग्ध
बीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं॥ ३६॥ अधोक्षजालंभमिहाशुभात्मनः शरी
रिणः संसृतिचक्रशातनं॥ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं॥ ३७॥ को
तिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतो
किं विषयोपपादनैः॥ ३८॥

रशक्येति चेन्नमंतष्पमित्याह॥ छिद्रवत् आकाशवत् विषयाणामुपपादनैरर्जनैः किं
तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वेऽस्मत्करादि साधारणापपतेरित्यर्थः नचैवमादौ पुनरुक्तिदोषः॥ नारदोक्तानुवादरू
पत्वादस्य प्रकरणस्य॥ ३८

अनर्थं च विषयार्जनमित्याह॥ रायः अर्था क्षणभंगुरमायुर्यस्य॥ न दुःक्रमिति ह्रासेषु॥ धनं हि पुरुषो लोके पुरुषं धनमेव वा॥ अव
श्यमेकं त्यजति तस्मात् किं धनतृष्णयेति ॥३९॥ यत्नदुःखेन संभिन्नं न च ग्रस्तमनंतरं॥ अभिषौलोपपन्नं च तत्सुखं स्वर्गसुखास्पदं
मित्येवंभूताः स्वर्गादिभोगा अपि न सेव्या इत्याह एवं हीति क्षयिष्णुत्वे हेतुः कृता इति तद्यथेह कर्मजितो लोकः क्षीयते एव

रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः॥ सर्वेर्थकामाः क्षणभंगुरायुषः कुर्वं
ति मर्त्यस्य कियत्प्रियं चलाः॥ ३९॥ एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न नि
र्मलाः॥ तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये॥ ४०॥ यदर्थमिह कर्माणि
विद्वन्मान्यसकृन्नरः॥ करोत्यतो विपर्यासममोघं विंदते फलं॥ ४१॥॥

मेवामुत्र पुण्यजितो लोकः क्षीयते इति श्रुतेः अतएव पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्द्धादिमत्त्वात् न विद्यते दृष्टं च श्रु
तं च दूषणं यस्मिन्॥ ४०॥ किं च यदर्थं यत्संकल्प्य अतः संकल्पितात् विपर्यासं विपरीतं फलं अमोघं अवश्यं प्राप्नोति॥ ४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदेवदर्शयन्निसुखायेतिइहयाइछयाक्रियया वा यः पुंवमनीहाया हेतोः सुखेनावृत्तो व्याप्त आसीत्॥ स ईहया दुःखमाप्नोत्ये
व॥ किंच कामान् भोगान् काम्यैर्विषयैः॥ कर्मभिर्वा पारक्यः श्वादिभोग्यः नश्वरात्मीयः भंगुरश्च॥ ४३॥ किमु देहात् व्यवहिताः अ
पत्यादयो ममता विषयाः पारक्याइति वक्तव्यं किं च स्वयं पुरुषार्थरूपस्य किमेतैरित्याह किमेतैरिति॥ ४५॥ भोगावसराभावाच्च

सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः॥ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः॥ ४२॥
कामान् कामयते काम्यैर्यदर्थमिह पुरुषः॥ स वै देहस्तु पारक्यो भंगुरो यात्युपैति च॥ ४३॥ किमु
व्यवहितापत्यदारागारधनादयः॥ राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः॥ ४४॥ किमे
तैरात्मनस्तुच्छैः सह देहेन नश्वरैः॥ अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः॥ ४५॥ निरू
प्यतामिह स्वार्थः कियान् देहभृतोसुराः॥ निषेकादिषु सर्वास्वस्थासु क्लिश्यमानस्य कर्मभिः॥ ४६॥ क

नैः कुउपयोग इत्याह॥ निरूप्यतामिति निषेकादिनेः कर्मभिः मरणपर्यंतेन देहो देहान्तरानुवर्तिना॥ कर्मभिस्तनुते देहमुभ
क्लिश्यमानस्य कर्मभिः॥ कियानर्थ इति वा अन्वयः॥ ४६॥ ननु कर्मसु समाहेषु भोगावसरः स्यात् तत्राह कर्माणीति नचेदं कर्म तत्फलं दे
हादिकं च परमार्थ इत्याह उभयं कर्म देहं च अविवेकतः अज्ञानेनैव तनुते॥ ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदपाश्रयाः यदधीनाः॥४८॥ भूतानां प्राणिनां जीवसंज्ञितः अंतर्यामी॥४९॥ असुराणां अस्माकं अत्रनाधिकार इत्यपि नवाच्यमित्य
ह देवइति पंचभिः॥५०॥५१॥ अमलया निष्कामया विडंबनं नटनमात्रं॥५२॥५३॥ अच्युततां अमरत्वं॥५४॥ अध्यायद्वयोक्तमुपसं

तस्मादर्थाश्चकामाश्चधर्माश्चयदपाश्रयाः॥भजतानीहयात्मानमनीहंहरिमीश्वरं॥४८॥ सर्वेषा
मपिभूतानांहरिरात्मेश्वरःप्रियः॥भूतैर्महद्भिःस्वकृतैःकृतानांजीवसंज्ञितः॥४९॥ देवोसुरोमनु
ष्योवायक्षोगंधर्वएववा॥भजन्मुकुंदचरणंस्वस्तिमान्स्याद्यथावयं॥५०॥ नालंद्विजत्वंदेवत्वमृ
षित्वंवासुरात्मजाः॥प्रीणनायमुकुंदस्यनवृत्तंनबहुज्ञता॥५१॥ नदानंनतपोनेज्यानशौचंनव्र
तानिच॥प्रीयतेऽमलयाभक्त्याहरिरन्यद्विडंबनं॥५२॥ ततोहरौभगवतिभक्तिंकुरुतदानवाः॥आ
त्मौपम्येनसर्वत्रसर्वभूतात्मनीश्वरे॥५३॥ दैतेयायक्षरक्षांसिस्त्रियःशूद्राव्रजौकसः॥खगामृगाः
पापजीवाःसंतिह्यच्युततांगताः॥५४॥ एतावानेवलोकेस्मिन्पुंसःस्वार्थःपरःस्मृतः॥एकांतभक्ति

संहरति॥ एतावानिति॥ तदीक्षणं गोविंददृष्ट्यासम्माननं॥५५॥॥छ॥ र्गोविंदेयत्सर्वत्रतदीक्षणं॥५५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति सप्तमे सप्तमः ॥ ७ ॥ अष्टमे निरूप्यास्तंतु निघ्नन् दैत्यो हतः स्वयं ॥ आविर्भूय नृसिंहेन सर्वब्रह्मादिभिः स्तुतः ॥ १ ॥ अंतः कृपासुधाक्षो
वहिक्रोधोन्नकेसरी ॥ दैत्येंद्रमरिमावेन मजं जनसममावयत् ॥ २ ॥ एकांतसंस्थिते प्रत्यङ्दृष्टौ यथा यथावत ॥ ३ ॥ सत्वहंतुमनो दधे कथं

इति श्रीभागवते महापुराणे सप्तमस्कंधे सप्तमोऽध्यायः ॥ नारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा त
दनुवर्णितं ॥ जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं ॥ १ ॥ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थितां ॥
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं ॥ कोपावे
शचलद्गात्रः पुत्रं हंतुं मनो दधे ॥ ३ ॥ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणं ॥ आहेक्षमाणः पापेन
तिरश्चीनेन चक्षुषा ॥ ४ ॥ प्रश्रयावनतं दांतं बद्धांजलिमवस्थितं ॥ सर्पः पदाहत इव श्वसन्प्रकृति
दारुणः ॥ ५ ॥ हे दुर्विनीत मंदात्मन् कुलभेदकराधम ॥ स्तब्धं मच्छासनोद्धृत्तं नेष्ये त्वाद्य यमक्षयं ॥ ६ ॥

भूतः कोयस्य विशेनोद्रेकेणावलवतां यत्रं वपुर्यस्य सः क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः ॥ तस्य मेऽभीतवन्मूढ शा
३ ॥ क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ॥ ४ ॥ ५ ॥ मंदात्मन् अल्पबुद्धे मदाज्ञातिलंघिनं त्वामद्य यमालयं नेष्यामि ॥ ६ ॥
भीतवत् किंबलं यस्य सः किंबलः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए॥ वशंप्रणीताइत्यत्रहेतुः सईश्वरइतिउरवः क्रमाः पादविक्षेपायस्यवडुपराक्रमइतिवा॥ ओजआदिरूपः सत्वंधैर्यंबुद्धिर्वा॥ ९॥ मत्कृत्
सोकथंममापिसएवबलंस्यादतआह॥ जहीतिआत्मनः स्वस्यस्वभावंत्यज॥ अजितादात्मनोमनसऋतेविनाअन्येद्विषोनसंतिकिंचतद्वि
नदेवहिसाम्येनमनसोधारणमेवसमर्हणमाराधनं॥ १०॥ मयादिग्विजयेसर्वेजिताः अतः सांप्रतंनसंतीतिसत्यमितिचेततत्राह॥ द

प्रल्हादउवाच॥ नकेवलंमेभवतश्चराजन्सवैबलंबलिनांचापरेषां॥ परेवरेमीस्थिरजंगमानांब्रह्माद
योयेनवशंप्रणीताः॥ सईश्वरः कालउरुक्रमोसावोजः सहः सत्वबलेंद्रियात्मा॥ सएवविश्वंपरमः
स्वशक्तिभिः सृजत्यवत्यत्तिगुणत्रयेशः॥ ९॥ जह्यासुरंभावमिमंत्वमात्मनः समंमनोधत्स्वनसंतिवि
द्विषः॥ ऋतेजितादात्मनउत्पथस्थितात्तद्धिह्यनंतस्यमहत्समर्हणं॥ १०॥ दस्यून्पुराषण्नविजित्य
लुंपतोमन्यंतएकेस्वजिताद्दिशोदश॥ जितात्मनोज्ञस्यसमस्यदेहिनांसाधोः स्वमोहप्रभवाः कुतःप
रे॥ ११॥

दस्यूनितिएकेभवादृशाः मंदाः पुराआदौलुंपतः सर्वस्वंहरतः षडिंद्रियलक्षणाछत्रून्हत्वानंतविजित्यअजित्वादश
दिशः स्वयंजितामन्यंते॥ साधोस्तुजितचित्तस्यदेहिनांसमस्यज्ञविदुषः स्वाज्ञानकल्पिताः परेशत्रवः कुतस्युः॥ ११॥ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्तं निश्चितं विल्कवा अनन्विता इत्यर्थः ॥१३॥ हे मंदभाग्य यद्यसावस्ति नहि क्वास्ति प्रह्लाद आह सर्वत्रास्ति हिरण्यकशिपुराह न
हि कस्मात्स्तंभे नास्ति प्रह्लादस्तु स्तंभे निरीक्ष्यमाण आह दृश्यत इति ॥१३॥ हिरण्यकशिपुस्तत्र न मपश्यन्नाह सोहमिति ॥१४॥ प्रह्ला
हिरण्यकशिपुरुवाच ॥ व्यक्तं त्वं मर्त्तुकामोसि योतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मंदात्मन्ननु स्युर्वि
प्लवाः गिरः ॥१२॥ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः ॥ क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्य
ते ॥१३॥ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं ॥१४॥ एवं
दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्योत्पतितो वरासनात्स्तंभं तताडातिब
लः स्वमुष्टिना ॥१५॥ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत् ॥ यं वै स्वधिष्ण्योप
गतं त्वजादयः श्रुत्वा स्वधामात्ययमंग मेनिरे ॥१६॥ स विक्रमन्पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादम
पूर्वमद्भुतं ॥ अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥१७॥ ॥ ॥
देन मूर्द्धबद्धांजलिना निरीक्ष्यमाणं स्तंभं ताडितवान् ॥ तस्पदं तस्य ध्वनेरास्पदं ॥१७॥ ॥१६॥ ॥१७॥ ॥ ७९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
३८

भगवांस्तदा अदृश्यत दृश्यो बभूव किमर्थं निजभृत्येन प्रल्हादेन यद्भाषितं तत्सत्यं विधातुं तत्सत्यं कर्तुं तथा अखिलेषु भूतेषु आत्मनो व्याप्तिं च सत्यां कर्तुं स्तंभे अदृश्यत ननु किमर्थं भौतिकेषु च भावेषु भूतेषु यमहस्तु च ॥ भगवानात्मा इति तेनैव भृत्येन भाषितं तत्सत्यं कर्तुं तथा अ
त्यद्भुतं दैत्यघातकमति घोररूपमुद्वहन् दधत् ॥ ननु किमर्थं निजभृत्यैः सनकादिभिः शापानंतरमनुतप्तैः त्रिभिः जन्मभिः शापमोक्षो
भवत्विति यद्भाषितं तत्सत्यं कर्तुं तथा अत्यद्भुतं ब्रह्मसृष्टावदृष्टं मनुष्यं च रूपमुद्वहन् तत्र न मृगाकारं न च मनुष्याकारमुद्वहन् सभायां मध्ये अ
दृश्यतेति ननु किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितं तत्सत्यं कर्तुं न तेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो इति
तथा नांतर्बहिर्दिवा नक्तमिति तिन नरैर्न मृगैरिति च ब्रह्मणा निजभृत्येन तथास्त्विति यद्भाषितं तत्सत्यं कर्तुं न हि तद्ब्रह्मसृष्टं मृतं तेन च नरो

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन् स्तंभे
सभायां न मृगं न मानुषं ॥ १८ ॥

वा मृगो वा न च सभागृहस्थानः न च प्रांगणवर्ती बहिः । एवं तान्यां भाषितं कर्तुं यच्च हिर
ण्यकशिपुना भाषितं नूनमेतद्विरोधेन मृत्युर्मे भविता न चेतेति ॥ तथा अयमकुतश्चिद्भयोऽमर इति ॥ यत्तु नारदेन निजभृत्येनेदं प्रतिय
द्भाषितं अयं महान् संस्थानप्राप्स्यति ॥ अनंतानुचर ॥ इत्यनेन तस्य भक्तपक्षपातित्वं यद्भाषितं तच्च सत्यं कर्तुं अदृश्यत च कारात् नि
जभाषितं च यत् कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यतीति तथा तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ इत्यादि तान् च सत्यं कर्तुं अ
दृश्यतेति द्रष्टव्यं ॥ अलमिति विस्तरेण ॥ १८ ॥

राम
३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदैत्यः एवं ध्वनिं श्रुत्वा नदाश्चर्यं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् स्तंभमध्यान्निर्गच्छन्तं मृगेंद्ररूपोमिश्रंहृसमहो किमेतदिति मीमां-
सितवान् निनिशेषः नसैवमलं भयानकं नन्त्रसिंहरूपं मीमांसमानस्सायतो नारसिंहरूपो हरिः समुत्थितः ॥ २८ ॥ भयानकत्वमेव दर्शयस्तद्रू-

सत्त्वमेवं परितो विपश्यन् स्तंभस्य मध्यादनुनिर्जिहानं ॥ नायं मृगो नापि नरो विचित्रमहो किमेतन्नृम-
गेंद्ररूपं ॥ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं ॥ २९ ॥ प्रतप्तचामीकरचंडलोच-
नं स्फुरत्सटाकेसरजृंभिताननं ॥ करालदंष्ट्रं करालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं ॥ २० ॥ स्त-
ब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं ॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरु-
वक्षस्स्थलमल्पमध्यमं ॥ २१ ॥ ॥ ॥ २१ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥

पमनुवर्णयन्नितिभिः ॥ प्रतप्तं चामीकरं स्वर्णमिव पिंगानि चंडानि लोचनानि यस्मिन् सटाः जटाः केसराः कंठरोमाणि स्फुरद्भिः सटाकेस-
रैर्जृंभितं सात्टोपमाननं यस्मिन् करालाः तुंगाः दंष्ट्रा यस्मिन् करालः करवालः खड्गः तद्वत् चंचला ॥ क्षुरांतवती स्थाणजिह्वा यस्मिन् भ्रूकु-
टीयुक्तेन मुखेनोल्बणं ॥ २० ॥ स्तब्धौ उन्नतौ शंकुवदूर्ध्वौ कर्णौ यस्मिन् गिरिकंदरवदद्भुतं व्यात्तं प्रसृतं मास्यं नासे च यस्मिन् ॥ हनुः कपोलप्रांतौ
तयोर्भेदेन विदारणेन भीषणं दिविस्पृशत्कायो यस्मिन् अलुक्समासः अदीर्घो ह्रस्वा पीवरा वक्षस्थला ग्रीवा यस्मिन् उरु विशाले वक्षःस्थ-
लेयस्मिन् तत्तवनच्च अल्पं मध्यमुदरं यस्मिन् ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥३९॥

चंद्रप्रभुर्वक्त्रौ रैत्तलनूरुहे हे लोमभिः छुरितं व्याघ्रं विम्बकुसर्वैनः मस्तनाभुजालेषां अनिकानि स्तोमाः तेषां शतानि यस्मिन्न् तत्खान्येवायुधानिय
स्मिन् ॥२२॥ दुराहरं प्राप्नुमशक्यं सर्वाणि चनिजानि चक्रादीनि इत्तराणि वज्रादीनि तान्येवायुधप्रवेकाः शस्त्राणि तमाः तैर्विद्राविता दैत्यदानवा
येनतद्रूपं मीमांसमानस्यायतः समुत्थितं इति पूर्वेणैवान्वयः ॥२३॥ तदाविर्भावप्रयोजनविमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह सप्तभिः
प्रायेणाम हामायाविनाहरिणाऽयमेवंविधो वधः मत्युहेतुः स्मृतः चिंतितः ॥ तथाप्यनेन समुद्यतेन किं स्मानकिंचित्स्यादित्येवं प्रभुर्वन्न्म

चंद्रप्रभुगौरैश्छुरितं तनूरुहे विषक्रमुजानीकशतं नखायुधं ॥२२॥ दुरासदं सर्वनिजेतरायुधप्रवेकविद्राविनदैत्यदानवं ॥२३॥ प्रायेणमेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किं ॥ एवं ब्रुवंस्त्वभ्यप
तद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः ॥२४॥ अलक्षितोऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सो
सुरस्तदा ॥ न तद्विचित्रं खलु सत्वधामनि स्वतेजसा यो नु पुरापिबत्तमः ॥२५॥ ॥ ॥ ॥

पतविस्त्वन्वयः ॥२४॥ तदाऽसोऽसुरो नृसिंहौजसि दीप्ते पतितः सन् अलक्षितः अदृष्टो जातः ॥ सत्वधामनि सत्वप्रकाशे हरौ पतितं तस्यत
मोमयस्यादर्शनं तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो अपिबत् तस्मिन् ॥२५॥ ॥ ॥
श्री॰ ॥ श्री॰ श्री॰ श्रीगोविंदाय नमः ॥ श्री॰ ॥ ॥ ॥२५॥ ॥२५॥ ॥ ॥

राम
३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विक्रमंतं समंततः प्रहरंतं ॥ २६ ॥ हस्तादुत्कलितः निःसृतः तदा अमरा देवाः सर्वैर्धिष्ण्यपाः ॥ असाध्वमन्यंत हृतान्योकांक्षिस्यानानिये
षांते तद्विषाघनच्छदाः ॥ मेघांतरिताः संतः ॥ २७ ॥ यस्य हस्तात्त्वयं मुक्तः तं नृसिंहारं स्ववीर्योच्छंकितं मन्यमानः खड्गचर्मणी प्रगृह्य पु
नः संज्ञासज्जत अन्यपद्यतेत्वन्वयः ॥ २८ ॥ श्येनस्येव वेगोयस्य तं शतचंद्रवर्त्मभिः ॥ खड्गचर्ममार्गैः ॥ अच्छिद्रं पद्यात वल्येवं मुपर्यधश्च

तंतोऽभिपद्याऽभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया ॥ तं विक्रमंतं सगदं गदाधरो महोर
गं तार्क्ष्यसुतो यथाग्रहीत् ॥ २६ ॥ स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः
असाध्वमन्यंत हृतौकसोमरा घनच्छदा भारत सर्वधिष्ण्यपाः ॥ २७ ॥ तं मन्यमानो निजवीर्य
शंकितं यद्धस्तमुक्तो नृहरिं महासुरः ॥ पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृ
धे ॥ २८ ॥ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः ॥ कृत्वाट्टहासं खरमुत्स्वनो
ल्बणं निमीलिताक्षं जगृहे महाजवः

रतं अट्टहासमेवाह ॥ खरं तीव्रं उत्स्वनेन महाशब्देनोल्बणं भयंकरं ततद्दृष्ट्वा न हरेस्तेजसा
निमीलिते अक्षिणी यस्य ॥ २९ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा· स·
॥५०॥

ग्रहणे दृष्टांतः व्यालो यथा आशु मूषकं विदारणे दृष्टांतः ॥ अहिं गरुड इवेति विषद्रुः सर्वतः स्फुरंतं निःसरंतं ग्रहणेनानुरविविवशं इंद्रेण सह
युद्धे जन्मयुक्तेन कुलिशेन न क्षतात्वगपि यस्य द्वारि सभायां नीतं तन वहिः उरुं उरौ निपात्य नखैः न चांवरे न रैवनेव्यमुद्गिरसुमाद्विवीर
वं दिवानक्तपरिहाराय संध्यायामिति दृष्टव्यं ॥२०॥ दैत्यवधमुक्त्वा नेद्रस्य वधमाह ॥ द्वाभ्यां संरंभेणाद्दुःप्रेक्षाणि करालानि लोचनानि

विषद्रुःस्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशासक्तत्वचं ॥ द्वार्यूरुमायात्य ददार लीलयान
रैर्यथाहिंगरुडो महाविषं ॥२१॥ संरंभदुःप्रेक्ष्यकरालं लोचनो व्यात्ताननांतं विलिहन् स्वजिह्व
या ॥ असृक्लवाक्तारुणकेशराननो यथांत्रमाली द्विपहत्यया हरिः ॥२२॥ नखांकुरोत्पाटितहृत्
सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ॥ अहन्समंतान्नखशस्त्रपार्ष्णिभिर्दोर्दंडयूथोनु
(पथान्सहस्रशः ॥२३॥

यस्य ॥ असृजो रक्तस्य लवैर्विंदुभिः रक्ताः सिक्ताः अत एव अरुणाः केशरा आननं च यस्य सः
कः इव द्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूतः तस्यानुचरान् अहन्नित्युत्तरेणान्वयः ॥२२॥ नखांकुरैरुत्पाटितं हृत्सरोरुहं य
स्य तं ॥ दोर्दंडानां यूथानि यस्य सः ॥ तमनुपथा येषां तान् ॥ अन्यानपि तत्पक्षपातिन इत्यर्थः ॥२३॥ ॥ ॥

राम
॥५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैत्यवधव्यग्रस्य न हरेराटोपमाह ॥ द्वाभ्यां सटाभिरवधूताः प्रकंपिताः परापतन्नभ्रशीर्यन्त न तस्य दृष्ट्या विलुंठरोचिर्येषां ते निरस्तनाप्रभाः अभ
न्निनिद्रोष ॥ दिग्गजाः ॥ ३३ ॥ तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः संकुला व्याप्ता सति प्रोत्सर्पत तस्य स्थानात्स्रकर्षेरणोदस्तपतन ॥ ३४ ॥ स्वन्
त्यैश्वर्यमाश्चर्यमिव मत्वा कौतूहलेन तस्यासने उपविष्टं भयात्कोपिमव भाजनासेवत ॥ नलक्षितो हैरण्योमतियोद्धा येन ॥ ३५ ॥ लोकत्रय

सटावधूता जलदाः परापतन्नभ्रहाश्च न तद्दृष्टिविमुष्टरोचिषा ॥ अंभोधयः श्वासहता विचुक्षुभुर्नि
र्ह्रादभीता दिशिभा विचुक्रुशुः ॥ ३३ ॥ द्यौस्तस्य टोत्क्षिप्तविमानसंकुला प्रोत्सर्पतः क्ष्मा च पदाति पीडि
ता ॥ शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥ ३४ ॥ ततः सभायामुपविष्टमुत्तमे न
पासने संभ्रमतेजसं विभुं ॥ अलक्षितहैरण्यमत्यमर्षणो प्रचंडवक्त्रं नवभाजकश्चन ॥ ३५ ॥ निशम्य लो
कत्रयमस्तकज्वरं नमादि दैत्यं हरिणा हतं मृधे ॥ प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैरभिवर्ष
तः स्त्रियः ॥ ३६ ॥

स्य मस्तकज्वरं शिरोव्यथेव दुःसहं ॥ प्रहर्षस्य वेगेन उत्कलितानि विकसितानि आननानि यासां ताः न हरिं ववृ
षुः ॥ ३६ ॥ ॥ श्रीगोविंदायनमः ॥ छ ॥ श्री० ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाकिनां विमानावलिभिः सुराणामानकाः पटहाः नैर्जघ्निरे वादिताः स्त्रियोप्सरसो ननृतुः ॥३७॥३८॥ गंधर्वा अप्सरश्चारणाश्चेत्यर्थः ॥३९॥
नरशार्दूलं पुरुषोत्तमं ब्रह्मादयो नरसिंहस्य शंकया कुलचेतसः ॥ आरादेवास्तुवन्तु पदशश्लोकः पृथक् पृथक् ॥४०॥ अनंताय अनंतं प्रसा

तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां ॥ सुरानका दुंदुभयोथ जघ्निरे गंधर्वमुख्या
ननृतुर्जगुस्त्रियः ॥३७॥ तत्रोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः ॥ ऋषयः पितरः सिद्धा विद्याधरमहो
रगाः ॥३८॥ मनवः प्रजानां पतयो गंधर्वाप्सरसां गणाः ॥ यक्षाः किंपुरुषास्तात वेतालाः सिद्धचारणाः
॥३९॥ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः ॥३९॥ मूर्ध्नि बद्धांजलिपुटा आसीनं तीव्रतेजसं ॥ ईडिरे नर
शार्दूलं नातिदूरचराः पृथक् ॥४०॥ श्रीब्रह्मोवाच ॥ नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवि
त्रकर्मणे ॥ विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेव्ययात्मने ॥४१॥ ॥ छ

दयितुं नतोस्मि अनंतत्वे हेतुः ॥ दुरंताः शक्तयो यस्य तस्मै नः विचित्राणि वीर्याणि प्रभावा यस्य तत्र स्थिमंर्थ पवित्राणि शोधकानि कर्माणि यस्य
विचित्रवीर्यत्वमेवाह ॥ विश्वस्येति ॥४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संदधते सम्यक् कुर्वते एवमपि अस्मयात्मने अप्रच्युतसत्त्वरूपाय ॥४२॥ रुद्रस्तु तत्कोपकालानभिज्ञो नायं कोपावसर इति तं प्रार्थयते सह
स्रयुगांतस्तव कोपस्य कालः ॥ कोपयोग्यश्चायमित्याह अकल्पः अल्पः अतः कोपान्निहत्य प्रह्रादं माहिंसीरित्याह ॥ नत्स्तु तमिति
यद्यप्यकालेप्ययं कोपोस्य भक्तस्य रक्षणार्थं इति चेत् न हि इदानीं कोपेस्त्वत्के मं पाहीत्यर्थः ॥४२॥ इंद्रस्तु नास्माकं हविर्भोगादिलाभः पु
रुषार्थः किंतु त्वत्सरिचर्यैव भवता पुनरनेन संरंभेणास्मत्कार्यमेव साधितं तत्स्य च सिद्धत्वादुपसंहरैनं क्रोधमित्याशयेनाह ॥ हे परमे

श्रीरुद्रउवाच ॥ कोपकालो युगांतस्ते हतोयमसुरोल्पकः ॥ तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥४२॥
इंद्रउवाच ॥ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्र
त्यबोधि ॥ कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किं
॥४३॥

अस्मास्त्रायता रक्षता भवता स्वीयाः एव भागा दैत्यात्सकाशात् आहृताः ॥ अंतर्यामिरूपेणैव यज्ञेषु भोक्तृत्वात् अस्मदीयं हृदयकमलं
च त्वद्गृहमेतावत्पर्यंतं भयहेतुत्वेनास्मान्निपर्यंतं संस्थितेन दैत्येनाक्रांतं व्याप्तं सत् प्रत्यबोधि भयापाकरणेन विकाशं नीतं ॥ न च
त्रैलोक्यैश्वर्यसाधनार्थमयमुद्यम इति चेत्तत्राह कालग्रस्तमिति ते त्वां हे नारसिंह नरस्य सिंहस्य चाकाकाराभ्यां चाविर्भूत ॥४३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषयस्तु नृपः प्रवदन्ति तेनास्माकं महाननुग्रहः कृतइत्याहुः त्वंनोपराधपरंध्यामलक्षणंतपः परमत्वेहेतुः आत्मनस्तवतेजः परम
त्वंभावरूपं नरेवाहुः येनतपसा आत्मनि लीनमिदंविश्वंससर्ज्जेत्स्रष्ठवानसितनत् अमुनादैत्येनविघ्नविलुसंकुंठितंसत् हेशरण्य
पालअद्यरक्षार्थंगृहीतेनानेनवपुषापुनरपितपः कुरुतेस्मनुज्ञातवानसि॥ तस्मैतेनमइत्युत्तरश्लोकचतुर्थपादस्यानुषंगः ४४

ऋषय ऊचुः॥ त्वंनस्तपः परमास्थयदात्मतेजोयेनेदमादिपुरुषात्मगतंससर्ज्ज॥ तद्विघ्नलुप्तमनु
नाद्यशरण्यपालरक्षागृहीतवपुषापुनरन्वमंस्थाः॥४४॥ पितर ऊचुः॥ श्राद्धानिनोधिवुभुजे
प्रसभंतनूजैर्द्दत्तानितीर्थसमयेपितिलांबुसम्यः॥ तस्योदरान्नखविदीर्णवपादय अर्छततस्मै
नमोन्नहरयेखिलधर्मगोप्त्रे॥४५॥ ॥

पितरस्तुश्राद्धोद्धरस्तरोणनपरमोपकारिणंप्रणामंतिश्राद्धानिश्रद्धायुक्ता
निपिंडादीनिनोस्मभ्यंपुत्रैर्दत्तानिप्रसभंबलानिस्वयमधिकृत्यबुभुजेकिंचस्नानसमयेदत्तंतिलोदकमप्यपिब॥ तानितस्योदरा
द्यअर्छेनआहृतवान्॥ कथंभूतान्॥ नखैर्विदीर्णावपायस्यतस्मात्वपाविदारणस्यतत्कर्तापिंडोद्धरणमेवफलमितिभावः॥४५ राम
॥४२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगसिद्धां गतिं अणिमादिसिद्धिं नाना अनेके दर्पा यस्य तं तस्मै तुभ्यं तं त्वामुद्दिश्य ॥४६॥ विद्यां अंतर्द्धानादिलक्षणां अनुराद्धां संप्राप्तां
संख्ये युद्धे ॥४७॥ रत्नानि फणासु स्थितानि स्त्रीरत्नानि च उन्नमालिनि यः आसां स्त्रीरत्नं दत्त आनंदो येन न तत्संबोधनं पाठांतरे असा

सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहार्षीत्योगतपोबलेन ॥ नानार्दर्प्यं तं नखैर्विददार
तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥४६॥ विद्याधरा ऊचुः ॥ विद्यां पृथक् धारणयानुराद्धां न्यषेधदः
ज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ॥४७॥ नागा ऊचुः
येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानंद नमोस्तु ते ॥४८॥ मन
व ऊचुः ॥ मनवो वयं तव निर्देशकारिणो दितिजेन देव परिभूतसेतवः ॥ भवता खलः स उपसंहृतः
प्रभो करवाम ते किमनुशाधि किंकरान् ॥४९॥ ॥

कं दत्त आनंदो येनेति ॥४८॥ नृसिंहेनावलोकिताः संतो मूर्द्धिबद्धांजलयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः वर्णाश्र
ममर्यादा येषां ते अनुशाधि अनुशिक्षय ॥४९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥४३॥

प्रजापतयोऽपि तद्वलोकिताः प्रोचुः ॥ हे परेशानेत्वयाभिसृष्टाः प्रजेशा वयं येन निषिद्धाः संतः प्रजा न सृजामः ॥ स एष भिन्नवक्षा यस्य सत्
तु निश्चिंतं मनः शेते ॥ अतः परं प्रजास्रक्ष्यामह इति हृष्यंत आऊचुः ॥ हे लक्ष्मत्व मृष्टेन नवायम भवतारो जगतो मंगलं ॥ ५० ॥ गंधर्वा अपि तद्
वलोकिताः प्रोचुः ॥ हे विभो वयं ते त्वदीयाः नर्तकाः गायेन त्वे गायकाश्च येन स्वाधीनाः कृताः ॥ कथंभूतेन वीर्यशौर्यबलेशशक्तिः

प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टाः ॥ न येन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया
भिन्नवक्षा नुशेते जगन्मंगलं सत्त्वमूर्तेऽवतारः ॥ ५० ॥ गंधर्वा ऊचुः ॥ वयं विभो ते नटनाट्य
गान्धर्वकायेनात्मसाद्वीर्यबलौजसा कृताः ॥ स एष नीतो भवता दशामिमां किं नूत्पथ
स्थः कुशलाय कल्पते ॥ ५१ ॥ चारणा ऊचुः ॥ वयमनुचरत्वुत्व्याः कर्मभिस्ते मनोज्ञैरह
हिति सुतेन मापिता वाहकत्वं ॥ स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंच॥

तामप्यामोजः प्रभावो यस्य तेन इमां दशां मतिं उचितमेतदित्याऊचुः ॥ किमिति ॥ ५१ ॥ भवापवर्गसंसारनिवर्तकं ॥ आश्रयेणाहेतुः
यद्यस्मात्स्वाधयः सांहहरिमयजनकत्वेन शेते निष्ठते जितया ॥ स एषो सुरस्त्वया समापितः अंतं नीतः ॥ ५२ ॥ मनोज्ञैः कर्मभिरनुचरैष्टु

भृत्याः कृतांजलयः ॥ हे पवित्रकीर्तिनिधानमस्य ॥ ५३ ॥

राम
॥४३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंपुरुषास्त्वांलोके वयंवराकाइत्याहुः ॥ वयंकिंपुरुषास्तुच्छप्राणिनः ॥ त्वंतुमहानद्भुतप्रभावःपुरुषः ॥ नन्वयंमहानीश्वरोऽस्मत्तोऽयंहत इति
किंनवर्णयतइत्याशंक्यकिंयदेतदित्याहुः ॥ अयमितिना ॥ ५४ ॥ सत्रेषुयज्ञेषुगीत्वायाहंत ॥ एतद्दिष्ट्याभद्रंकृतं ॥ ५५ ॥ अमुनाहिरि

किंपुरुषाऊचुः ॥ वयंकिंपुरुषास्त्वंतुमहापुरुषईश्वरः ॥ अयंकुपुरुषोनष्टोधिक्कृतःसा
धुभिर्यदा ॥ ५४ ॥ वैतालिकाऊचुः ॥ सभासुसत्रेषुतवामलंयशोगीत्वासपर्य्यांमहतींलभाम
हे ॥ यस्तामनैषीद्वशमेषदुर्जनोदिष्ट्याहतस्तेभगवन्यथामयः ॥ ५५ ॥ किंनराऊचुः ॥ वय
मीशकिंनरगणास्तवानुगादितिजेनविष्टिममुनानुकारिताः ॥ भवताहरेसवृजिनोवसादि
तोनरसिंहनाथविभवायनोभव ॥ ५६ ॥ विष्णुपार्षदाऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतंतेदृष्टं
नः ॥ शरणदसर्वलोकशर्म ॥ सोयंतेविधिकरईशविप्रशप्तस्तस्येदंनिधनमनुग्रहायविद्मः ॥ ५७

इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्ला

जेनविष्टिंनिर्मूल्यंकर्मअनुनिरंतरंकारिताः ॥ अतःपरंनःविभवाय
सम्पद्येभव ॥ ५६ ॥ नोस्माकंभक्तानांशरणद ॥ आश्रयप्रदसर्वेषांलोकानांशर्वमंगलरूपमेतदद्भुतं ॥ रूपमद्यैवदृष्टंनतुपूर्वंविधि

दचरितेनृसिंहावतारोनामाष्टमोध्यायः ॥ ८ ॥

कोविकिंकरः ॥ ५७ ॥ सर्वकलुषहाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न च मे ब्रह्मणा भीत्या चोदितो सुरबालकः ॥ कोपं प्रशमयन्त्सोऽन्यस्तं हमभीषणं ॥ १ ॥ उग्रोप्यनुग्रं एवायं स भक्तानां सकेशरी केशरी वस्त्र
पोता नामन्येषामुग्रविग्रहः ॥ २ ॥ इत्याद्यागमोक्तो भक्तानुकंपितनामाह ॥ एवमिति सप्तभिः ॥ एवं ब्रूरत एव स्थितास्तुवंतः मस्तुनासं ह

नारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः ॥ नोपैतुमशकन्मन्युसंरंभं सुदुरासदं ॥ १ ॥
साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं ॥ अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता ॥ २ ॥
प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके ॥ तात प्रशमयोपेहि स्वपित्र्ये कुपितं प्रभुं ॥ ३ ॥ तथे
ति शनकै राजन्महाभागवतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृतांजलिः ॥ ४ ॥ स्व
पादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ॥ उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं
कालाहिवित्रस्तधियां कृताभयं ॥ ५ ॥ ६

मन्यावेशो यस्य तं उपगंतुं नाशक्नुवन् ॥ १ ॥ महदद्भुतं रूपं दृष्ट्वा
शंकिता सती तं नोपजगाम अद्भुतत्वे हेतुः अदृष्टेति ॥ २ ॥ उपेहि उपगच्छ ॥ ३ ॥ ४ ॥ कालएवाहिस्तस्मात् वित्रस्ता धीर्येषां कृतमभयं
येन तत् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य करस्पर्शेन धुतं निरस्तम् अखिलम् अशुभं यस्य ॥ सपदि तत्क्षणमेव अभिव्यक्तं अपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य निर्वृ-
तः सन् हृदि दधौ हृष्यन्ती रोमांचिता तनुर्यस्य क्लिन्नमार्द्रं हृत् यस्य अश्रूणि लोचनयोर्यस्य परमपुरुषार्थं तत्पादध्यानं साधन-
ने: प्रध्य: ॥ ६ ॥ सुसमाहितस्त्वमेवाह ॥ तस्मिन्न्यस्तं हृदयमीक्षणं च येनेति ॥ ७ ॥ सकलेष्वसमस्तेषु जन्तुषु पामरतत्र ह्युच्ये
लेने:

स तत्कर[स्प]र्शधुताखिलाशुभ: सपद्यभिव्यक्तपरात्मदर्शन: ॥ तत्पादपद्मं हृदि निर्वृतो दधौ
हृष्यत्तनु: क्लिन्नहृदश्रुलोचन: ॥ ६ ॥ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहित: ॥ प्रेमग
द्गदया वाचा तन्न्यस्तहृद[...]येक्षण: ॥ ७ ॥ प्रल्हाद उवाच ॥ ब्रह्मादय: सुरगणा मुन
योऽथ सिद्धा: सत्त्वैकताननमतयो वचसां प्रवाहै: ॥ नाराधितुं पुरुगुणैरधुनापि पिप्रु: किं तोष्टु
(म)र्हति स मे हरिरुग्रजाते: ॥ ८ ॥ ॥

प्रल्हाद: स्तौति सत्त्यश्चेद्दुष्टत्वात् हरिं [...]ता हरिं ॥ तत्र तावदात्मनो भगवत्स्तुताव
नधिकारमिवाशंक्यासंभवायत्ना ह ॥ ब्रह्मादय इति पंचभि: ॥ मुनयो मननशीला: सिद्धा: ज्ञानिनोऽपि कथंभूता: सत्त्व एवैकस्मिंस्तानो विस्ता
रो यस्या: सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा पुरुभिर्बहुभिर्गुणैरपि यमाराधयितुं न पप्रुर्न पूर्णा न शक्ता इत्यर्थ:

सहिंसकयोनिजन्मत उग्रजाते: आसुरी जातिर्यस्य ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥४५॥

एवंहरिनोषणेस्वस्यायोग्यतामाशंक्यायोग्यतांसंपादयन्नाह॥मन्यइतिद्वाभ्यां अभिजनः सत्कुलेजन्मरूपंसौंदर्यंश्रुतंपांडित्यंओ
जः इंद्रियनैपुण्यंतेजःकांतिःप्रभावःप्रतापःपौरुषमुद्यमः॥बुद्धिःप्रज्ञायोगोऽष्टांगः एतेधनाद्योद्वादशापिगुणाः॥परमस्य
पुंसः आराधनायनभवंतिहियतःकेवलयाभक्त्यैवसतुगजेंद्रायतुतोषतु॥९॥ एवंभक्त्यैवकेवलहरेस्तोषःसंभवतीत्युक्त्वे
दानींभक्तिंविनानान्यत्किंचित्तत्तोषहेतुरित्याह॥विप्रादितिपूर्वोक्ताधनाद्याद्विषड्द्वादशगुणास्तैर्युक्तात्विप्रात्स्वप

मन्येतनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुधियोगाः॥नाराधनायहिभवंति
परस्यपुंसोभक्त्यातुतोषभगवान्गजयूथपाय॥९॥विप्राद्द्विषड्गुणयुतादरविंदनाभपा
दारविंदविमुखाच्छ्वपचंवरिष्ठं॥मन्येतदर्पितमनोवचनेहितार्थप्राणंपुनातिसकुलंनतु
भूरिमानः॥१०॥

चंवरिष्ठंमन्ये॥षड्द्वा॥सनत्सुजातोक्ताद्वादशधर्मादयोगुणाद्रष्टव्याः॥तदुक्तं॥ज्ञानंचसत्यंदमःश्रुतंचह्य
मात्सर्यंह्रीस्तितिक्षानसूया॥यज्ञश्चदानंचधृतिःशमश्चमहाव्रताद्वादशब्राह्मणस्येतिकथंभूतात्विप्रात्अरविंदनाभस्यपा
दारविंदाद्विमुखात्कथंभूतंश्वपचंतस्मिन्अरविंदनाभेअर्पितामनआदयोयेनतंईहितंकर्मवरिष्ठत्वेहेतुः॥सएवंभूतःश्वपचः
सर्वंकुलंपुनातिभूरिमानोगर्वोयस्यसंतुविप्रआत्मानमपिपुनातिकुतःकुलंयतोभक्तिहीनस्येतेगुणागर्वायैवभवंतिनतुशुद्धये॥अ

नोहिमिवइदिभावः॥१०॥

राम
॥४५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि किं धनाद्यर्थ्यं सोन सन्मानं प्राकृतनरवद्भगवानपेक्षते नेत्यत्राह करुणः कृपालुः अतो वृणीते च तत्र हेतुः यद्यदिति यं यं मानं यद्यदस्मा
त् यद्येन धनादिना भगवते मानं विदधीत तद्देवात्मनो मन्ये भवति नान्यत् ॥ यथा मुखे कृते व तिलकादि श्रीः शोभा प्रतिबिंबस्य भवति न
तु साक्षात्तस्यैक कर्तुं शक्यते ॥ तद्वत् ॥ ११ ॥ यस्मात्त्वं भगवान्भक्तैर्व तुष्यति तस्मादहं नीचोऽपि विगतविल्कवः गतशंकः सन् ईश्वरस्य

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनाद्विदुषः करुणो वृणीते ॥ यद्यज्जनो भगवते विदधीत
मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ ११ ॥ तस्मादहं विगतविल्कव ईश्वरस्य सर्वात्मनो महि
गृणामि यथा मनीषं ॥ नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥ १२ ॥

महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणानुवर्णयामि अजानतोऽपि स्तुतिकरणे हेतुमाह ॥ येनैव महिम्ना अनुवर्णितेन अविद्यया संसा
रमनुप्रविष्टः पुमान् पूयेत शुद्ध्यति तत्र हि अन्यस्य तथा शोधकस्याभावादित्यर्थः ॥ १२ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥
॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥४६॥

तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं स्तुवन्कोपोपसंहारं प्रार्थयन्नेतत्तवैव हानिर्ह्यस्मा॥ भो ईश अमी उद्विजंतो बिभ्यतः तवैव ब्रह्मादयः
सत्वमूर्तेस्तव विधिकिंकराः॥ खलियोगकर्तारो भक्ता एव नान्यैन वयमसुरा इव वैरभावेनैते भक्ताः किंतु अवतारचिरैस्तव नाटैर्विविधं क्रीडनं
अस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय॥१३॥ न त्वस्मादेषामभयपरिहाराय मन्युं यच्छ उपसंहर यद्यर्थेऽयं मन्युः सचासुरः साधु हतो
संतोषार्थे अद्य हतः अतः परं न क्रोधेन कार्याभावान्नियच्छ न नन्वस्यैषां वधेन साधुः किं मोदेत तत्राह॥ वृश्चिकादेः परोपद्रवकारिणोऽस्य तत एव

सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः॥ क्षेमाय भूतय उतात्मसुखाय
चास्य विक्रीडितं भगवतो रुचिरावतारैः॥१३॥ तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृ
श्चिकसर्पहत्या॥ लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मरंति॥१४॥

जातायां हस्यायावधेन न तस्यैव तत्र द्वंद्वं जानमिति साधुरपि मोदेतैव तर्हि बहूनां सुखावहत्वाद स्मं क्रोधं न त्यजामीति चेत् तत्राह लोकाश्च निर्वृ
तिं इताः प्राप्ताः संतः क्रोधोपसंहारं प्रतीक्षंते तर्हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत् तत्राह॥ रूपमिति विभयाय भयनिवृत्त्यै
एतद्रूपस्मरणादेव भयनिवृत्ते नैनं मन्युधारणे न कृत्यमस्तीत्यर्थः॥१४॥ छ ॥ श्रीकृष्णः ॥ छ

राम
॥४६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं चेद्विभेषि तर्हि स्वजामीति चेन्नत्राह नाहमिति हे अजित ते अस्माद्रूपात् अहं न विभेमीति ॥ कथंभूतात् आस्यं च जिह्वा च अर्कवत् दृशौ ने
त्राणि च भ्रकुटीनां रभसः आटोपश्च उग्रा दंष्ट्राश्च एतानि अतिभयानि यस्मिन् तत् अंत्रस्रक् यस्मात् क्षतजाक्ताः केसराः यस्मिन् शंकु
वदुन्नतौ कर्णौ स्तब्धौ यस्मिन् तत् तत्तस्मात् निर्ह्रादेन भीता दिग्गिभा यस्मात् अरीन् भिंदंती त्यरिभिदि नखानि नखाग्राणि यस्मिन् ॥ ए

नाहं विभेम्यजित तेतिभयानकास्यजिह्वार्कनेत्रभ्रकुटीरभसोग्रदंष्ट्रात् ॥ आंत्रस्रजःक्षतजके
सरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥ त्रस्तोस्म्यहं कृपणवत्सल दुःस
होग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः ॥ बद्धः स्वकर्मभिरुशत्तम तेंघ्रिमूलं प्रीतोपवर्गशरणं
ह्वयसे कदा नु ॥ १६ ॥

वंभूताद्धि ते रूपादहं न विभेमीति ॥ १५ ॥ महद्भयं खल्वन्यदस्तीत्याह त्रस्तोऽस्मीति दुःसहं यदुग्रं
संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन् प्रणीतः निक्षिप्तोस्मि ॥ हे कृपणवत्सल
हे उशत्तम कदा नु त्वं प्रीतः सन् अपवर्गभूतं शरणं तवांघ्रिकमलं प्रति मामाह्वयसे ॥ मामाह्वास्यसि ॥ १६ ॥ ॥ छ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा.स.
॥४७॥

दास्ये सति मन्मुक्तिरिति चेत् नहि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात्॥ त्वमेव तदुपदिशेति प्रार्थयते॥ यस्मादिति प्रियैरप्रियै
श्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोस्मि दुःखस्य प्रतीकारः कार्य्य इति तेन तत्राह दुः
खस्यौषधं प्रतिकारः तदपि दुःखमेव एवमपि अतद्धिया देहाद्यभिमानेन मुह्यामि अतः॥ हे भूमन् विभो तव दास्यरूपं योगं नि
रूपाय वद॥१७॥ ननु दास्ययोगे प्रवृत्तस्यापि तदन्तरायभूतानां सर्वेषां नानानानादुःखानां कुतः परिहारस्तत्राह सोहं तदा स

यस्मात्प्रियाप्रियवियोगसयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः॥ दुःखौषधं त
दपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगं॥१७॥ सोहं प्रियस्य सुहृदः प
रदेवताया लीलाकथास्तव नृसिंह विरिंचगीताः॥ अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तो

नृसिंह तव लीलाकथा अनुगृणन् दुर्गाणि महान्ति दुःखान्यंजसा अतितर्मि तरामि न (दुर्गाणि ते पदयुगलहंससंगः॥१८॥
गणयिष्यामीत्यर्थः तत्र हेतुः॥ गुणै रागादिभिर्विप्रमुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां त एव हंसा ज्ञानि
नः तैः संगो यस्य मम सोहं कथंभूतस्य कथास्तत्राह॥ प्रियस्येत्यादि कुतो ज्ञाताः विरिंचेन गीताः तत्संप्रदायप्रवृत्ताः तथा चाथर्व
णी श्रुतिः॥ देवा ह वै प्रजापतिमब्रुवन् इत्यादि प्रवृत्तस्य भगवदनुग्रहेण तत्संगः ततो वीतरागतया भगवद्गुणानुवर्णनं॥ ततश्च दुःखान्
निमग्नः स्वान्तस्तितर्म्यहं॥१८॥ ॥

राम
॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु दुःखे नष्टस्य तत्प्रतीकारो लोके प्रसिद्ध एव किमद्यासादिना तत्राह ॥ बालस्येति भो नृसिंह तप्तस्य तत्प्रतिविधिः दुःखस्य प्रतीकारः
इह लोके यो जसाद्रष्टः सत्त्वयोपेक्षितानां तावदेव स्वरणमात्रमेव न त्वात्यंतिकः न देवाह बालस्य पितरौ शरणं रक्षकौ विहनभवतः नाप्यु
पाल्यमानस्यापि तस्य दुःखदर्शनात् क्वचिदजीर्णज्वरादिषु ताभ्यामेव तद्धदर्शनाच्च न वार्त्तस्य रोगिणः अगदमौषधं शरणं ॥ कृतेप्यौषधेम

बालस्य नेह शरणं पितरौ नृसिंह नार्त्तस्य चागदमुदन्वति मज्जतो नौः ॥ तप्तस्य तत्प्रतिविधिर्य इहांज
सेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानां ॥ १९ ॥ यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथाय
दुत यस्त्वपरः परो वा ॥ भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपं ॥ २० ॥

स्य दर्शनात् न च उदन्वति समुद्रे मज्जतः पुंसो नौः शरणं नया सह मज्जनदर्शनात् समुद्रे अगस्त्यमेव शरणमित्यर्थः अथ चैवं काक्वा व्याख्या यन्ते
नतप्तस्य तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वदुपेक्षितानां किमंजसेष्टः अपि तु नेष्ट एव ॥ यद्वा ॥ यस्तावदिह प्रतिविधिरिष्टः ॥ स किमंज
सा नैवांजसेत्यादि योज्यं बालस्येत्यादिनाष्टैव देव ॥ १९ ॥ ननु कश्चित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोपि दृश्यत एवास्याशंक्यान्तत्रा
पि तद्रूपेणाप्यमेव रक्षक इत्युररीकृत्य तस्यैव सर्वात्मतामाह ॥ यस्मिन्निति अपरो अर्वाचीनः पित्रादिः परो ब्रह्मादिर्भावः कर्त्ता तत्तत्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰ ॥४८॥

रकैर्यद्यत्करोति तत्सर्वं भवानेव स्वरूपेण पृथक्कृ यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन्काले येन कारणेन येन हेतुकर्त्रीत्वं चोदितः स्वयं स्वं
वधि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सितं तत् मयः कर्त्तेत्येवं सप्तविभक्त्यर्थाः ॥ यथा येन प्रकारेणेति क्रियाविशेषेण भूतानामव्यया न
मर्थाः पृथक्स्वभावः सत्वादिप्रकृतिः करोति उत्पादयति ॥ विकरोति रूपान्तरं नयतीति ॥२०॥ अतोऽन्यस्य स्वरक्षकस्याभावात् संसारी त्वा
मनिसमुक्तस्त्वमेव नाशरणागतं रक्षेति प्रार्थयते ॥ मायेति द्वाभ्यां त्वदंशस्य पुंसो अनुमतेनेक्षणरूपेणानुग्रहेण मनःप्रधानं लिंगं

मायामनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ॥ छंदोमयं यदजयार्पित
षोडशारं संसारचक्रमज कोतितरेत्वदन्यः ॥२१॥ ॥ ॥७॥ ॥ ॥७॥ ॥

मायासृजति कर्थभूता कालेन चोदिताः क्षोभिताः गुणाः यस्याः कथंभूतं मनः कर्ममयं कुर्वद्रूपं ॥ बलीयः दुर्जयं छंदोमयं वेदोक्तक
र्मप्रधानं च ॥ अजया जीवस्याविद्यया तद्भोगार्थं अर्पिताः षोडश अरा यस्मिन् यद्वा एवंभूतं संसारचक्रात्मकं मनः तत्कोतितरेत् ॥ भो अ
ज त्वदन्य ॥ त्वत्तः पद्यात्वामभजन्तिस्वर्थ्यः ॥२१॥ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ७ ७

राम ॥४८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुममापिमायासंबंधात्कर्तृत्वाद्यविशेषाच्चत्वत्तःकोविशेषइत्यतआह सत्वंइतिस्वधाम्नाचिच्छक्त्यानित्यंविजिताआत्मनोबुद्धेर्गुणायेन
सहित्वंतत्रयतः कालः मायाप्रेरकः॥ अतएववशीकृताविसृज्यानांकार्याणांसाधनानांचशक्तिर्येनअतइक्षुदंडवन्निष्पीड्यमानंमांउ
पकर्षस्वसमीपंनय॥२२॥ ननुलोकपालानांभोगान्भुंक्ष्वपिअथवाराज्यमिदंहास्यामिकिमितिसंसारादुद्विजसेतत्राहदृष्टाइतित्रिभिः॥

सत्वंहिनित्यविजितात्मगुणः स्वधाम्नाकालोवशीकृतविसृज्यविसर्गशक्तिः॥ चक्रेविसृष्टमजयेश्वरषोडशारेनिःपीड्यमानमुपकर्षविभोप्रपन्नं॥२२॥ दृष्टामयादिविविभोखिलधिष्ण्यपानामायुः। श्रियोविभवइच्छतियान्जनोयं॥ येस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फूर्जितेनलुलिताःसतुतेनिरस्तः॥२३॥ तस्मादमूस्तनुभृतामहमाशिषोज्ञआयुः श्रियोविविभवमैंद्रियमाविरिंच्यात् नेच्छामितेविलुलितानुरुविक्रमेणकालात्मनोपनयमांनिजभृत्यपार्श्वं॥२४॥ ॥ ॥छ॥

यः संपदः विभवउद्भवः आयुरादयोदृष्टाइतिकाक्वातुच्छत्वमुक्तं॥ नदेवा॥ येअस्मत्पितुःकोपहासविकृतभ्रूभंगमात्रेणविध्वस्ताःस
तुत्वयानिरस्तः॥२३॥ यस्मादेवंतस्मात्आशिषः भोगान्तत्ः तत्परिपाकंविद्वान्॥ अहंऐंद्रियंइंद्रियैर्भोग्यंब्रह्मणोभोगमभिव्याप्यकिम
पिनेच्छामि॥ तेकालात्मनाउरुविक्रमेणविलुलितान्विध्वस्तानणिमादीनपि॥२४॥ ॥ ॥छ॥ ॥ ॥छ॥

किंच वर्त्तमानकालेपि न भोगा हा इत्याह ॥ कुत्रेति ॥ श्रुतिः सुखश्रवणं तदेव सुखं यासां ताः मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः क्व अशेषाणां रुजां रो
गाणां विरोहः ॥ उद्भवस्थानं क्व चेदं कलेवरं एवं चेत्सर्वोपि जनः किं न विरज्यते अत आह यद्यपि यद्यपि इति एवं विद्वानयं जनस्तथापि न निर्वि
द्यते विरक्तो न भवति ॥ कुतः कामं एवानलः तं मधुलवैः सुखलवैः दुःसाध्यैरपि शमयन् कामाग्निं शमयन्नप्यग्रस निर्वेदः प्यकाशेना

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ॥ निर्विद्यते न तु जनो यद
पीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः ॥२५॥ क्वाहं रजःप्रभव ईश तमोधिकेस्मि
न्जातः सुरेतरकुले क्व तवानुकंपा ॥ न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेर्पितः शिरसि पद्म
करः प्रसादः ॥२६॥ ॥ ॥ ७ ॥ ॥

स्तीत्यर्थः ॥ यद्वा ॥ अचिंत्यं त्वत्माययाचेष्टितमिति भावः ॥२५॥ नहि त्वं कथं नातिविरक्तोसि जन हेपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह
क्वाहमिति रजसैव प्रभवो जन्म यस्य सः स तमेपि तत्र वा कुलविशेषणं ॥ तमोधिकं यस्मिन्तस्मिन्न सुराणां कुले जातो हं क्व क्व तवानुकंपा नामे
वाह ॥ ब्रह्मादीनां शिरसि यो नैवार्पितः स पद्मवत्सकलसंतापहरः प्रसादः पुरुषार्थरूपो मे शिरस्यर्पित इति यत् ॥ यत्तयानुकंपये
त्यिवा ॥२६॥

राम
॥४९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नघत्वयीदमतिचित्रमित्याह ॥ नैषेति ॥ एतेब्रह्मादयोऽनन्यामा अयमसुरोनीचइत्येषापरावरमतिः जंतोः प्राकृतस्ययथाभवतोनैवस्यात् ॥ अत्रहेतुः । ज
गतः आत्मनः सुहृदस्तवतर्हिसर्वत्रसमस्यसादृएकरूपश्चकिंनस्यात्तत्राह संसेवयातवप्रसादोभवतितत्रचसेवानुरूपंनत्विच्छानुसारेणधर्मादी
नामुदयोभवति ॥ एवंसत्यपिवैषम्याभावेदृष्टांतः ॥ सुरतरुर्यथासेवकस्यैवफलंददातिनचविषमः तंचपरावरत्वंअत्रकारणमितिशेषः ॥ २७ ॥
एतंचस्वबुद्ध्याकृपयामयाप्राप्तमितित्वद्भक्तस्यपार्श्वमेवमानयेत्साशयेनाह ॥ एवमितियथात्वयानुकंपितोस्मिएवंनारदेनाप्यसात्कृत्वापूर्वं

नैषापरावरमतिर्भवतोननुस्याज्जंतोर्यथाऽऽत्मसुहृदोजगतस्तथापिसंसेवयासुरतरोरिवतेप्रसादः
सेवानुरूपमुदयोनपरावरत्वं ॥ २६ ॥ एवंजनंनिपतितंप्रभवाहिकूपेकामाभिकाममनुयःप्रपत
न्प्रसंगात्कृत्वात्मसात्सुरर्षिणाभगवन्गृहीतः सोहंकथंनुविसृजेतवभृत्यसेवां ॥ २७ ॥ ॥

मनुगृहीतः सोहंकथंनुत्वद्भक्तस्यसेवांविसृजामि ॥ कथंभूतोनुगृहीतोस्मिप्रभवएवाहिःसुक्तः कूपस्तस्मिन्कामाननुमितः कामायमानंज
न नंजनंनिपतितमनुतंप्रसंगात्प्रपतन्योहं ॥ नदेवंत्वद्भक्तस्यश्रीनारदस्यानुग्रहेणत्वयाजैस्संनमनुकंपितोऽस्मिअयमेवचपरमोऽनुग्रहः
नुपुनरिदंमन्निनुच्छंमत्प्राणारक्षणादि ॥ २८ ॥ ॥ ॥ श्री० ७ श्री० ॥ ॥ ७ ॥ ॥ श्रीगोविंदायनमः ॥ ॥ ७

भा॰ स॰ ॥५०॥

नचेदं त्वयामदनुग्रहार्थं कृतं किंतु त्वन्यार्थमपीत्याह ॥ भो अनंत पदेन मत्प्राणरक्षणं मा हंतुमुद्यतस्य मम पितुर्वधश्च तदुभयं स्वभृत्यऋषिवाक्
यमृतं विधातुमित्यहं मन्ये कुतः यद्यस्मात् ॥ असत् अयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत् किं मदपरो मद्व्यतिरिक्तश्चेत् ईश्वरोऽस्ति तर्हि त्वामित
नी अवतु रक्षतु तव कं शिरो हरामि इति पाठांतरेऽप्ययमेवार्थः ॥ यद्यदा अवोचत् तदा मत्प्राणरक्षणमिति वान्वयः ॥ एतच्च स्वभृत्यं विधातुं निजभृत्य
भाषितमित्यत्रैव वक्तव्याख्यातं ॥२९॥ नचेदं पक्षपातेन रक्षसां दैत्यहननं च त्वयि संभाविकं ॥ किंतु मायागुणोपाधिकं सर्वालौकिकं त्वयि संभ

मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं ॥ खड्गं प्रगृह्य यदवोचदस
द्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥२९॥ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः
पृथगवस्यसि मध्यतश्च ॥ सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥३०॥

तद्द्वेष्याणादित्याह ॥ एक इति ॥ एतज्जगत्त्वमेवैकः ॥ पद्यतः ॥ अमुष्याद्यंते च पृथगवस्यसि विरामं करोषि सन्मात्रतया कारणत्वेनाव
धित्वेन च वर्तस इत्यर्थः ॥ अतो मध्यतश्च त्वमेव वक्तुं न शक्यं हि भेदप्रतीतिस्तत्राह ॥ निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्र
विष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव रक्षक इव हंतेव च अवसितः ॥ नतु कर्तृत्वं स्वधोपक्रमे निर्गुणोपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ॥ स्वमा
यागुणानाविश्य बाध्यबाधकतां गत इत्यादि ॥३०॥ ॥

राम ॥५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतु यद्येव ज्जगदहमेव तर्हि जगतो वैषम्येणाम मवैषम्यमपि किं न स्यादित्यत आह त्वं वै त्वमेव इदं सद सत् कार्य्यकारणात्मकं जगत् ॥ न तु त्वत्तः पृथ
क् भवांस्तु ततोऽन्यः आद्यंतयोः पृथगवस्थानात् यस्मादेवं अतो यमात्मीयोऽयं पर इतिया बुद्धिः सा अपार्थैव मायैव ॥ कार्यकारणाभेदं दृष्टांतेन
साधयति ॥ यद्यत: ॥ यस्य जन्म ईक्षणं यस्मिन्निधनं च स्थितिश्च तत् हेतेदेव अष्टि बीजं कारणं तरु: कार्यं तयोर्यथा वसुकालमात्रत्वं अयमर्थः
कालशब्देन नीलत्वासाधारणगुणयोगात् पृथ्वी वसुशब्देन वसुमात्रं मृत्तरुस्तंतत्र तरो यथा पृथ्वीमयबीजमात्रत्वं तस्य च यथा मृत्तरुस्तम्मा
त्रत्वं एवं सर्वमपि कार्य्यकारणात्मकं जगत्परमकारणात्मकमेवेति ॥ तथा च पारमर्षसूत्रं ॥ तदनन्यत्वमारंभणशब्दादिभ्य इति श्रुतिश्च वाचारंभ

त्वं वा इदं सदसदीश भवांस्ततोन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ॥ यद्यस्य जन्म निधनं स्थितिरीक्ष
णं च तद्वैतदेव वसुकालवदष्टितर्वो: ॥ ३१ ॥ न्यस्येदमात्मनि जगद्विलयांबुमध्ये शेषेत्मना निजसुखानु
भवो निरीहः ॥ योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ॥ ३२ ॥

णं विकारो नामधेयं मृत्तिकेत्येव सत्यं ॥ ३१ ॥ तत्र तावदंते पृथगवस्थानं दर्शयति ॥ न्यस्येति ॥ इदं जगत् आत्मना आत्मना आत्मेवात्मनि निक्षिप्य त्वमु
खानुभवन्निष्क्रियः सन् प्रलयोदकमध्ये शयनं करोषि न तर्हि किं जीववत् स्वपिति ॥ ममापि तमोवृत्तिरूपा निद्रास्तीति नहि न हि योग एव तु बहिर्दृष्टेः समावसाम्यसि
द्रो व्यक्ते इत्याह योगेन निमीलिते दृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुर्य्ये अवस्थात्रयातिरिक्ते स्वरूपे स्थितः त्वं न तु सुषुप्त
इवात्मनानमो सुषुप्तेन यो न स्पृशसि न पश्यसि नजाग्रत्स्वप्नयोरिव गुणान्विषयांश्च स्पृशसि ॥ ३२ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स्क॰
३
॥५२॥

इदानीं कारणत्वेनादावपि दृष्टमवस्थां दर्शयन्नध्यात्मस्वत्वमेवेत्येतत्प्रपंचयन्निवर्तुमिः यस्त्वमंभसि शेषे तस्यैव ते इदं जगत् वपुः स्वरूपं नान्यस्य यत
स्त्वमध्यनोपितस्य ॥ कथंभूतं तस्य निजया कालशक्त्या संचोदिताः प्रकृतेर्धर्माः सत्वादयो येन स्वरूपे हेतुः ॥ अनंतशयनात् शेषपर्यंकात् विरमत्स
माधिर्यस्य तव नाभेः सकाशात् स्वकणिकावोदकेन महाब्जं लोकपद्मं अभूत् तत्कथंभूतं आत्मनि चप्पेव गूढं सत् स्वकणिकात ः सूक्ष्माद्धृष्टबीजान्महावटइव
२३॥ नटे वैकारणत्वेनानुगतः सन्मध्यात्मस्वत्वमेव व्यतेस इत्युक्तं एतदेव ब्रह्मस्त्वस्य ब्रह्मणोनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह ॥ तत्सं

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढं ॥ अंभस्यनंतशयनाद्विरमत्स
माधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं ॥ २३ ॥ तत्संभवः कविरतोन्यदपश्यमानस्त्वां बीजमात्म
नि ततं ॥ स्वबहिर्विचिंत्य नाविंदद्ब्दशतमप्सु निमज्जमानो जातेंकुरे कथमुहोपलभेत बीजं ॥ २४ ॥
स त्वात्मयोनिरतिविस्मित आस्थितोब्जं कालेन तीव्रतपसा परिशुद्धभावः ॥ त्वामात्मनीश भुवि गंध

तत्संभवो यस्य सः कविर्ब्रह्मा अतः पद्मादन्यदपश्यन् बीजं उपादानकारणभूतं त्वां मिवातिसूक्ष्मं भूतेंद्रियाशयमये विततं ददर्श
तस्मिन्नात्मा तं ततमपि नाविंदत ॥ युक्तं चैतत् ॥ उहे अंकुरे जाते सति बीजं तदनुगतं कारणं दृष्टयक् कथं नाम पुमानुपलभेत ॥ २४ ॥ भवदुपासनयानु
स्वस्मिन्नेव दृष्टवानित्याह स त्विति पराद्दृष्ट्याब्जं आस्थितः सन् तीव्रेण तदनुपरतध्यानेन तत्सन्मात्ररूपेणोपादानतया दर्शनमुक्तं ॥ २५ ॥।

राम
॥५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरत्वेन च दृष्ट्वा कृतार्थोऽभवदित्याह ॥ एवं अनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धं ॥ मायामयं मायाप्रधानं सत्ताप्रपंचेनोप
लक्षितः सन्निवेशः पादादिरचना यस्य ॥३६॥ तदा भवांस्तस्यानुग्रहं कृतवानित्याह ॥ तस्मादिति ॥ हयग्रीवमूर्त्तिं बिभ्रत्सन् रजस्तमोरूपौ मधु
कैटभाख्यौ हत्वा तस्मै श्रुतिगणान्समर्पितवान् ॥ तत्र हेतुः सत्वमिति ॥३७॥ एके स्त्वमित्यादिभिरष्टाभिः श्लोकैर्यदुक्तं तत्पालनेन रक्षणं तु
द्विपक्षवधश्च सत्वोपाधिको न तु स्वतः इति तदुपसंहरति इत्थमिति विभावयसि पालयसि हंसि घातयसि कलौ तु तन्न करोषि यतस्तदा त्वं

एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं ॥ मायामयं सदुपलक्षितसन्निवेशं दृ
ष्ट्वा महापुरुषमाप मुदं विरिंचः ॥३६॥ तस्मै भवान् हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ म
धुकैटभाख्यौ ॥ हत्वानयच्छ्रुतिगणांस्तु रजस्तमश्च सत्वं तव प्रियतमां तनुमामनंति ॥३७॥ इत्थं
नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् ॥ धर्मं महापुरुष पासि यु
गानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोथ सत्वं ॥३८॥ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरित

छन्नोऽभवः त्रिष्वपि च युगेष्वाविर्भावात्स एवंभूतस्त्वं त्रियुग इति प्रसि दुष्टमसाधु तीव्रं ॥ कामातुरं हर्षशोकभयैषणार्तं तस्मि
द्धः ॥३८॥ तदेवं भगवतस्तत्वं निरूप्य स्वस्य च तद्विचारायोग्यतां निवेदयन्प्रार्थयते ॥ नैतदिति त्रिभिः असाधु बहिर्मुखं तीव्रं दुर्द्धर्षं हर्षशोकभयैष
णात्रयेणार्त्तं दुःखितमपि त्वत्कथासु न संप्रीयते ॥ तस्मिन्नेवंभूते मनसि सति कथं तव तत्वं विचारयामि ॥३९॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰
॥४२॥

किंच जिह्वा अवितृप्तासती भो अच्युत मामां यतो मधुरादिरसस्तज आकर्षति उदरं तु क्षुधा नतं सद्य एव किं चिदाहारमात्रे प्रति चपला हृक् चक्षुः कर्म
शक्तिः कर्मेंद्रियाणि लुनंति त्रोटयंति ॥५०॥ न केवलमहमेक एवं कष्टां दशामापन्नः किंतु महाजनोप्येवमेव क्लिश्यति अतः सर्वजनं पालयेति
प्रार्थयते ॥ एवमिति संसारएव वैतरणीयमद्वारनदी तस्यां अन्योन्यतो यानि जन्मादीनि तेभ्यो निमीनं तेषां परेषां च विग्रहे यथायथं वैरं मैत्रं
च यस्य एवं मूढं जनं पश्यन् त्वं हे या स्वर तस्याः पारे स्थित नित्यमुक्त हे तेनानिओ होकष्टमित्येव मनुकंप्याहपपीहि वैतरणी मुन्नायपालय ॥५१॥

जिह्वैकतोच्युत विकर्षति मावितृप्ता शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोन्यतश्चपलदृक्
क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ॥५०॥ एवं स्वकर्मपतितं भववैतरण्यामन्यो
न्यजन्ममरणाशनभीतभीतं ॥ पश्यन् जनं स्वपरविग्रहवैरमैत्रं हंतेति पारचर पीपृहि मूढमद्य
॥५१॥ को न्वत्र तेखिलगुरो भगवन्प्रयास उत्तारणेस्य भवसंभवलोपहेतोः ॥ मूढेषु वै महदनुग्रह

एकेन मया कथं सर्वो जनस्तारणीय इति चेत्तत्राह ॥ कोन्विति ॥ को नु ने (मार्तबंधो किं तेन ते प्रियजनाननुसेवतां नः ॥५२॥
अत्र सर्वजनोत्तारणे प्रयासः ॥ न कोपि कुतः अस्य विश्वस्य भवसंभवलोपानां उत्पत्तिस्थितिसंहाराणां हेतोः ॥ किमेतत् दुष्करमिति भावः उचितं चै
तदित्याह ॥ मूढेष्विति ॥ त्वां च त्वदीयांश्च तारयिष्यामि ॥ इमं तु राग्रहं माकुर्या इति चेत्तत्राह नवयं प्रियजनाः भक्ताः तान् अनुसेवमानानां नो अस्माकं
तेन उत्तारणेन किं ॥ को नि प्रयासो सुरबालकाहरेः को न्वत्र ते खिलगुरो भगवन्प्रयासः ॥ प्रल्हाद इत्युपमंत्र्य मिथो नराणामीशेन सख्यमकरोद्दयनीय

रम
॥५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्सप्रल्हाद त्वं तावत्तरिष्यसि तावत्तारयिष्यामि तावन्नैव तत्कार्थः स्याः किमनेन नमि॥ बंधेनेत्यत आह॥ नैवेति हे पर सर्वोत्तम त्वद्वीर्यगायनमेव महानमृतं तत्र मग्नं चि
त्तं यस्य सोऽहं भववैतरण्याः नैवोद्विजे किंतु विमूढान् शोचामि तानेवाह॥ ततोन्वहामि ततो विमुखं चेतो येषां तेषां प्रस्तुत इंद्रियार्थनिमित्तं यन्माया
सुखं तन्दर्थं भरं कुटुंबादिभारमुद्वहतः॥ ४३॥ त्वं तावन्मुक्तिं परिहाण मांस्तु न तत्वज्ञा मुनय उपदेक्ष्यंतीति चेत्तत्राह॥ प्रायासोतिन स्वविमुक्षे विमुक्तिं
नेच्छामि तर्हि स्वंकमपि प्रार्थयत मामेव किमिति निर्बंधासीति चेदत आह॥ त्वत्तोन्यमस्य जनस्य शरणं न पश्यामि॥ ४४॥ ननु ते स्त्रीसंभोगा

नैवोद्विजेपर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः॥ शोचे ततो विमुखचेतस इंद्रि
यार्थमायासुखाय भरमुद्वहतो विमूढान्॥ ४३॥ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति
विजने न परार्थनिष्ठाः॥ नैतान्विहाय कृपणान्विमुमुक्षुरेको नान्यं त्वदस्य शरणं भ्रमतोनुप
श्ये॥ ४४॥ यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखं॥ तृप्यंति नेह कृ

दिना सुखिन एव न कृपणास्तत्राह॥ यदिति॥ करयोः कंडूय पणाः बहुदुःखभाजः कंडूतिवन्मानसिजं विषहेत धीरः॥ ४५॥
नेन संघर्षणेनेव दुःखमनु दुःखमनु दुःखं यस्मिन्॥ तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरन्तत्राह॥ कृपणाः कामुकाः बहुदुःखभाजोपि इह ग्र
हमेधिसुखेन तृप्यंति अलमिति न मन्यंते॥ कंडूमिव तत्कामस्य दुःसहत्वात्तन्न तु केचित् कंडूतिमपि सहते कामं चेत्यत्राह त्वत्प्रसादात्तु कश्चिद्धीर एव मनसि
जं कामं विषहेत न तु सर्वे अत्रापि कंडूतिवदिति दृष्टांतः॥ ४५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु मौनादिभिर्मोक्षसाधनैः सुलभैव मुक्तिः तत्राह मौनानि हे पुरुष अंतर्यामिन् नूनं ये मौनादयो दश आपवर्ग्याः अपवर्गहेतवः प्रसिद्धाः रहः विविक्तवा
सः ते तु प्रायशः अजितेंद्रियाणां इंद्रियभोगाय अर्थार्थं विक्रीणानां वार्त्ताः जीवनोपाया भवंति ॥ दांभिकानां वार्त्ता अपि भवंति वा न वा दंभस्यानिय
तफलत्वात् ॥४६॥ एवं ज्ञानं तु भक्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह ॥ रूपे इति त्रिभिः ॥ बीजांकुराविव प्रवाहापन्ने इमे सदसती कार्यका

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः परं पुरुष ते त्वजितेंद्रि
याणां वार्त्ता भवंत्युत न वात्र तु दांभिकानां ॥४६॥ रूपे इमे सदसती तव वेदसृष्टे बीजांकुराविव न
चान्यदरूपकस्य ॥ युक्ताः समक्षमुभयत्र विचिन्वते ॥ त्वां योगेन वन्हिमिव दारुषु नान्यतः स्या
त् ॥४७॥

रणे एवं ते रूपे उपलक्षणम् ते वेदेन सृष्टे प्रकाशिते न चान्यत् तत्स्वसमेतं गौरत्वादिकमिव देववदन्नादेः कुतः अरूपकस्य प्राकृतरूपा
दिरहितस्यास्य अतः युक्ताः संयताः एवं भक्तियोगेन प्रत्यक्षं त्वामुभयत्र कार्यकारणे वानुगतं पश्यंति ॥ मथनेन दारुषु वन्हिमिव नान्यतः स्यात् ज्ञान
मिति शेषः ॥ यद्वा ज्ञानप्रकारमेवाह ॥ एतदुभयतः प्रधानपरमाण्वादेर्भस्रात् ॥ सऐक्षतेत्यादिश्रुतिः ॥ अतस्त्वमेव कारणत्वात्सर्वत्रानुस्यू
त इति ॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदेवाह ॥ खंवायुरितिहृदयंमनः चित्‌चित्तं अनुग्रहः ॥ अहंकारदेवतावर्गोवासगुणाः स्थूलः विगुणाः सूक्ष्मः मनश्चवचश्चमनोवचः ॥ तेनयदुक्तंप्रकारि
तेकिमपित्वत्तोन्यन्नास्ति ॥ ४८ ॥ अभक्तास्तुत्वस्मिन्ननुगतमपित्वांनजानंतीत्याहनेतिनैतेगुणाद्यभिमानिनोदेवाः आद्यंतवंतः जडोपाधित्वात् अ
नाद्यंतंनिरुपाधिंत्वांनविंदंति ॥ हियस्मात्सुधियोविद्वांसः एवंविचार्यशब्दात् अध्ययनादिव्यापारादुपरमंतित्वामेवसमाधिनोपासतेइत्य
र्थः ॥ तथाचश्रुतिः किमर्थवयमध्येष्यामहे किमर्थवयंयक्ष्यामहइति ॥ नानुध्यायात् ॥ बहूनशब्दान्वाचोविग्लापनंहितत् ॥ इतिच ॥ स्मृतिश्च ॥ प

खंवायुरग्निरवनिर्विषयस्तुमात्राःप्राणेंद्रियाणिहृदयंचिदनुग्रहश्च ॥ सर्वंत्वमेवसगुणोविगुणश्च
भूमन्नान्यत्त्वदस्त्यपिमनोवचसानिरुक्तं ॥ ४८ ॥ नैतेगुणानगुणिनोमहदादयोयेसर्वेमनःप्रमु
खाःसहदेवमर्त्याः ॥ आद्यंतवंतउरुगायविदंतिहित्वामेवंविमृश्यसुधियोविरमंतिशब्दात् ॥ ४९ ॥
तत्तेर्हत्तमनमःस्तुतिकर्मपूजाः ॥ कर्मस्मृतिश्चरणयोःश्रवणंकथायां ॥ संसेवयात्वयिविनेतिषडंग
याकिंभक्तिंजनःपरमहंसगतौलभेत ॥ ५० ॥

दातेमोहकलिलंबुद्धिर्व्यतितरिष्यति ॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यचेत्यादि ॥ ४९ ॥
उपसंहरतितत्तदितिहेअर्हत्तमनमः स्तुतिकर्मपूजाः प्रणिपातःसर्वकर्मार्पणानि ॥ कर्मपरिचर्याचरणयोः स्मृतिश्चकथायांश्रवणंचेत्येवंषडंगयासम्यक्
सेवयाविनापरमहंसानांगतौप्राप्येत्वयिजनः कथंभक्तिंलभेत यस्मादेवंभक्तिंविनानमोक्षोनचभक्तिःसेवयाविनाअतःप्राक्प्रार्थितंदास्ययोगमेवदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰ ॥५४॥

एतावंमोवर्णितागुणायस्यस ॥ ममम्नुः उपसंहृतकोपः ॥५१॥ कामानस्पृहयतीतितथा ॥ यद्वा ॥ पुरुषार्थप्रवहोसीत्यर्थः ॥५२॥ अप्रीणान अ
प्रीणयतस्ततंसं अपवर्गाकामत्वेनशोचितुं ॥५३॥ प्रीणंतिप्रीणयंति ॥५४॥ एकांतित्वात् ॥ निरुपाधिभक्तत्वात् ॥५५॥ इतिसप्तमेनवमः ॥ ॥

नारदउवाच ॥ एतवद्वर्णितगुणोभक्त्याभक्तेननिर्गुणः ॥ प्रल्हादंप्रणतंप्रीतोयतमन्युरभाषत
॥५१॥ श्रीभगवानुवाच ॥ प्रल्हादभद्रभद्रंतेप्रीतोहंतेऽसुरोत्तम ॥ वरंवृणीष्वाभिमतोकामपूरो
स्म्यहंनृणां ॥५२॥ मामप्रीणतआयुष्मन्दर्शनंदुर्लभंहिमे ॥ दृष्ट्वामांनपुनर्जंतुरात्मानंतप्तु
मर्हति ॥५३॥ प्रीणंतिह्यथमांधीराः सर्वभावेनसाधवः ॥ श्रेयस्कामामहाभागाःसर्वासामा
शिषांपतिं ॥५४॥ एवंप्रलोभ्यमानोपिवरैर्लोकप्रलोभनैः ॥ एकांतित्वाद्भगवतिनैच्छत्तानसु
रोत्तमः ॥५५॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेनवमोध्यायः ॥९॥ नारदउवाच ॥ भक्ति
योगस्यतत्सर्वमंतरायतयार्भकः ॥ मन्यमानोहृषीकेशंस्मयमानमुवाचह ॥१॥

दशमेत्वनुगृह्यामुंभक्तंमंतर्हितेहरौ ॥ प्रसंगाद्धरिणाकृद्रेकृतोनुग्रहईर्यते ॥२॥ नत्संर्वंवस्मातं ॥३॥ ॥ छ ॥

राम ॥५४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्पत्त्या स्वभावेनैवासक्तं मां तेषां कामानां संगाद्भीतः ॥२॥ ननु किमहं भक्तं प्रलोभयामि नहि किंतु वरं वृणीष्वेति कस्मात्तवाभिप्रायः अन्य एवेत्याह
अन्य एवेत्याह ॥ भृत्यलक्षणेति हृदयग्रंथिषु बंधकेषु अन्यथा अनर्थसाधने प्रवर्त्तनं न घटेत त्वयि ॥३॥ कथमेवं भृत्यलक्षणज्ञानं स्यात्
तत्राह ॥ यस्त इति ॥ नेत्वतः ॥ ननु कामनयाऽपि सेवमेकवयोः स्वामिभृत्यभावः प्रसिद्धः सत्यं ॥ सोपाधिको सौ न तु सात्त्विक इत्याह ॥ स्वामिन्यात्म

प्रल्हाद उवाच ॥ मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः ॥ तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपा
श्रितः ॥२॥ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ॥ भवान्संसारबीजेषु हृदयग्रंथिषु प्रभु
नान्यथा तेऽखिलगुरो घटेत करुणात्मनः ॥३॥ यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ॥ न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः
॥४॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थो राजसेवकयोरिव ॥५॥

नः आशिषो अनेप ॥ क्षमारणेनैव वणक्स्यः भृत्यहेतुकमात्मनः स्वाम्यमिच्छन्यो भृत्याय राति ददाति स वणिगेव स्वामी ॥४॥ आवयोस्तु नात्विकोऽस
वित्याह ॥ अहं त्विति ॥ अनपाश्रयो निरभिसंधिः अन्यथा कामाद्यनभिसंधिं विना अर्थः प्रयोजनं नास्ति ॥५॥ ॥ ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तथापि परमोदारस्य मम संतोषार्थं किमपि वृणीष्वेति चेदत आह ॥ यदीशि ॥ कामानां हृद्यसंरोहं अनुत्पत्तिं भवतः सकाशात् ॥६॥ ननु
कामास्तन्नोसत्स्वंको दोषस्तत्राह ॥ इंद्रियादीनि यस्य जन्मना नश्यंतीति आत्मा देहः ॥७॥ कामाभावे गुणमाह ॥ विमुंचतीति भगवत्त्वाय तत्स

(दे)यस्तु आशिष आशास्ते न स भृत्यः स वै वणिक् ॥ आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः
न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ॥४॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपा
श्रयः नान्यथेहावयोरर्थो राजसेवकयोरिव ॥५॥ यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ
कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ॥६॥ इंद्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ॥ ह्रीः
श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ॥७॥ विमुंचति यदा कामान्मानवो मनसि स्थितान्
तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ॥८॥ ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने ॥ हरयेद्भुतसिं

मानैश्वर्याय ॥ तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा यस्य हृदि स्थिताः अथ मर्त्योमृ हाय ब्रह्मणे परमात्मने ॥९॥
तो भवत्यत्र ब्रह्म समश्नुत इति ॥८॥ निर्दोषामुक्कामानेवातुमिच्छंतं प्रसाख्यास्यन्नमस्यति ॥ ॐ नम इति ॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यमेकांतभक्तस्त्वं तथापि मदाज्ञाकरणीयेत्याह ॥ नैकांतिन ॥ मे एकांतिनः कदाचिदपि इहामुत्र च मत्त आशिषो न वांछंत्येव ॥ तथाप्येतन्मन्वंतरमा
त्रं भोगान् भुंक्ष्व ॥ १० ॥ ननु नहि बंधः स्यादित्यत आह ॥ कथा इति द्वाभ्यां सर्वेषु भूतेषु संतमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व नन्वे
नैव कर्मणा बंधः स्यात् नेत्याह ॥ योगेन समर्प्पणेन कर्म हिन्वन् त्यजन् यजस्व ॥ ११ ॥ किंच भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा नुक्तबंध
सन् लोकानुग्रहार्थं कीर्त्तिं च विस्तार्य मां प्राप्स्यसि ॥ कुशलेन पुण्याचरणेन पापं हित्वेति विभीषामात्रं अन्यथा तस्य राज्यप्रवृत्तेः ॥ ननु तस्य प्रा

नृसिंह उवाच ॥ नैकांतिनो मे मयि जात्विहाशिष आशासतेमुत्र च ये भवद्विधाः ॥ अथापि मन्वंतरमे
तदत्र दैत्येश्वराणामनुभुंक्ष्व भोगान् ॥ १० ॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्म
नि संतमेकं सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन हि कर्म हिन्वन् ॥ ११ ॥ भोगेन पुण्यं कुशले
न पापं कलेवरं कालजवेन हित्वा ॥ कीर्त्तिं विशुद्धां सुरलोकगीतां वितायमामेष्यसि मुक्तबंधः ॥ १२ ॥

चीने पापमस्ति मदधिगमे उत्तरपूर्वाघयोरविश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् ॥ न सुकृते दुःकृते विधुनुते इति श्रुतेश्च ॥ न चेदं प्रारब्धपा
पाभिप्रायं तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचनानुपपत्तेः न चासावविद्वानिति वाच्यं भगवतैव कृतार्थत्वस्यानंतरं ॥ वक्ष्यमाणत्वात्
अत एव योगेन कर्म हिन्वन् इतीदमपि लोकसंग्रहार्थं कर्मणि प्रवर्त्तितस्यानुद्वेगमात्रायेति सर्वमनवद्यं ॥ १२ ॥ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच य इति त्वां च मां च इदं मद्वरितं च स्मरन्नेन त्स्तोत्रेण यः कीर्तयेत्सोऽपि कर्मबंधाद्विमुच्यते कुतस्तवबंधशंकेत्यर्थः ॥१३॥ ईश्वरात्त्वत्तः प्राप्तकर्माधिकारः स
न्पितुर्निष्कृतिं प्रार्थयते त्रिभिः वरं वरय एतमेव दद्यवं वरेशात्त्वत्तः ॥१४॥ विद्धोऽमर्षेण क्रोधेन आशयो यस्य ॥१५॥ ते अपांगेन संदृष्टः अतः सद्य
स्तथापि भो कृपणवत्सल कार्पण्येन प्रार्थये इत्यर्थः ॥१६॥ यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितुस्त्रय एव पूर्वजाः तथापि त्रिसप्तभिः सहेति

य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ॥ त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते ॥१३॥ प्रल्हाद उ
वाच ॥ वरं वरय एतत्ते वरदेशान्महेश्वर ॥ यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरं ॥१४॥ विद्धामर्षा
शयः साक्षात्सर्वलोकगुरुं प्रभुं ॥ भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् ॥१५॥ तस्मात्पिता
मे पूयेत दुरंताद्दुस्तरादघात् ॥ पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल ॥१६॥ श्रीभगवानुवाच ॥ त्रि
सप्तभिः पिता पूतः पितृभिः सह तेऽनघ ॥ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥१७॥ यत्र य
त्र च मद्भक्ताः प्रशांताः समदर्शिनः ॥ साधवः समुदाचारास्ते पूयंत्यपि कीकटाः ॥१८॥ ॥ छ

प्राक्कल्पगतपित्राद्यभिप्रायेणोक्तं ॥१७॥ यद्यस्मात्सम्यगुत्तम आचारो येषां ते कीकटाः अपि देशाः तत्तुल्या वा शास्त्रदृष्ट्यां ते शुद्धा भवंति ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वद्भक्तानामयं महिमेति न चित्रं अहं तादृशो न भवामीति चेत्तत्राह ॥ सर्वात्मनेति द्वाभ्यां मद्भावेन मद्भक्ता विगतास्पृहा येषां ॥१९॥ त्वामनुगता ये
केचित्पुरुषाः । ते एवंलक्षणाः सन्तो मद्भक्ताः मद्भक्ता भवंति अतो भवानस्मे भक्तानां सर्वेषां प्रतिरूपधृक उपमानास्पदं श्रेष्ठः खल्वित्यर्थः
२० ॥ मदंगस्पर्शनेन सर्वशः दग्धस्य ते पितुः पापशंकैव नास्ति ॥ केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥२१॥ वेदवादिभिरुक्तमननतिक्रम्य

सर्वात्मना न हिंसंति भूतग्रामेषु किंचन ॥ उच्चावचेषु दैत्येंद्र मद्भावेन गतस्पृहाः ॥१९॥ भवंति पुरुषा लो
के मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥२०॥ कुरु त्वं प्रेतकार्याणि पितुः
पूतस्य सर्वशः ॥ मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः ॥२१॥ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्म
वादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥२२॥ नारद उवाच ॥ प्रह्लादोऽपि तथा चक्रे पितुर्य
त्सांपरायिकं ॥ यथाह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥२३॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरह
रिं हरिं ॥ स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥२४॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्ष भूतभाव
न पूर्वज ॥ दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः ॥२५

मत्परः सन्कर्माणि कुरु ॥२२॥२४॥ २३॥ २४॥ २५॥ ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥ ५७ ॥

ममसृष्टिभिर्मया सृष्टैर्भूतैः समस्तान्निगमानधर्मान् इत्यर्थः अहन् हतवान् सत्वया हतः ॥ २६ ॥ एतद्दिष्ट्या समितः सम्यक् प्राप्तः ॥ २७ ॥ सर्वतः सं
त्रासात् गोप्तृ रक्षकं ॥ २८ ॥ एवं वर स्त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषां ॥ २९ ॥ ३० ॥ ३२ ॥ ३३ ॥ शिशुपालदंतवक्त्रयोर्द्वेषेणैव श्रीकृष्णसायु

यो सौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धो समस्तनिगमानहन् ॥ २६ ॥ दिष्ट्यास्तत्त
नयः साधुर्महाभागवतो र्भकः ॥ त्वया विमोचितो मृत्यो र्दिष्ट्या त्वां समितो धुना ॥ २७ ॥ एतद्भूतेषु भ
गवन् ध्यायतः प्रयतात्मनः ॥ सर्वतः गोप्तृ संत्रासान्मृत्यो रपि जिघांसतः ॥ २८ ॥ श्रीनृसिंह उवाच
मैवं विभो सुराणां ते प्रदेयः पद्मसंभव ॥ वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ २९ ॥ नारद उवाच
इत्युक्त्वा भगवान् राजन् ततश्चांतर्दधे हरिः ॥ अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३० ॥ ततः
संपूज्य शिरसा ववंदे परमेष्ठिनं ॥ भवं प्रजापतीन् देवान् प्रल्हादो भगवत्कलाः ॥ ३१ ॥ ततः काव्या
दिभिः सार्द्धं मुनिभिः कमलासनः ॥ दैत्यानां दानवानां च प्रल्हादमकरोत्पतिं ॥ ३२ ॥ प्रतिनंद्य ततो
देवाः प्रयुज्य परमाशिषः ॥ स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ॥ ३३ ॥ ॥

ज्यं कथमिति यत्पृष्टं तत्र देवतयोः पूर्वजन्मकथनादिभिरुपपादितमुपसंहरति एवमिति सप्तभिः दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्यानु

राम
॥ ५७ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५॥३६॥ करूषजोदंतवक्त्रः हरौ सायुज्यं समीयतुः॥३७॥ कृष्णनिंदादिना सर्वविकृतं चयत्॥ एनः पापं तत् ध्यानेन तदात्मनः संतोजह्नु
नदात्मत्वेत्वष्टस्थानः कीटः पेशस्कृतो ध्यानेन यथा तद्रात्मा भवतीति॥३८॥ अभिदामे ददर्शनश्शून्यथा॥३९॥ हरेः सात्म्यं सारूप्यं॥४०॥

एवं तौ पार्षदौ विप्रैः पुत्रत्वं प्रापितौ दितेः॥ हृदि स्थितेन हरिणा वैरभावेन तौ हतौ॥३४॥ पुनश्च विप्र
शापेन राक्षसौ तौ बभूवतुः॥ कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः॥३५॥ शयानौ युधि निर्भिन्नहृ
दयौ रामसायकैः॥ तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि॥३६॥ ताविहाथ पुनर्जातौ शिशुपालक
रूषजौ॥ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः॥३७॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः
जह्नुस्त्वेतेन तदात्मनः कीटः पेशस्कृतो यथा॥३८॥ यथा यथा भगवतो भक्त्या परमयाभिदा॥ नृपा
श्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः॥३९॥ आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान्॥ दमघोष
सुतादीनां हरेः सात्म्यमपि द्विषां॥४०॥ एषा ब्रह्मण्यदेव [illegible] स्य कृष्णस्य च महात्म
नः अवतारकथा पुण्या वधो यत्रादिदैत्ययोः॥१

प्रल्हादचरितमुपसंहरन्निरूपयति चतुर्भिः अवतारः श्रीमन्नृसिंहरूपलक्षणकथा
आख्यानेतिशेषः॥४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥५८

प्रह्लादस्यानुचरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः अस्मिन्नेतेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं अनेन नक्तं
हरेर्गुणकर्मानुवर्णनं चेत्यर्थः॥४२॥ परावरेषां दैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः॥४३॥ आध्यात्मिकं आत्मामात्मविवे

प्रल्हादस्यानुचरितंमहाभागवतस्यच॥भक्तिर्ज्ञानंविरक्तिश्चयाथात्म्यंचास्यवैहरेः॥४२॥सर्ग
स्थित्यप्ययेशस्यगुणकर्मानुवर्णनं॥४२॥परावरेषांस्थानानांकालेनव्यत्ययोमहान्॥धर्मोभा
गवतानांचभगवान्येनगम्यते॥४३॥आख्यानेऽस्मिन्समाम्नातमध्यात्मिकमशेषतः॥४४
यएतत्पुण्यमाख्यानंविष्णोर्वीर्योपबृंहितं॥कीर्तयेच्छ्रद्धयाश्रुत्वाकर्मपाशैर्विमुच्यते॥४५॥
एतद्यआदिपुरुषस्यमृगेंद्रलीलांदैत्येंद्रयूथपवधंप्रयतःपठेत॥दैत्यात्मजस्यचसतांप्रवर
स्यपुण्यंश्रुत्वानुभावमकुतोभयमेतिलोकं॥४६॥ ॥ ७

कादि॥४४॥ एतच्छ्रवणादिफलमाह य इति द्वाभ्यां॥ एतच्छ्रुत्वा यः कीर्तयेत्॥४५॥ एतत् एतां मृगेंद्रस्य लीलां नामेवाह॥ दैत्येंद्रस्य
यूथपानां च वधं यः शुचिस्सन्पठेत॥ पुण्यमनुभावंप्रभावं वा निश्चयं वा वैकुंठं ४६ ॥ ७ ॥ ॥

राम
५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो प्रल्हादस्य भाग्यं येन देवो दृष्टः वयं तु मंदभाग्या इति विषीदंतं प्रत्याह ॥ यूयमिति त्रिभिः येषां युष्माकं गृहान् मुनयो भियंति सर्वतः स
मायांति तत्कस्य हेतोः । एषु गृहेषु नराकारं गूढं सत् श्रीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति ॥ ४७ ॥ ननु कृष्णो अस्माकं मातुलेयः कथं
ब्रह्मेत्युच्यते तत्राह स वा इति सोयं ब्रह्मैव कथंभूतः महद्भिर्विमृग्यं यत्कैवल्यं निरुपाधिः परमानंदः तदनुभूतिरूपः वः युष्माकं
खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत् आज्ञानुवर्ती ॥ ४८ ॥ ननु परं ब्रह्म चेत् कथमेष सहास्माभिः पुरतः कथं वा धर्माचर

यूयं नृलोके बत भूरिभागाः लोकं पुनाना मुनयोभियंति ॥ येषां गृहानावसतीति साक्षात् गूढं प
रं ब्रह्म मनुष्यलिंगं ॥ ४७ ॥ स वा अयं ब्रह्म महद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सु
हृद्वः खलु मातुलेयः ॥ आत्मार्हणीयो विधिकृद्गुरुश्च ॥ ४८ ॥ न यस्य साक्षाद्भवपद्मजादिभि
रूपं धिया वस्तुतयोपवर्णितं ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ४९ ॥

रां तस्येत्यत आह न यस्य रूपं तत्त्वं भवादिभिरपि धिया स्वबुध्या वस्तुतय इति इदमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नः अ
स्माकं तु मौनादिसाधनैः सम्यगाराधितः प्रार्थनीय एवेत्याह मौनेनेति स एव सात्वतांपतिर्नः प्रसीदतु ननु प्रल्हादस्य गृहेषु परं ब्रह्म वसति
न च तद्दर्शनार्थं मुनयस्तद्दर्शनाय मुनयस्तद्गृहानभियंति न च तस्य मातुलेयादिरूपेणावर्तते न च स्वयमेव प्रसन्नः अतो यूयमेव तेभ्यो

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥ ५९ ॥

नन्वन्यैर्दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् ॥ स एवं भूतोऽपीश्वरोऽप्यस्मत्तत्त्वं न जानातीति कथमित्यपेक्षायां तत्साप्येन तत्साहाय्या
देवासौ प्रभावो केवलस्येति वक्तुमारम्भमानमुपक्षिपति ॥ स एष इति ॥ ५० ॥ राजा युधिष्ठिर उवाच ॥ जगदीशितुर्देवस्य कीर्तिकस्मि
न्कीर्तिमर्मणि मयो व्यहनवान् ॥ ५१ ॥ अनेन श्रीकृष्णेनोपबृंहितैः संवाद इतैः ॥ ५२ ॥ हेमीरौप्यायसीश्चेजितस्त्रिः पुरो निर्मायते

स एष भगवान्राजन्व्यतनोद्धि हितं यशः ॥ पुरा रुद्रस्य देवस्य मयेनानंतमायिना ॥ ५० ॥ राजोवाच ॥ कस्मिन्कर्मणि देवस्य मयो हन्जगदीशितुः ॥ यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यतां
५१ ॥ श्रीनारद उवाच ॥ निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ॥ मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५२ ॥ स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५३ ॥

ादशाविनिशेषः दुर्लक्ष्यो अपायस्य योगो गमनागमने यासां दुर्वितर्क्यः परिच्छदो यासां ॥ ५३ ॥ ॥ श्रीगोविंदाः

राम
॥ ५९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ सुराणां सेनान्यः सेनापतयः पूर्ववैरं स्मरंतः ॥५४॥ अस्त्रं जनमभिमंत्र्य पुरेषु व्यमुंचत ॥५६॥ ततः शरास्तु सूर्यमंडलात् मयूखस्वरूपं
दे॰हा॥ रश्मिसमूहाः इव वर्षतः येभ्यः ॥५७॥ कूपरसे तस्य निर्मितकूपामृते ॥५८॥ वज्रसाराः वज्रवत् दृढांगाः महौजसो महाबलाः

तामिस्तेभ्यसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप ॥ स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥५४॥
ततस्तेभ्यः सलोका उपासाद्येश्वरं विभो ॥ आहि नस्तावकान्देव विनष्टान्त्रिपुरालयैः ॥५५॥ अ
यानुगृह्य भगवान्मा भैष्टेति सुरान्विभुः ॥ शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ॥५६॥ ततो
ग्निवर्णा इषवो उत्सेतुः सूर्यमंडलात् ॥ यथा मयूखसंदोहा नादृश्यंत पुरो यतः ॥५७॥ तैः स्पृ
ष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ॥ तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥५८॥ सिद्धा
मृतरसस्पृष्टा वज्रसारा महौजसः ॥ उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ॥५९॥ ॥ छ

मेघदलनाः मेघभेदिनो विद्युद्रूपा इव ॥५९॥ ॥ छ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰ ॥ ६० ॥

६० ॥ काले मध्यान्हे ॥ ६१ ॥ ६२ ॥ आत्मनोऽन्यस्य वा द्वयोरपि यद्दैवेन दिष्टमुपकल्पितं अपोहितुं परिहर्तुं इह कश्चिदपीश्वरः

विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजं ॥ तदायं भगवान् विष्णुस्तत्रोपायमचीकरत् ॥ ६० ॥ व
त्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ॥ प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ ते सुरा ह्यपि
पश्यंतो न न्यषेधन् विमोहिताः ॥ ६१ ॥ तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ स्वयं विशो
कः शोकार्तान् स्मरन् दैवगतिं च तां ॥ ६२ ॥ देवोऽसुरो नरोऽन्यो वा नेश्वरोस्तीह कश्चन ॥ आत्मनोऽन्यस्य
वा दिष्टं दैवेनापोहितुं द्वयोः ॥ ६३ ॥ अथासौ शक्तिभिः स्वाभिः शंभोः प्राधानिकं व्यधात् ॥ धर्म
ज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ॥ ६४ ॥ रथं सूतं ध्वजं वाहान् धनुर्वर्मशरादि यत् ॥ संनद्धो
रथमास्थाय शरं धनुरुपाददे ॥ ६५ ॥ शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ॥ ददाह तेन दुर्भेद्या
हरोऽथ त्रिपुरो नृप ॥ ६६ ॥

समर्थो नास्ति ॥ ६३ ॥ असौ श्रीकृष्णः प्राधानं संयामस्तत्साधनं ॥ ६४ ॥ ६५ ॥ अभिजिति म
ध्यान्हे ॥ ६६ ॥

राम ॥ ६७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमानशतानिसंकुलानिसंकीर्णानियेषांतेदेवादयः॥६७॥६८॥ आदितआरभ्यस्कंधार्थंनिगमयति एवंविधानीतिनृलोकंनरा

दि. वदुंदुभयोनेदुर्विमानशतसंकुलाः॥ देवर्षिपितृसिद्धेशाजयेतिकुसुमोत्करैः॥ अवाकिरन्
जगुर्हृष्टाः ननृतुश्चाप्सरोगणाः॥६७॥ एवंदग्ध्वापुराणितिस्रोभगवान्पुरहान्नृप॥ ब्रह्मादिभि
स्तूयमानः स्वधामप्रत्यपद्यत॥६८॥ एवंविधान्यस्यहरेः स्वमाययाविडंबमानस्यनृलोक
मात्मनः॥ वीर्याणिगीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरंवदामिकिं॥६९॥ इति
श्रीभागवतेमहापुराणेसप्तमस्कंधेत्रिपुरविजयोनामदशमोध्यायः॥१०॥ ॥ छ

कारमात्मनोविडंबमानस्यअनुकुर्वतः॥६९॥ इतिश्रीभागवतेसप्तमस्कंधेदशमोध्यायः॥१०॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशेनृणांधर्माःसाधारणत्वेनवर्णिताः॥विशेषेणचवर्णानांमुख्यामुख्याश्चयोषितां॥१॥ तदेवंदशभिर्ज्ञानभक्तियोगानुदीरितोअथपं
चभिरध्यायैःकर्मयोगोनुवर्ण्यते॥२॥ दैत्यपतेःप्रल्हादस्यसाधुतांसभाजितंतत्कृतंईहितंचरितंश्रुत्वापुनर्नारदंपप्रच्छ॥ कथंभूत

श्रीशुकउवाच॥ श्रुत्वेहितंसाधुसभासभाजितंमहत्तमाग्रण्यउरुक्रमात्मनः॥ युधिष्ठिरोदैत्यपतेर्मु
दायुतःपप्रच्छभूयस्तनयंस्वयंभुवः॥१॥ युधिष्ठिरउवाच॥ भगवञ्छ्रोतुमिच्छामिनृणांधर्मंसना
तनं॥ वर्णाश्रमाचारयुतंयत्पुमान्विंदतेपरं॥२॥ भवान्प्रजापतेःसाक्षादात्मजःपरमेष्ठिनः
सुतानांसंमतोनित्यंतपोयोगसमाधिभिः॥३॥ नारायणपराविप्राधर्मंगुह्यंपरंविदुः॥करुणाः
साधवःशांतास्त्वद्विधानतथापरे॥४॥ ॥ ॥७॥ ॥ ॥११॥ ॥

स्येहितंमहत्तमा(ग्र)णामग्रण्यःमुख्यस्तत्रहेतुःउरुक्रमेआत्मामनोयस्य॥१॥ श्रवणेछायांहेतुःयतोधर्मान्अनुष्ठितान्परंज्ञानंभक्तिंच
विंदति॥२॥३॥ ननुत्वमपिकारेधर्मस्तउक्तएवतत्राहनारायणपराइति ४

राम
॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजायश्रीनारायणायतस्यैवमुखाच्छ्रुतं ॥५॥ तन्मुखोदात्मनः श्रवणंसंभावयन्नविभावयन्विहृीमष्टियदृति ॥ ६॥ प्रथमंतावद्धर्मे
प्रमाणमाह ॥ धर्मेविनिधर्मस्यमूलंप्रमाणोस्मृतेवस्मृतिः ॥ तद्विदांवेदविदांयेनचात्मामनःप्रसीदतितुष्यति ॥ तथाचयाज्ञव
ल्क्यः श्रुतिःस्मृतिः ॥ सदाचारः ॥ स्वस्यचप्रियमात्मनःसम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतेयितिमनुश्चवेदोखिलोध

नारदउवाच ॥ नत्वाभगवतेजायलोकानांस्वस्तिहेतवे ॥ वक्ष्येसनातनंधर्मंनारायणमुखा
च्छ्रुतं ॥ ५ ॥ योवतीर्यात्मनोंशेनदाक्षायण्यांतुधर्मतः ॥ लोकानांस्वस्तयेध्यास्तेतपोबदरि
काश्रमे ॥ ६ ॥ धर्ममूलंहिभगवान्सर्ववेदमयोहरिः ॥ स्मृतंचतद्विदांराजन्येनचात्माप्रसी
दति ॥ ७ ॥ सत्यंदयातपःशौचंतितिक्षेक्षाशमोदमः ॥ अहिंसाब्रह्मचर्यंचत्यागःस्वाध्याय
आर्जवं ॥ ८ ॥
मेमाह ॥ सत्यमितिपंचभिः तपएकादश्युपवासादिईक्षायुक्तायुक्तविवेकः ॥ शमोमनसःसंयमः
दमोवाह्येंद्रियाणां ॥ त्यागोदानं ॥ स्वध्यायोयद्योवितजयः ॥ ८ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतोषो दैवलब्धेनालंबुधिः समदृशां महतां सेवा॥ ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः॥ पर्य्येयेहेक्षा निःफलक्रियाणामीक्षणं॥ मौनं वृ
थालापनिवृत्तिः॥ आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसंधानं॥ ९॥ आत्मेति देवतेति च बुद्धिः॥ १०॥ अस्य श्रीकृष्णस्य स्मरणं तस्यैनव

संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः॥ नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनः॥ ९॥ अन्ना
द्यादेः संविभागो भूतेभ्यश्च यथार्हतः॥ तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव॥ १०॥ श्रवणं
कीर्तनं चास्य स्मरणं महतां गतेः॥ सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं॥ ११॥ नृणामय
परो धर्मः सर्वेषां समुदाहृतः॥ त्रिंशल्लक्षणवान्राजन् सर्वात्मा येन तुष्यति॥ १२॥ ॥

ईज्या अर्चनं॥ ११॥ एवं त्रिंशल्लक्षणवान् ॥ १२॥ ॥ ॥ ७॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींवर्णधर्मान्वक्तुंद्विजानांलक्षणमाहसंस्कारामंत्रवंतोगर्भाधानादयोयस्मिन्नविछिन्नाःसद्विजःनहिशूद्रस्यापिस्यापिसंस्का
राविछेदेसतिद्विजत्वंस्यान्नत्याह॥अजोब्रह्मायमेवंभूतसंस्कारयुक्तंजगादसद्विजः।शूद्रंतुजन्मत्रवसंस्कारयुक्तंजगादनचोपन
यवंतंअतोनासौद्विजः॥तथाचस्मृतिः॥विवाहमात्रसंस्कारंशूद्रोपिलभतांसदा॥नकेनचित्समसृजच्छंदसातंप्रजापतिरिति॥श्रु
तिश्च॥गायत्र्याब्राह्मणमसृजत्त्रिष्टुभाराजन्यंजगत्यावैश्यंशूद्रंनकेनचिच्छंदसेति॥अतोविवाहव्यतिरिक्तसंस्कारस्यानावर

संस्कारायत्राविछिन्नाःसद्विजोयोजगादयं॥इज्याध्ययनदानानिविहितानिद्विजन्मनां॥जन्म
कर्मावदातानांक्रियाश्चाश्रमचोदिताः॥१३॥ ॥ छ ॥ छ

कृत्वातउपनयस्यतुसर्वथानिषेधान्नतस्यद्विजत्वमित्यर्थःपाठांतरेवैदिकादयइतिगर्भाधानादयइत्यर्थः॥त्रैवर्णिकानामा
वश्यकानाह॥इतिजन्मना॥विशुद्धेनकुलेनकर्मणाचआचारेणअवदातानांशुद्धानांदुराचाराणांचनैतानिविहितानीत्यर्थः
ब्रह्मचर्याद्याश्रयेतिविहिताःक्रियाःशूद्रस्यवर्णधर्मएव॥आश्रमभेदकृतविशेषाभावात्॥१३॥ ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणादीनां चतुर्वर्णानामपि वृत्तिरूपान्धर्मानाह ॥ विप्रस्येव साऽर्द्धैः सप्तभिः ॥ विप्रस्य षट्कर्माणि विहितानीत्यनुषंगः ॥ तत्र त्वध्यापनं या
जनं प्रतिग्रहश्च जीविकायै आह मनुः ॥ षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति ॥ अन्य
स्य क्षत्रियस्य अप्रतिग्रह इति ॥ प्रतिग्रहातिरिक्तं याजनमध्यापनं च यद्यजानाति वक्ष्यति चानंतरमेव क्रते राजन्यमिति श्रूयते च अध्याप
तिकेकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि प्रजापालनेऽधिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति ॥ आदिशब्देन दंडशुल्कादि ॥ १४ ॥ वा

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः ॥ राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः ॥ १४ ॥ वै
श्यस्तु वार्त्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ॥ शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥ वा
र्त्ता विचित्रा शालीनयायावरशिलोंछनं ॥ विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥ विप्रवृ
त्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥ क्रते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥ ॥

र्त्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य सः ॥ शूद्रस्य द्विजशुश्रूषा विहिता स्वामिनो द्विजस्यानुशुश्रूषा वृत्तिश्च भवेत् ॥ १५ ॥ विप्रस्य मुख्यानु
कल्पभेदेन वृत्त्यंतराण्याह वार्त्ता विविचित्रा कृष्यादिरूपा शालीनं यांच्यां विनैव प्राप्तं मयाचितं ॥ यायावरं प्रत्यहं धान्ययांच्यादि ॥ शिलं शा
लिक्षेत्रादौ स्वामिभिस्त्यक्तकणिशोपादानं ॥ उंछनं आपणादिपतितकणोपादानं ॥ शिलोंछनं तु द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी उत्तमा
१६ ॥ वृत्तिविषये व्यवस्थां दर्शयन्नापद्वृत्तीराह जघन्यो नीचः उत्तमां अध्यापनादिरूपां क्रते राजन्यक्षत्रियस्तु प्रतिग्रहादन्यं भजेत ॥ १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विधां पृथ्वीक्तं ॥ विप्रवृत्तीतरेषां सपिदर्शयन्नाह ॥ कृतामृताभ्यामिति ॥१८॥ ॥
श्लोकं व्याचष्टे कृतमिति ॥१९॥ तयोस्तद्वर्जनेहेतुमाह ॥ सर्ववेदमय इति ॥२०॥ वर्णानामभिव्यंजकरूपानुधर्मानाह ॥ शम इति चतुर्भिः अस्तु
तात्मत्वं श्रीविष्णुपरत्वं ॥२१॥ शौर्ययुद्धोत्साहः वीर्यंप्रभावः तेजः प्रागल्भ्यं ॥२२॥ २३॥ अं मंत्रयज्ञः नमस्कारेणैव पंचयज्ञानुष्ठानं तथा च
याज्ञवल्क्यः नमस्कारेण मंत्रेण पचयज्ञान्नाह ॥ पचयज्ञेति ॥२४॥ स्त्रीधर्मानाह ॥ स्त्रीणामिति पंचभिः पतिरेव देवो यासां तस्य पत्युः स्तु

कृतामृताभ्यां ---- जीवेनमृतेन वा ॥ समानृताभ्यां जीवीतेन स्व[illegible]साकथंचन ॥१८॥
॥ ऋतमुञ्छशिलं प्रोक्तं ममृतं स्यादयाचितं ॥ मृतस्तु नित्यं याच्ञा स्यात्प्रमृतं कर्षणं स्मृतं ॥१९॥ सत्यानृतं तु वाणि
ज्यं श्ववृत्तिर्नीचसेवनं ॥ वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सितं ॥ सर्ववेदमयो विप्रः सर्वदेवमयो नृपं ॥२०
शमो दमः स्तपः शौचं संतोषः क्षांतिरार्जवं ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणं ॥२१॥ शौर्यं वीर्यं धृति
स्तेजः स्त्यागआत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रपालनं ॥२२॥ देवगुर्वच्युते भक्तिस्त्रिवर्गपरि
पोषणं ॥ आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं ॥२३॥ शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ॥ अ
मंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणं ॥२४॥ स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता ॥ तद्बंधुष्वनुवृत्तिश्च
नित्यं तद्व्रतधारणं ॥२५॥ संमार्जनोपलेपाभ्यां गृहमंडलवर्तनैः ॥ स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा ॥२६॥

कृषात्तदनुकूलता च तस्य यद्व्रतं नियमं ॥ तस्य धारणं एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च ॥२५॥ किंच समार्जनोपलेयाभ्या
मिसादेः पतिं भजेदित्युत्तरेणान्वयः ॥ परिमृष्टा उद्वर्तनादिना निर्मलीकृता गृहोपकारिणानि परिच्छेदा यया ॥२६॥ श्रीराम ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा क्किंच संतुष्टालाभेन तावन्मात्रभोगेष्वलोलुपा ॥ दक्षाऽनलसा प्रिया सत्या च वाग्यस्याः सर्वत्रापि अप्रमत्ता अवहिता अपति
तं महापातकं त्यजेन्न यथाह याज्ञवल्क्यः आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति ॥ २८ ॥ तत्परा सती भजेत ॥ श्रीहरिमिव ह
र्यात्मनोपसा सह ॥ २९ ॥ प्रतिलोमानुलोमजानां वृत्तिमाह ॥ वृत्तिरिति ॥ ततस्तु कुलकृता कुलपरंपराप्राप्तमपि चौर्यहिंसादिकं च
निषेधयात्त अपापानामचौराणां चेति तत्तत्प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह ॥ अंत्यजैरिति रजकः चर्मकारश्च नटो बुरु

कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ॥ वाक्यैः सत्यैः प्रियैः प्रेम्णा कालिकाल्लि सजेत्पतिं ॥ २७ ॥ संतुष्टालो
लुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ॥ अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजे ॥ २८ ॥ या पतिं हरिभावेन
भजेत् श्रीरिव तत्परा ॥ हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ २९ ॥ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवे
त् ॥ अचौराणामपापानामंत्यजांतेवसायिनां ॥ ३० ॥ प्रायः स्वभावविहितो नृणां धर्मो युगे युगे ॥ वेददृग्भिः स्मृतो राजन्प्रेत्य
चेह च शर्मकृत् ॥ ३१ ॥ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् ॥ हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ३२

डएवच कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः ॥ अंतेवसायिनस्तु चांडालपुक्कसमातंगादयः ॥ तेषां परंपराप्राप्तैव वृत्तिर्निर्णेज
नादिवृत्तिरित्यर्थः ॥ ३० ॥ श्रेष्ठादपि परधर्मान्नीचोऽपि स्वधर्म एव श्रेयानित्याह ॥ प्राय इति ॥ स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः शर्म
कृत् सुखहेतुः स्मृतः केचिदेवं दृष्टचक्षुषैः शांतैः भगवता चोक्तं श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति ॥ ३१ ॥ ननु स्वभाविकं
स्वकर्मणो बंधहेतुत्वात् ॥ कथं सुखहेतुत्वं तत्राह वृत्त्येति ॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतुकाम्यानिकर्माणिकुर्वतस्तत्कुत्सोपभोगपरस्यकथंनैर्गुण्यंस्यात् । तदुक्तंप्रल्हादेनऔपस्थ्यजैह्व्यबहुमन्यमानःकथंविरज्येतदुरंतमोहः
यादित्यत्राधिकारभेदेनव्यवस्थासदृष्टांतमाह ॥ उप्यमानमिति द्वाभ्यां पुनःसूत्यैसस्यप्रसवाय ॥ ३३ ॥ कामाअशेरत्तेवासनारूपेणयस्मि
न्तत् ॥ उत्कंठवासनाविशिष्टस्यमहत्स्वेवकामसयोगोसंभवाद्दृष्टोक्तनियमेनबहुशःकामान्भुंजानस्यैववनिःशेषेनैमित्तिकैःविशुद्धचेतसःतद्दोष
दर्शनेनययातिसौभरीप्रमुखानामिववशाने विरागोभवति । यथासवीर्यंक्षेत्रंशनैः ॥ निर्वीर्यंभवति । यथाचप्रज्वलितोग्निर्नध्यतेविंदुभिःशा
म्यति । महतातुघृतपूरेणशाम्येवतद्वत् ॥ प्रल्हादकुलतस्कौमारएवनिवृत्तरूपदर्शोमेदवासनानामाधिकारिण ॥ तदुक्तंतत्रैवबालानदृषित

उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात् ॥ नकल्प्यतेपुनःसूत्याउप्तंबीजंचनश्यति ॥ ३४ ॥ यस्ययल्लक्षणंप्रोक्तंपुंसो
वर्णाभिव्यंजकं ॥ यदन्यत्रापिदृश्येतत्तेनैवविनिर्दिशेत् ॥ ३५ ॥ एकादशोध्यायः ॥
नारदउवाच ॥ ब्रह्मचारीगुरुकुलंवसन्दांतोगुरोर्हितं ॥ आचरन्दासवन्नीचोगुरौसुदृढसौहृदं ॥ १ ॥ सायंप्रातरुपा
सीतगुर्वग्न्यर्कसुरोत्तमान् ॥ संध्येउभेचयतवाक्जपन्ब्रह्मसमाहितः ॥ २ ॥ सायंप्रातरुपासीत ॥ छंदांस्यधि
यीतगुरोराहूतःचेत्सुयंत्रितः उपक्रम्यवसानेचचरणौशिरसानमेत् ॥ ३ ॥ ॥

धियोहंकारोमेरितोहितैरिति ॥ अतःसर्वमनवद्यं ॥ ३४ ॥ शमादिभिरेवब्राह्मणादिव्यवहारोमुख्यः ॥ नजातिमात्रादित्याह ॥ यस्येति ॥
यद्येति ॥ अन्यत्रवर्णांतरेपिदृश्येततद्वर्णांतरंतेनैवलक्षणनिमित्तेनैववर्णेनविनिर्दिशेत्नतुजातिनिमित्तेनेत्यर्थः ॥ ३५ ॥ छ ॥
टीकायांएकादशोध्यायः ॥ ११ ॥ छ ॥ द्वादशेवर्ण्यतेधर्मोब्रह्मचारीवनस्थयोः ॥ चतुर्णामाश्रमाणांच
साधारणश्चकश्चन ॥ वर्णादीनांधर्माउक्ताइदानीआश्रमधर्माउच्यंते । तत्रास्मिन्द्वादशोध्यायब्रह्मचारिवनस्थयोरसाधारणाश्चतुर्णांसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारणाः वाच्यंते॥ त्रयोदशोयतेधर्माः चतुर्दशोगृहस्थस्यपंचदशोसर्वधर्मसारसंग्रहः ब्रह्मचारीगुरुकुलेवसन्गुर्वादीनुपासी
तेकृत्तरेणान्वयः॥१॥ब्रह्मणा यज्ञीजपन्॥संध्यात्रयमप्युपासीत॥ उभेसंध्येतु यत्नवाग्भवेत्॥सायंप्रातःसंध्याकालनिमित्तंमोनं
कुर्यादित्यर्थः॥२॥गुरोश्चरणौनमत्॥३॥ यथेदितंपालाशदंडोब्राह्मणस्येत्यादीनियममनतिक्रम्यजटाधारणंतु केप्रसाधनाभावमा

॥मेखलाजिनवासांसिजटादंडकमंडलुन्॥ बिभृयादुपवीतंच दर्भपाणिर्यथोदितं॥४॥सायं
प्रातश्चरेद्भैक्ष्यंगुरवेतन्निवेदयत्॥भुंजितयद्यनुज्ञातो नोचेदुपसेत्क्वचित्॥५॥ सुशीलोमित
भुक्दक्षःश्रद्धानोजितेंद्रियः॥ यावदर्थमिवहारेस्त्रीषुस्त्रीनिर्जितेषुचे॥६॥ वर्जयेत्प्रमदा
गायामगृहस्थोगृहकृत्तः॥इंद्रियाणिप्रमाथिनीहरंत्यपियत्नेर्मनः॥७॥ केशोप्रसाधनामर्दस्त्र
पनाभ्यंजमौन्सुनो दिक्॥गुरुस्त्रीभियुवतीभिः कारयन्नात्मनायुवा॥८॥ नन्वग्निःप्रमदानाम्
घृतकुंभसमःपुमान्॥सुतामपिरहोजह्यादन्यादाधावदर्थकृत्॥९॥ ॥

त्रं॥४॥यावदर्थंयथोपयोगमेव॥६॥ गृहकृतःब्रह्मचर्यवानगृहस्थव्यतिरिक्तःसर्वोपिग्राह्यामपिवर्जयेत्॥तत्रहेतुः॥इंद्रियाणि
चलवंतिसयंत्नस्यापिमनोहरंतीति॥७॥८॥ नकारयदित्यत्रहेतुः॥नन्वीतिरहः॥एकांते अन्यदाकेशाद्यसाधनादिव्यतिरिक्ता
वसरेअनेकांतावसरेच यावदर्थेतिदर्थंतिदुक्तंकुर्यात्॥९॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुमिथ्यात्वाद्दैतिकश्मलत्वाच्चस्वयंत्यक्तुमायंस्यादिजह्यादिनिकोयमनिनिर्बंधस्तत्राह ॥ कल्पयित्वेति आत्मनास्वरूपसाक्षात्कारे
साऽइदंदेहेंद्रियादिआभासमात्रंकल्पयित्वानिश्चित्ययावदसौजीवईश्वरःस्वतंत्रोनभवेत्तावद्द्वैतंअस्त्ययंहंपुमानियंस्त्रीत्यादिभेदो
नभवेत् ॥ ततःकिमाह ततोद्वैतात्विपर्ययः गुणाध्यासेनभोग्यताबुद्धिः अतोजह्यादेवेत्यर्थः ॥१०॥ एवंतत्त्वंवसुशीलत्वाद्युक्तंग
हस्थस्यविशेषमाहगुरुवृत्तिरिति ॥११॥ अंजनादीनांमामिषांतानांद्वंद्वैक्यं अंजनंशरीरस्यअभ्यंजनंशिरसः स्त्रियश्चअवलेखाचित्र

कल्पयित्वात्मनायावदाभासमिदमीश्वरः ॥ द्वैतंतावन्नविरमेत्ततोस्यविपर्ययः ॥१०॥ एवंतत्त्वंगृह
स्थस्यसमाम्नातंयतेरपि ॥ गुरुवृत्तिर्विकल्पेनगृहस्थस्यर्तुगामिनः ॥११॥ अंजनाभ्यंजनोन्मर्दस्त्र्यव
लेखामिषंमधु ॥ स्रग्गंधालेपालंकारांस्त्यजेयुर्येधृतव्रताः ॥१२॥ उषित्वैवंगुरुकुलेद्विजोधीत्याव
बुध्यच ॥ त्रयींसांगोपनिषदंयावदर्थंयथाबलं ॥१३॥ ॥ छ ॥

कर्मस्त्रीणांकुड्यादौलेखनंयातन्नीरीक्षणंवाअत्राभ्यंगादिस्वरूपतोनिषिध्यतेपूर्वंतुकथंचिदापदिमात्रमपिस्त्रीकर्तृकंनिषिद्धमितिने
दः ॥१२॥ अंगैः शिक्षादिभिरुपनिषद्भिश्चसहितांवेदत्रयीमधीत्यअवबुध्यतदर्थंचविचार्ययावदर्थंस्वाधिकारानुसारेण ॥१३॥
छ ॥ छ ॥ छ श्री० ॥ श्री० छ ॥ छ ॥ छ ॥ श्री० छ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥६४॥

यदीश्वरः शक्तः तर्हि गुरोः काममपेक्षितं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात् तत्र वा वसेत् ॥ नैष्ठिकः स्यादित्यर्थः ॥१४॥ स्वधा
मभिः स्वाश्रयभूतैर्जीवैः सह तल्लियंतन्नया ॥१५॥ चरन्नेवमाचरन् विदितं विज्ञानं येन सः ॥१६॥ ऋषिलोकं महर्लोकं ॥१७॥ अकृष्ट अ

दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ॥ गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥१४॥ अग्नौ गुरा
वात्मनि च सर्वभूतेष्वधोक्षजं ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥१५॥ एवं विधो ब्रह्म
चारी वानप्रस्थो यतिर्गृही ॥ चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति ॥१६॥ वानप्रस्थस्य वक्ष्या
मि नियमान्मुनिसंमतान् ॥ यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा ॥१७॥ न कृष्टपच्यमश्
नीयादकृष्टं चाप्यकालतः ॥ अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥१८॥ वन्यैश्चरुपुरोडा
शान्निर्वपेत्कालचोदितान् ॥ लब्धे नवे नवेन्नाद्ये पुराणं तु परित्यजेत् ॥१९॥ ॥ छ ॥

कृष्टपच्यं अकालतः पाककालांलात्स्वमेव निष्पन्नमित्यर्थः ॥ अर्कपक्वं फलादि आहरेत् अश्नीयात् ॥१८॥ वन्यैर्नीवारादिभिः काल
चोदितान् नित्यान् पुराणं पूर्वसंचितं ॥१९॥

राम
॥६४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिमादीन्सहेत इतितथा ॥२०॥ केशादीनमलं चाप्रक्षालनेन धारयन् कमंडल्वादींश्च धारयेत् ॥२१॥ कृच्छ्रतः तपःक्लेशान् यथावु
द्धिनैनश्येत्तथाचरेत् ॥२२॥ द्वादशाद्वायनं नरमपि यदि स्वधर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत् ॥ यदि तु ज्ञानाभ्यासे योग्यस्तर्हि सं

अग्न्यर्थमेघशरणामुक्तं चाद्दिकं दरं ॥ श्रयेत हि चवाय्वग्निवर्षार्कातपसा‍टूस्वयं ॥२०॥ केशरो
मनखश्मश्रुमलानिजटिलो दधत ॥ कमंडल्वजिनं दंडवल्कलाग्निपरिछदान ॥२१॥ चरेद्धने
द्वादशाद्वानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथाशक्ति नैविपद्येन कृच्छ्रतः ॥२२॥ यदाकल्पः
स्वक्रियायां व्याधिभिर्जरयाथवा ॥ अन्वीक्षिकां वा विद्यां या कुर्यादनशनादिकं ॥२३॥ आत्म
न्यग्नीन्समारोप्य संन्यस्याहं ममात्मतां ॥ कारणाधुन्यसेत्सम्यक्संघातं तु यथाहितः ॥२४॥

न्यस्येदित्युत्तराध्याये वक्ष्यति तदुभयरहितस्य यत्कर्तव्यं तदाह ॥ यदा अकल्पः असमर्थः आन्विक्षिकां [illegible]नेभ्यासे ॥२३॥ अनशनादि
करिष्यतः पूर्वोक्तस्याह ॥ आत्मनीत्यादि यावत्समाधियथाहितः यथायोग्यं पंचकारणो व्याकाशादिषु संघातं स्वदेहं न्यसेत् प्रविलाप
यन् ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥६४॥

नदेवंविमन्यदर्शयति ॥ खेआकाशेखानिदेहगतछिद्राणि ॥ आत्मावान्धीमान्शेषंअस्थिमांसादिकठिनांशं ॥२५॥ एवंस्थूलशरीरस्यलयमु
क्त्वालिंगशरीररूपस्याध्यात्मादित्रयस्यलयमाह ॥ वाचमित्यादिना तत्रयद्यपिपयोर्द्वंद्वंलयस्यायुक्तत्वादध्यात्मादीनांस्वस्वकार
णेष्वेलयोवाच्यः ॥ तथापीहलयभावनेयमद्वितीयात्मप्रतिपत्तिपरेतियथाकथंचिल्लयेभाव्येदेवतानांलयेभाव्येदेवतानांप्रवर्तक
त्वेनप्राधान्यात्पादिद्वियत्तद्विषययोर्देवतासुलयः कथ्यते वक्तव्यसहितांवाचमग्नौन्यसेत् ॥ एवंसर्वत्रपदानिपादौवयातिविष्णौ ॥

खेखानिवायौनिश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानिक्षितौशेषंयथो
द्भवं ॥२५॥ वाचमग्नौसवक्तव्यामिंद्रेशिल्पंकरावपि ॥ पदानिगत्यावयसिरत्योपस्थंप्रजापतौ
॥२६॥ मृत्यौपायुंविसर्गंचयथास्थानंविनिर्दिशेत् ॥ दिक्षुश्रोत्रंसनादेनस्पर्शमध्यात्मनित्वचं
॥२७॥ रूपाणिचक्षुषाराजन्ज्योतिष्यभिनिवेशयेत् ॥ अप्सुप्रचेतसाजिह्वांघ्रेयैर्घ्राणंक्षितौन्यसेत् ॥२८॥

सनादेनसहअध्यात्मनिवायौअध्यात्मविदिजिवापाठेवायाविनिज्ञातव्यं ॥२७॥ ज्योतिषिआदित्येरसगंधयो
स्त्विंद्रियाकर्षकत्वेनप्राधान्यविवक्षयादेवतासहितेनस्वेंद्रियस्यविषयेलयमाह ॥ प्रचेतसासहजिह्वांरसनांअप्सुरसरूपासुघ्राणाश
ब्देनाश्विनोरप्युपलक्षणं ॥ अश्विभ्यांसहघ्राणंघ्रेयैर्गंधैरुपलक्षितांयांक्षितावित्यर्थः ॥२८॥

राम
॥६४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परेकवौब्रह्मणि अध्यात्मना अहंकारेण अध्यात्मनामिति पाठे कर्माण्यहंकारंचेत्यर्थः कथंभूते रुद्रे यस्माद्यहंममतासाध्विकाक्रियाभ
वति ॥ तस्मिन्सत्वेनचेतनयागुणैर्गुणकार्यैः प्राणावशिष्टैर्देवैः सहयद्वासत्वादिगुणैर्हेतुभूतैः वैकारिकंमोक्तत्वादिविकारंचैतंक्षेत्र
ज्ञेपरेअविकारेब्रह्मणि ॥ २८ ॥ ननुविकारवत्त्वः कथंपरलयः स्यादविकारत्वात् हेतुंतांसर्वोपाधीनांलयद्वारेणाह ॥ अप्स्विति अदोज्यो

मनोमनोरथैश्चंद्रेबुद्धिंबुद्ध्योकवौपरे ॥ कर्माण्यध्यात्मनारुद्रेयदहंममताक्रिया ॥ सत्वेनचित्तंक्षेत्र
ज्ञेगुणैर्वैकारिकंपरे ॥ २९ ॥ अप्सुक्षितिमपोज्योतिषदोवायौनभस्यमुं ॥ कूटस्थेतच्चमहतितदव्यक्ते
क्षरेचतत ॥ ३० ॥ इत्यक्षरतयात्मानंचिन्मात्रमवशेषितं ॥ ज्ञात्वाद्वयोथविरमेद्दग्धयोनिरिवानलः
॥ ३१ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेद्वादशोध्यायः ॥ १२ ॥ ॥ छ ॥ ॥

तिः तच्चनभः कूटस्थेअहंतत्वेनच्चकूटस्थंमहतिमहदव्यक्तेप्रधानेतच्चाव्यक्तंअक्षरेपरमात्मनि ॥ ३० ॥ इतिसर्वोपाधिलयाद्धेतोः अ
वशेषितंचिन्मात्रमात्मानंक्षेत्रज्ञमक्षरतयाज्ञात्वाअद्वयः सन्ततविरमेत् ॥ दग्धकाष्ठोयथाऽनलः ॥ ३१ ॥ इतिश्रीभागवतेमहापुराणे
सप्तमस्कंधेद्वादशोध्यायः ॥ १२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥ ६६ ॥

त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान् ॥ अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥ १ ॥ एवं ध्यात्वा अकल्पोऽनशनादिकं कुर्यात् ॥ आन्विक्षिकं
कल्पस्त्वेवं परिव्रजेदिति सार्धः ॥ कियद्वस्त्रस्याज्यं देहव्यतिरिक्तं सर्वमित्याह देहमात्रेति ॥ तस्य धर्मानाह ग्रामैकरात्रेति नवभिः ॥ १ ॥ कौपीनमाच्छा

नारद उवाच ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः । ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीं ॥ विभृ
याद्यद्यसौ वासः कौपीनाच्छादनं परं ॥ सक्तं न लिंगदंडादेरन्यत्किंचिदनापदि ॥ २ ॥ एक एव चरेद्भि
क्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छांतो नारायणपरायणः ॥ ३ ॥ पश्येदात्मन्यदो विश्वं परे स
दसतोऽव्यये ॥ आत्मानं च परं ब्रह्म सर्वत्र स — — त्मये ॥ ४ ॥ ॥ छ ॥ छ

द्यते यावता गात्रं तन्मात्रं परं केवलं ॥ अन्यदिति वास्यक्तं ॥ पैषोच्चारणात्सर्वमेव ॥ ३ ॥ सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥ । छ ॥

राम
॥ ६६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यं निर्देशः नहि व्यद्वस्तुक्तयोरैक्यं संभवतीति तत्राह ॥ सुषुप्तेर्हि तमसाच्छन्नमात्मनस्तेजो जाग्रत्तु प्रबोधस्तु
विक्षिप्तं प्रकाशेन ॥ संधौ तु न तमो नापि विक्षेपः ॥ अतस्तदा आत्मदृक् आत्मानं लसाक्षित्वेन स्थितः सन् आत्मनो गतिं स्वरूपं पश्यन् अज्ञानत एव
बंधं मोक्षं च मायामात्रं पश्येत् ॥ आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः ॥ यदुक्तं योगग्रंथे ॥ निद्रादौ जागरस्यांते यो भाव उपजायते ॥ तं भा

सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् ॥ पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥ नाभिनंदे
द्ध्रुवं मृत्युमध्रुवं वास्य जीवितं ॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययं ॥ ६ ॥ नासच्छास्त्रेषु सज्जेत
नोपजीवेत जीविकां ॥ वादवादांस्त्यजेत्तर्कान्पक्षं कंचन नाश्रयेत् ॥ ७ ॥ न शिष्याननुबध्नीत ग्रं
थान्नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुंजीत नारंभानारभेत क्वचित् ॥ ८ ॥ ॥

वं भावयन्नित्यमनुच्यते नेनेनराेयनिरिति ॥ ५ ॥ अस्य देहस्य प्रभवोप्ययश्च यस्मात् तं कालं ॥ ६ ॥ असच्छास्त्रेषु अनात्मपरेषु जीविकां ॥ ७ ॥ ना
नुबध्नीत प्रलोभनादिना बलान्नापादयेत् ॥ आरंभान्मठादिव्यापारान् ॥ ८ ॥ ॥ छ श्री० ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥६७॥

परमहंसस्यविशेषमाह॥नयतेराश्रमोधर्मार्थः कथंभूतस्यमहात्मनः॥तस्यशांतस्येत्यादित्रिपादस्यत्वस्यायंभावः नानोत्सृतिपर्यंतंच
हृदकदादिलिंगमाश्रित्यसत्वमाश्रित्यसत्वशुध्यर्थंयमांनियमांश्चाचरन्नेवज्ञानोत्पत्तेर्यतेतउत्पन्नेतुज्ञानेननियमेः॥कृत्यम
स्तियमाश्चरन्नतएववस्तुः अतस्तदादिलिंगोदिभिः प्रयोजनाभावाल्लोकसंग्रहार्थंधारयेद्वात्यजेद्वेति॥२८॥तस्यैवज्ञानदार्ढ्याभावे

नृपतेराश्रमःप्रायोधर्महेतुर्महात्मनः॥शांतस्यसमचित्तस्यबिभृयादुतवात्यजेत्॥२८॥अव्यक्तलिं
गोव्यक्तार्थोमनीष्युन्मत्तबालवत्॥कविर्मूकवदात्मानंसदृष्ट्यादर्शयेन्नृणां॥२०॥अत्राप्यु
दाहरंतीममितिहासंपुरातनं॥प्रह्रादस्यचसंवादंमुनेराजगरस्यच॥२१॥ ॥ छ ॥

योगभ्रंशपरिहारार्थमाह॥नबहिर्व्यक्तंलिंगंयस्यसः अव्यक्तोऽर्थः प्रयोजनमात्मानुसंधानंयस्यसः॥मनीष्यपिउन्मत्तबालवच्चकविरपिमूक
वदात्मानंनृणांदृष्ट्यादर्शयेत्तेयथोन्मत्तादिरूपंमन्येरंस्तथावर्त्ततस्वष्टस्येतिपाठेवाह्यानुसंधानाभावेनस्वस्थः॥१०॥परमहंस
धर्ममेवेतिहासेनस्फुटयति॥अत्रापीतियावदध्यायसमाप्ति॥अजगरवृत्तस्यमुनेश्च॥११॥ ॥ छ ॥ ॥१४॥

राम
॥६७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धरोपस्थे मूढ इष्टे सद्य द्विजतेरजो भिद्धुःसैरे लन्नदेशे र्देहावयवैर्निगडमम नेजोपस्पतं ॥१२॥१३॥ कर्माद्भिर्जनाः येन विदुः ते
पादयोः शिरसास्पृशन्त्वा अप्राक्षीदित्युत्तरेणान्वयः ॥१४॥१५॥ उद्यमसहितं इव भोगवानिव पीवानं स्थूलं देहं धारयसि ॥ तत्र

नैशपानं धरोपस्थे कावेय्यां सद्यसानुनि ॥ रजस्वलेस्तनूदेशैर्निगूढामलतेजसं ॥१२॥ दृष्ट्वा शैलो
कानू विचरन् लोकतत्त्वविविस्तया ॥ इष्टो मास्यैः कतिपयैर्महात्मा भगवत्प्रियः ॥१३॥ कर्मणा
हृति भिर्वा चालिंगैर्वर्णाश्रमादिभिः ॥ न विंदति जना यं वै सोसाविति न वेति च ॥१४॥ तं नत्वाभ्य
र्च्य विधिवत्पादयोः शिरसास्पृशन् ॥ विविक्सुरिदमप्राक्षीत् महाभागवतोसुरः ॥१५॥ विभर्षि
कायं पीवानं सोद्यमो भोगवान्यथा ॥ वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ॥ भोगिनां खलु देहो
यं पीवा भवति नान्यथा ॥१६॥ न ते शयानस्यानुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः ॥ अभोगिनो हं
हेतुवदेति निरूप्यनीयेनान्वयः ॥१६॥ उद्यमं विनेवममभोगास्तीति चेत्तत्राह तव विभव देहः पीवा यत्तत्तद्वदनः क्षमे चेन्न ॥१७॥
वित्तं चेति ॥१६॥ नु इति निश्चये ॥ हद्दन्तिमप्रसिद्धो तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः ॥ यतो अर्थादेव यतो हेतोः पीवात्वमं योग्यं चेन्न ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥ ६८ ॥

किंच वित्ताज्ज्ञेनाद्य समर्थोऽप्ययं जनस्तदर्थमुद्यमं करोति ॥ त्वं तु समर्थोऽपि किमिति न करोषीत्याह ॥ कविर्विद्वान् ॥ कल्यो दक्षः ॥ निपुणा इह कुचतु-
रः ॥ चित्राः प्रियाः लोकरंजना कथा यस्य तथापि लोकस्य कर्म कुर्वतः शेषे ॥ न द्विष्टिताऽपि वानत्सर्वं पश्यन्नपि पाठांतरे न द्वेषितं कर्म न न
न द्वेषि वा न चलोषी त्यर्थः ॥ १८ ॥ तस्य वागोचाम्नं तेन यंत्रितो वशीकृतः सन् ॥ १९ ॥ अध्यात्मचक्षुषा अंतर्दृष्ट्या भवान् वेदैव आर्या

कविः कल्यो निपुणदृक् चित्रप्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ॥ १८ ॥
श्रीनारद उवाच ॥ गृहस्थं दैत्यपतिना परिपृष्टो महामुनिः ॥ स्मयमानस्तमभ्याह तद्वागमृतयंत्रि-
तः ॥ १९ ॥ ब्राह्मण उवाच ॥ वेदेदमसुरश्रेष्ठ भवान्नन्वार्यसंमतः ॥ ईहोपरमयोर्नृणां पदान्यध्या-
त्मचक्षुषा ॥ २० ॥ यस्य नारायणो देवो भगवान् हृद्गतः सदा ॥ भक्त्या केवलयाज्ञानं धुनोति ध्वांतमर्क-
वत् ॥ २१ ॥ अथापि ब्रूमहे प्रश्नांस्तव राजन्यथाश्रुतं ॥ संभावनीयो हि भवानात्मनः शुद्धिमिच्छता ॥ २२ ॥

णां ज्ञानिनां संमतो नन्तु भवान् ॥ इदमिति यदुक्तं तदेवाह नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानि
त्यर्थः ॥ २० ॥ वेदेत्यत्र हेतुः यस्येति हृदि प्रविष्टः सन् ज्ञानं धुनोति अर्को यथा बहिर्ध्वांतं ॥ यथाश्रुतमित्यौद्धत्यपरिहारायोक्तं ॥ २२ ॥

राम
॥ ६८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकर्मसंप्रवर्त्तितेलंतुनिहतः सत्त्वंकिंशेषइतियदुक्तंतत्राह तस्येतिचतुर्भिः भवप्रवाहकारिणापाय्यायोचितैरपिविषयैः स्पर्शयितुम
शक्ययातृष्णयाकर्मसुप्रवर्त्यमानोहंपूर्वंनानायोनिषुप्रवेशितः॥२३॥ तथैवेमंलोकंमनुष्यदेहंयदृच्छयाप्रापितः कथंभूतंलोकं
धर्मेणास्वर्गस्याद्वारंसाधनंअधर्मेणतिरश्चांचश्वसूकरादियोनेर्द्वारंमिश्रेण्यांपुनरप्यस्यमनुष्यत्वस्यद्वारं॥ सर्वतोनिवृत्त्याअपवर्ग

तृष्णयाभववाहिन्यायोग्यैःकामैरपूरया॥ कर्माणिकार्यमाणोहंनानायोनिषुयोजितः॥२३॥
यदृच्छयालोकमिमंप्रापितःकर्मनिर्मितम्॥ स्वर्गापवर्गयोर्द्वारंतिरश्चांपुनरस्यच॥२४॥ अ
त्रापिदंपतीनांचसुखायान्यापनुत्तये॥ कर्माणिकुर्वतांदृष्ट्वानिवृत्तोस्मिविपर्ययं॥२५॥ सुख
मस्यात्मनोरूपंसर्वेहोपरतिस्तनुः॥ मनःसंस्पर्शजान्दृष्ट्वाभोगान्स्वप्स्यामिसंविशन्॥२६॥

स्यद्वारमित्यर्थः॥२४॥ अत्रापिमनुष्यत्वेपिअन्यापनुत्तयेदुःखनिवृत्त्यै॥ विपर्ययंदृष्ट्वानिवृत्तोऽस्मि॥२५॥ ननुप्रवृत्त्याकदाचित्सु
खंस्यादपिनिवृत्त्यातुकिंस्यादितिचेत्तत्राह॥ सुखमस्यजीवस्यस्वरूपमेव॥ तर्हिकिंनप्रकाशतेतत्राह सर्वेषामिन्नतोनीतितनुःसर्वा
क्रियानिवृत्तौस्वतएवप्रकाशतइत्यर्थः॥ भोगांस्तुमनःसंस्पर्शजान्मनोरथमात्रजान्अराग्स्वतान्दृष्ट्वास्वप्स्यामिनिरुद्यमोसीत्यर्थः

गोहिकच्छविकचवीयेकृताहसंविज्ञातासंग्रागप्रमोगा
नदसखं:॥१६॥

भा॰ स॰
॥६९॥

एवं चेत्कोपि संसारं न प्राप्नुयात्तत्राह॥ इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्नेव संतं पुरुषार्थं विस्मृत्य असत्स्वपि द्वैते॥२७॥ एतदे-
वहं दृष्ट्वा तेन स्पृश्यति॥ जलमिति॥ तदुद्भवैः तृणशैवालादिभिः जलकाम्यया जलेच्छया स्वतः आत्मस्वरूपादन्यत्र पुरुषार्थपरः पन-
२८॥ एवं स्वस्य निरुल्यमत्वे कारणमुक्त्वा विपर्ययं दृष्टेति यदुक्तं तद्विवृणोति देहादिभिरिति पंचभिः ईहतः इच्छतः अनीशस्य नि-

इत्येतदात्मनि स्वार्थं संतं विस्मृत्य वै पुमान्॥ विचित्रामसति द्वैते घोरामाप्नोति संसृतिं॥२७॥ ज-
लं तदुद्भवैः छन्नं हित्वाज्ञो जलकाम्यया॥ मृगतृष्णामुपाधावेत्तथा ऽन्यत्रार्थदृक्कुमतः॥२८॥ दे-
हादिभिर्दैवतंत्रैरात्मनः सुखमीहतः दुःखात्ययं चा ऽनीशस्य क्रिया मोघाः कृताः कृताः॥२९॥
अध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित्॥ मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं॥
॥३०॥ पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनां॥ भयादलब्धनिद्राणां सर्वतोभिविशंकिनां
॥३१॥

दैवस्य पुनः पुनः प्रारब्धाः क्रिया मोघा विफला एव भवंति॥२९॥ क्रियाणां सफलत्वेपि फलस्यानुपयोगमाह॥ अध्यात्मि-
कादिभिरिति॥ मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः॥३०॥ कृच्छ्रं विनैव प्राप्तेष्वर्थेषु दुःखं जायत एवेत्याह पश्यामीति॥३१
॥३१॥

राम
॥६९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयं प्रपंचयति राजत इति ॥ स्वस्मात मन्न एवकथं चित्त्यागभोगविसरणादिना नाशः स्यादिति ॥ प्राणवतामर्थवतां च भयं नित्यं ॥३२॥ अनो
नर्थहेतुत्वात्प्राणोऽप्यर्थवत्स्पृहानकार्येत्याह शोकेति ॥३३॥ नन्वेवमनर्थानन्नु भवंतोपि न केचिद्विरक्तं तेन वयं यथालाभेन तुष्टा इति वै
तु कथं वैराग्यादिकं प्राप्तोसि तत्राह मधुकारेति ॥ मधुमक्षिकाजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ॥३४॥ मधुकराच्छिक्षित

राजतश्चोरतः शत्रोः स्वजनात्पशुपक्षितः ॥ अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयं ॥३२॥
शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ॥ यन्मूलाः स्युर्नृणां जह्यात्स्पृहां प्राणार्थयोर्बुधः
॥३३॥ मधुकारमहासर्पौ लोकेस्मिन्नो गुरूत्तमौ ॥ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयं ॥३४॥ वि
रागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ॥ कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ॥३५॥ अ
नीहः परितुष्टात्मा यदृच्छोपनतादहं ॥ नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥३६॥ क्वचिदल्पं
क्वचिद्भूरि भुंजेन्नं स्वाद्वस्वादु वा ॥ क्वचिद्भूरि गुणोपेतं गुणहीनमुत क्वचित् ॥३७॥

माह विराग इति ॥ वित्तपतिं हत्वाप्यन्यो वित्तं हरेदित्येवं ॥३५॥ अजगराच्छिक्षितमाह ॥ अनीह इति ॥ सत्त्ववान्धैर्यवान् ॥३६॥ पीनत्वे हेतुत्वे

नयदृष्ट्या प्राप्तस्य रतिर्नो येन प्रपंचयति ॥ क्वचिदल्पमित्यादि ॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थ॥ चीरंजीर्णवस्त्रखंडं॥ वसेपरिदधेदिष्टमुकुमारस्य भोगी॥३९॥ प्रासादमध्येपर्यंके॥ तत्रापिकशिपो॥४०॥ वरेविवरामि॥ क्वचिदुह
वहिंगवेरा क्विरामि॥४१॥ नचमानापमानकतेषुममवैषम्यमित्याहगा हंनिंदामिमहात्मनिविष्ठो॥ ४२॥ एवंभूतत्वेनस्थितोउपायमा

श्रहुयोपाहृतंक्वापिकदाचिन्मानवर्जितं॥ भुंजेभुक्त्वाथकस्मिंश्चिद्दिवानक्तंयदृच्छया॥३९॥ क्षौमंदुकूलमजिनंचीरंवल्कलमेववा॥ वसेन्यदपिसंप्राप्तंदिष्टभुक्तुष्टधीरहं॥३८॥ क्वचिच्छयेधरोपस्थेतृणपर्णाश्मभस्मसु॥ क्वचित्प्रासादपर्यंकेकशिपौवापरेच्छया॥४०॥ क्वचित्स्नातोनुलिप्तांगःसुवासाःस्रग्व्यलंकृतः॥ रथेभाश्वैश्चरेत्क्वापिदिग्वासाग्रहवद्विभो॥४१॥ नाहंनिंदेनचस्तौमिस्वभावविषमंजनं॥ एतेषांश्रेयआशासउतैकात्म्यंमहात्मनि॥४२॥ विकल्पंजुहुयाच्चित्तौतांमनस्यर्थविभ्रमे॥ मनोवैकारिकेहुत्वातंमायायांजुहोत्यनु॥४३॥ आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः॥ ततोनिरीहोविरमेत्स्वानुभूत्यात्मनिस्थितः॥४४॥ स्वात्मवृत्तंममपत्स्यनेसुगुप्तमपिवर्णितं॥ व्यपेतंलोकशास्त्राभ्यांभवान्हिभगवत्परः॥४५॥ श्री

ह॥ विकल्पमितिद्वाभ्यांचितौमिथ्याहकमनोवृत्तौअर्थरूपोविभ्रमोयस्मिन्वैका
रिकेअहंकारे॥ अनुअनंतरंमहत्तत्वद्वारेणोत्यर्थः॥४३॥ सत्यमेवपश्यतीतितया॥४४॥ मंदृष्ट्यालोकशास्त्राभ्यांव्यपेतंनतत्तुगत्वद्दृष्ट्यायतोभ

॥७१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४६ ॥ इति सप्तमे त्रयोदशः ॥ १३ ॥ चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते देशकालादिभेदेन देशकालादिभेदेन पुनः श्रेयो विशेषकृत ॥ १ ॥ गृह
स्थमुल्लंघ्य मोक्षं प्रति अंतरंगत्वेन प्रथमं वनस्थयतिधर्मेष्वभिहितेषु न तु किं गृहस्थस्य मोक्षो न स्यादिति शंकितचित्तः पृच्छति गृहस्थ इ
ति ॥ १ ॥ तस्य मोक्षधर्मानाह गृहेष्वित्यादि यावदध्यायसमाप्तिः ॥ साक्षाद्वासुदेवार्पणं यथा भवत्येवं कुर्वन्नुपासीत ॥ २ ॥ ३ ॥ स्वयमेवमु

युधिष्ठिर उवाच ॥ गृहस्थ एतां पदवीं विधिना येन चांजसा ॥ याति देवऋषे ब्रूहि मादृशो गृहमूढ
धीः ॥ १ ॥ श्रीनारद उवाच ॥ गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ॥ वासुदेवार्पणं साक्षा
दुपासीत महामुनीन् ॥ २ ॥ शृण्वन् भगवतोऽभीक्ष्णमवतारकथामृतं ॥ श्रद्दधानो यथाकालमुप
शांतजनावृतः ॥ ३ ॥ सत्संगाच्छनकैः संगमात्मजायात्मजादिषु ॥ विमुंचेन्मुच्यमानेषु स्वयं स्वप्न
वदुत्थितः ॥ ४ ॥ यावदर्थमुपासीनो देहे गेहे च पंडितः ॥ विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥

च्यमानेषु यथा उत्थितः पुमान् स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचति तद्वत् ॥ ४ ॥ नन्वेवंभूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहोचिताः क्रि
याः स्युस्तत्राह ॥ यावदर्थमिति ॥ अंतरनासक्तः बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मानुष्यं न्यसेत् पुरुषकारमाविः कुर्यादित्य
र्थः ॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥७१॥

आयहं तु क्वापि न कुर्यादित्याह ज्ञातय इति ॥६॥ नन्वेवं सर्वानुमोदने वित्तस्य यप्रसंगात्कुतो जीवनं कुतो वा कर्म करणं तत्राह ॥ दिव्यं
वृष्ट्यादिभिर्जातं धान्यादि ॥ भौमं निधानादि ॥ अंतरिक्षं अकस्मादेव प्राप्तं ॥ एवं स्वतएवाच्युतनकनिर्मितं दैवं वलब्धं यत ॥ एतत् स्व
वोक्तं कर्मादि ॥ ७॥ देवाद्भूरिलाभे जाते पितन्त्राभिमानो न कार्य इत्याह यावदिति म्रियेत न पूर्येत ॥८॥ अत एव यं कमपि स्वगृहे स्ते

ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ॥ यद्वदंति यदिच्छंति चानुमोदेत निर्ममः ॥६॥ दिव्यं भौ
मं चांतरिक्षं वित्तमच्युतनिर्मितं ॥ तत्सर्वमुपयुंजान एतत्कुर्यात्स्वतो बुधः ॥७॥ यावद्भ्रियेत ज
ठरं तावत्स्वत्वं हि देहिनां ॥ अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति ॥८॥ मृगोष्ट्रखरमर्काखुस
रीसृप्खगमक्षिकाः ॥ आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत् ॥९॥ त्रिवर्गं नातिकृच्छ्रेण भजे
त गृहमेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितं ॥१०॥ [illegible]

नं वा तत्र विशय भुंजानं न निवारयेदित्याह मृगोष्ट्रेति ॥ मर्को मर्कटः सरी [illegible] ॥ ७ ॥ ॥ ॥७१॥ राम
सृपः सर्पः मक्षिकाश्रुतेः पुत्रैः ॥ एषां मृगोमृगादीनां ॥९॥ अतिकृच्छ्रेणायासेन न भजेत ॥ किंतु यावद्दैवप्रापितं तावदेव भजेत ॥१०॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वानश्चअघाश्चपतिताः अंतेवसायिनश्चांडालादयः॥ तानभिआप्ययथार्हंकामान्संविभजेत्स्वविभोग्यान्विभज्यदद्यात्॥ यद्य
प्येकैवात्मनोदाराभार्यातांस्वमतिथिषुशुश्रूषणेनियुंज्यात्यांस्तस्यशुश्रूषाहीयेतयस्माच्चनृणांस्वत्वग्रहः ममैवेयमित्याग्रहः तामे
कामपिसंविभजेत्॥ अतिथ्यादिषुशुश्रूषणेनियुंजीतेत्यर्थः॥ नत्वन्यथामंतव्यंयथार्हंसंविभजेदित्युक्तत्वात्॥११॥ ए

आश्वाघांतेवसायिभ्यः कामान्संविभजेद्यथा॥ अप्येकामात्मनोदारांनृणांस्वत्वग्रहोयतः
॥११॥ जह्याद्यदर्थेस्वान्प्राणान्हन्याद्वापितरंगुरुं॥ तस्यांस्वत्वंस्त्रियांजह्याद्यस्तेनह्यजितोजितः
॥१२॥ कृमिविड्भस्मनिष्ठांतंक्वेदंतुच्छंकलेवरं॥ क्वतदीयरतिर्भार्याक्वायमात्मानभ
श्छदिः॥१३॥ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः॥ शेषेस्वत्वंत्यजन्प्राज्ञः पदवीं
महतामियात्॥१४॥

वंचेतिनेश्वरोवशीकृतः स्यादित्याह॥ यदर्थेयन्निमित्तं॥ अन्यैरजितोपीश्वरस्तेनजितएव॥१२॥
कथमेवंतस्याः स्वत्वाभिमानोहातुंशक्यः॥ तत्त्वविचारेणेत्याह किमिविड्भस्मसुनिष्ठापर्यवसानंअंतेयस्य॥ तदीयादेहार्थीरतिर्य
स्यांसास्वमहिम्नानभोऽपिछादयतीतियथा॥१३॥ किंत्वसिद्धैर्दैवलब्धैः यज्ञावसिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः॥ महतांनिवृत्तानां॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
७२

एतद्विवृण्वन्नाह ॥ देवादीन्पंच यत् देवताः आत्मानं च ॥ एवं पृथक्पुरुषं अंतर्यामिणमेव यजेत ॥ १५ ॥ १६ ॥ न पुनरग्निर्निर्वेधोयज्ञार्थ कार्य इत्याह ॥ नहीति ॥ विप्रमुखेऽङ्कैतैरन्नादिभिर्यथा इज्येत इज्यते न तथा अग्निमुखतो हविषा इज्येत ॥ १७ ॥ ब्राह्मणेषु देवेषु पंच य

देवानृषीन्नृभूतानि पितॄन्नात्मानमन्वहं ॥ स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५ ॥ यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः ॥ वैतानिकेन विधिना अग्निहोत्रादिना यजेत ॥ १६ ॥ न ह्यग्निमुखतोऽयं वै भगवान्सर्वयज्ञभुक् ॥ इज्येत हविषा राजन्यथा विप्रमुखे हुतैः ॥ १७ ॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः ॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु ॥ १८ ॥ कुर्यादपरपक्षीयं मासि प्रोष्ठपदे द्विजः ॥ श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥ १९ ॥ अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये ॥ चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु

ज्ञदेवतासु ॥ मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञं अंतर्यामिणं ॥ ब्राह्मणाननु मर्त्यादि यजेत ब्राह्मणयजनानंतरमन्येषु यजेत ॥ पाठांतरे ब्राह्मणाननं यस्य तं ॥ १८ ॥ प्रोष्ठपदे भाद्रपदे ॥ १९ ॥ २० ॥

राम
७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्ले मासि शुक्लपक्षे अस्य यत्तृतीयायामित्यर्थः हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टयेपि चया वर्जितोऽष्टकास्तास्तु ॥२१॥ संपूर्णचंद्र
पौर्णमासी राकाल्पेन्दुश्चंद्रासे वानुमतिः तथा ॥ मासर्क्षाणि तन्मासस्य नामग्रहणनिमित्तानि नक्षत्राणि युतानि यदा स्युः तदा ॥ तद्युक्ते
त्रिकाष्ट्यां ॥ पु ष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ॥ नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे इति ॥२२॥ अनुराधाश्रवणाउत्त

तृतीयायां शुक्लपक्षे नवम्यामथ कार्त्तिके ॥ चतुस्ष्वप्यष्टकास्तु हेमंते शिशिरे तथा ॥२१॥ माघे
च सितसप्तम्यां मघाराकाशमागमे ॥ एकाया वानुमत्या वा मासर्क्षाणि युतान्यपि ॥२२॥ द्वाद
श्यामनुराधास्याच्छ्रवणाश्विन्य उत्तरा निस्येकादशी वास्तु जन्मर्क्षं श्रोणायोगयुक् ॥२३॥ एते त
श्रेयसः कालानृणां श्रेयो विवर्द्धनाः ॥ कुर्यात्सर्वात्मनैतेषु श्रेयो मोघं न वायुषः ॥२४॥ एषु ला
भं जयो होमो व्रतं देवद्विजार्चनं ॥ पितृदेवनमस्तेभ्यो पदत्तं नंदनम्वरं ॥२५॥ ॥ ७

राफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा वा द्वादश्यां यदा स्यात् ॥ आसूत्तरासु एकादशी वा यदा स्यात्तदा च जन्मर्क्षं श्रोणायोगयुक् ॥ जन्मनक्ष
त्रस्य श्रवणास्य वा योगेन युक्तं दिनं यदा ॥ योगग्रहणां संबंधवाकल्यार्थी ॥२३॥ न केवलं श्राद्धस्यैवैते कालाः किंतु धर्ममात्रस्येत्याह ॥ तएव
इति ॥ द्वाभ्यां नृदेवआयुषः अमोघं सफलमित्यर्थः ॥२४॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰
॥७३॥

संस्कारकालेजीवायाः पुंसवनादिअपत्यस्यजातकर्मादि आत्मनोयज्ञदीक्षादि ॥ प्रेतस्यसंस्थादहनादिमृताहश्चसांवत्सरिकंयदा ॥ अत्य
स्मिन्नप्यभ्युदयार्थेकर्मणिश्रेयः कुर्यादित्यनुषंगः ॥२६॥२७॥ यत्रयस्मिन्सर्वमेतच्चराचरमस्तितस्यभगवतोबिंबंरूपंसत्पात्रंयत्रलभ्य

संस्कारकालेजायायाअपत्यस्यात्मनस्तथा ॥ प्रेतसंस्थामृताहश्चकर्मण्यभ्युदयेतथा ॥२६॥ अथ
देशान्प्रवक्ष्यामिधर्मादिश्रेयआवहान् ॥ सवैपुण्यतमोदेशःसत्पात्रंयत्रलभ्यते ॥२७॥ बिंबं
भगवतोयत्रसर्वमेतच्चराचरं ॥ यत्रहब्राह्मणाकुलंतपोविद्यादयान्वितं ॥२८॥ यत्रयत्रहरेरर्चा
सदेशःश्रेयसांपदं ॥ यत्रगंगादयोनद्यःपुराणेषुचविश्रुताः ॥२९॥ सरांसिपुष्करादीनिक्षेत्रा
ण्यार्हाश्रितान्युत ॥ कुरुक्षेत्रंगयाशिरःप्रयागःपुलहाश्रमः ॥३०॥ नैमिषंफाल्गुनंसेतुःप्रभा
सोथकुशस्थली ॥ वाराणसीमधुपुरीपंपाबिंदुसरस्तथा ॥३१॥ नारायणाश्रमोनंदासीतारामाश्र

ने ॥ सवैपुण्यतमोदेशः ॥२८॥२९॥ अर्हैर्हरेर्महतांवाश्रितानि ॥३०॥३१॥ मादयः सर्वेकुलाचलाराजन्महेंद्रमलयादयः ॥३२
सीतायाःरामस्यचाश्रमआदिर्येषां ॥ द्वयोःपृथक्पृथग्ग्रहणंवियोगकालाभिप्रायेण ॥३२॥ छ ॥

रांम
॥७३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्चाश्रिता अर्चास्थितस्य प्रतिमाश्रिताः सर्वे तु शालिग्रामशिलाद्यर्चनदेशा उक्ता इत्यपौनरुक्त्यं अत्र एषु देशेषु ईहितः कृतः सहस्रगुणमधिक-
स्य फलस्य उदयो यस्मात्तथा ॥३३॥ हरिरेव पात्रं निरुक्तं निर्णीतं ॥३४॥ न देवा हे देवेषु चऋषिषु च अर्हत्सु च तपोयोगादिसिद्धेषु ब्रह्मा-
त्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यदग्र्यसादच्युत एव पात्रतया संमतः ॥३५॥ संमतत्वे हेतुमाह ॥ जीवराशिभिर्व्याप्ते

एतेषु पुण्यतमो देशो हरेरर्चाश्रितास्त्वये ॥ एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ धर्मो
ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥३३॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ॥ हरिरेवैक उ-
र्वीश यन्मयं वै चराचरं ॥३४॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायां म-
तः पात्रतयाच्युतः ॥३५॥ जीवराशिभिराकीर्ण अण्डकोशाङ्घ्रिपो महान् ॥ तन्मूलत्वादच्युतेज्या
सर्वजीवात्मतर्पणं ॥३६॥ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो

सोऽत्र ह्यण्डकोश एव वृक्षोऽङ्घ्रिपः सर्वजीवानामात्मनस्तर्पणं ॥३६॥ एतदेव पुरुषनामनिरुक्त्या द्रढयति ॥ पुराणीति नृतिर्यगादिरूपाणि शरी-
राणि तेष्वन्तर्यामिरूपेण प्रत्यगंशेन च यतः शेते अतः पुरुष इति प्रसिद्धः ॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰

॥७४॥

तारतम्येनतिर्यगादिभ्यः पुरुषेयस्मादाधिक्येनवर्त्ततेतस्मात्सुरुषःपात्रं ॥ तत्रापियावानात्मज्ञानांशोयथायथाईयतेतपआदियोगेतयत्रयत्र
मनीयते ॥ तथातथासौपात्रमित्यर्थः ॥ तथाचश्रुतिः पुरुषत्वेचाविस्तरामात्मेत्यादि ॥३८॥ नहिप्रतिमादौहरेःपूजांकिमितिकुर्वंतिकुर्वंति
तथोत्राह ॥ दृष्ट्वेतिद्वाभ्यां ॥ मिथोवज्ञानमसन्मनस्तस्मिन्नात्मावुद्धिर्येषांभावंदृष्ट्वाक्रियायैपूजाद्यर्थाः ॥३९॥ हरिमुपासतेउपासितानाय

तेष्वेवभगवान्राजंस्तारतम्येनवर्त्तते ॥ तस्मात्पात्रंहिपुरुषोयावानात्मायथेयते ॥३८॥ दृष्ट्वातेषां
मिथोनृणामवज्ञानात्मतांनृप ॥ त्रेतादिषुहरेरर्चाक्रियायैकविभिःकृता ॥३९॥ ततोर्चायांहरिं
केचित्संश्रद्धायसपर्यया ॥ उपासतउपास्तापिनार्थदापुरुषद्विषां ॥४०॥ पुरुषेष्वपिराजेंद्रसुपात्रंब्रा
ह्मणंविदुः ॥ तपसाविद्ययातुष्ट्याधत्तेवेदंहरेस्तनुं ॥४१॥ नन्वस्यब्राह्मणाराजन्कृष्णस्यजगदात्मनः
पुनंतःपादरजसात्रिलोकींदैवतंमहत् ॥४२॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेधर्मानुवर्णनं
नामचतुर्दशोध्यायः ॥१४॥ ॥

चोपुरुषद्वेषिणामर्थदानभवति ॥ पुरुषेषुद्वेषंहित्वार्चितासतीसापिमंदाधिकारिणांपु
रुषार्थंप्रदाभवत्येवेत्यर्थः ॥४०॥ पुरुषेष्वेवजात्यातपआदिभिश्चपुनर्विशेषांतरमाह ॥ पुरुषेष्वपीतियोधत्तेतंसुपात्रंविदुः ॥४१॥ एतदेवकै
मुत्यन्यायेनद्रढयति ॥ नन्वस्येति ॥४२॥ इतिसप्तमेचतुर्दशः ॥१४॥

राम

॥७४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पंचदशेसर्ववर्णाश्रमनिबंधनं ॥ सारतः संग्रहेणाथवर्णयिनेमोक्षलक्षणं ॥ १ ॥ सर्वेषामपिमोक्षधर्माणांसारसंग्रहार्थमध्याय
रंभः ॥ तत्र आद्यगतान् विशेषानाह कर्मनिष्ठा इति स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥ २ ॥ कव्यानि पितॄननुद्दिश्यपदेयानि देवंचहव्यं
न्यपि तस्मैदेयानियथार्हतइति सर्वत्रज्ञानादितारतम्येन ॥ २ ॥ ३ ॥ ननु विस्तरः कुतः प्राप्नोयेन निषिध्यते तत्राह ॥ स्वजनानामप्य

श्रीनारदउवाच ॥ कर्मनिष्ठाद्विजाकेचित्तपोनिष्ठान्तथापरे ॥ स्वाध्यायेन्येप्रवचनेयेकेचि
त्ज्ञानयोगयोः ॥ १ ॥ ज्ञाननिष्ठायदेयानि कव्यानंत्यमिच्छता ॥ दैवेचतदभावेस्यादितरेभ्योय
थार्हतः ॥ २ ॥ द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा ॥ भोजयेत्सुसमृद्धोपिश्राद्धेकुर्यान्नवि
स्तरं ॥ ३ ॥ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानिच ॥ सम्यग्भवंतिनैतानिविस्तरात्स्वज
नार्पणात् ॥ ४ ॥ देशकालेचसंप्राप्तेमुन्यन्नंहरिदैवतं ॥ श्रद्धयाविधिवत्पात्रेन्यस्तंकामधु
गक्षय्यं ॥ ५ ॥

रणात् ॥ ज्ञामातावेतनिमंत्र्यतेततस्त्रियादयः कथंवर्ज्याइत्येवंप्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥ मुन्यन्नं आरण्यंव्रीह्या
दि ॥ हरिदैवतंहरेर्निवेदितंसत् ॥ ५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स०
॥७५॥

पुरुषात्मकं ईश्वरस्य रूपं ॥ ६ ॥ ७ ॥ दंडन्यासः ॥ हिंसायास्त्यागो यः ॥ एतादृशोन्यो नास्ति ॥ ८ ॥ अत एवोत्तमाधिकारिणो वाह्यानि
कर्माणि त्यजंतीत्याह ॥ अनीहाः निराशाः कामाः ॥ ज्ञानदीपिते आत्मस्फूर्त्तिमति आत्मसंयमने जुह्वति ॥ मनोनियम्य तं तारायत
यात्त्यजंतीत्यर्थः ॥ तदुक्तं सर्वज्ञसूक्तैः ॥ प्रत्यक्स्फूर्त्तिरसतत्स्फूर्त्तिमनुनिष्ठाविघातकं ॥ संलक्ष्य संत्यजेत्कर्मत्यजन्न विघ्नहतो

देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ॥ अन्नं संविभजन् पश्येत्सर्वं तत्पुरुषात्मकं ॥ ६ ॥ न र
घाद्यामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥ नैता
दृशः परो धर्मो नृणां सद्धर्ममिच्छतां ॥ न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥ एके
कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमनेनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥

यात्त्यजंतीत्यर्थः ॥ तदुक्तं सर्वज्ञसूक्तैः ॥ प्रत्यक्स्फूर्त्तिरसतत्स्फूर्त्तिमनुनिष्ठाविघातकं ॥ संलक्ष्य संत्यजेत्कर्मत्यजन्न विघ्नहतोन्यथे
ति ॥ ९ ॥ ॥

राम
॥७५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामयमेष ध्रुवं हन्यादिति कुतः अकरुणः तत्कुतः असुतृप् प्राणतर्पकः॥ तत्किं अतत्त्वज्ञः आत्मतत्त्वानभिज्ञः॥ तथा च श्रुतिः॥ नतं विदा
थ य इमा जजानान्यद्युष्माकमंतरं बभूव॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति॥१०॥ मन्युतमनुवर्णयति॥ तस्मा
दिति॥११॥ अधर्मवत्साक्षान्निषिद्धवत्॥१२॥ क्रममनाह स्वयं चापि व्याचष्टे धर्मबाधः धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्म

द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति॥ एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप् ध्रुवं॥१०॥ त
स्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित्॥ संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः॥११॥
विधर्मः परधर्मश्च आभास उपमा छलः॥ अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत्॥१२॥ ध
र्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः॥ उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः॥१३॥

बाधः अन्यस्य चोदितोऽन्यस्य परधर्मः॥ उपमेति व्याचष्टे॥ उपधर्मस्त्विति शब्दस्य भिन्नभेदः अन्यथा व्याख्यानं यस्मिन्॥ यथा दश
वरान् भोजयेदित्युक्ते दशभ्योवरानिति॥ शाब्दभिदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा॥ यथा गां दद्यादित्युक्ते मारिष्यसा गोर्दानं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰
॥७६॥

स्वधर्मानुष्ठानानंतरं धर्मे न्यूयस्त्वार्थमपि परधर्मो नानुष्ठेयो नुपयोगादित्याह स्वभावविहित इति ॥१४॥ किंच ॥ अधनो धर्मार्थं धनं नेहेत
नापेक्षेत ॥ धनार्थेन त्यागित्रियेनेति वा ॥ दैवोपपन्नेनैव स्वधर्मसिद्धेरुक्तत्वात् ॥ यात्रार्थमपि नेहेत स्वेतत्स्वरूपं वयत्ति अनीहेति सार्द्धैः ॥ सु

यस्त्विच्छयाकृतः पुंभिराभासो ह्याश्रमात्स्वयक् ॥ स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये ॥१४॥ ध
र्मार्थं चापि नेहेत यात्रार्थं वाऽधनो धनं ॥ अनीहाऽनीहमानस्य महाहेरिव वृत्तिदा ॥१५॥ संतुष्ट
स्य निरीहस्य स्वात्मारामस्य यत्सुखं ॥ कुतस्तत्कामलोभेन धावतोर्थेहया दिशः ॥१६॥ सदा संतुष्ट
मनसः सर्वाः शिवमया दिशः ॥ शर्करा कंटकादिभ्यो यथोपानत्पदः शिवं ॥१७॥ संतुष्टः केन वा
राजन्न वर्त्तेतापि वारिणा ॥ औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ॥१८॥ असंतुष्टस्य विप्र
स्य तेजो विद्या तपो यशः ॥ स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते ॥१९॥ ॥ ॥छ॥

द्भिः ॥१५॥१६॥ उपानहौ पादयोर्यस्य स उपानत्पादस्तस्य ॥१७॥ गृहपालः श्वानवदाचरति ॥१८॥ ॥१९॥ ॥ ॥छ॥ ॥

राम
॥७६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मुधात्तषाचजनः कामस्यांतंयाति ॥ अन्नोदकातिरिक्तस्यकामांतराभावात् ॥ क्रोधस्यचांतंयातिएतस्यक्रोधस्यपत्फलंहिंसातत्सोदपा
न्निष्पतेः दिशोजित्वापिभुवः सुत्काचिल्लोभस्यनैवांतंयातीत्यर्थः ॥ २० ॥ २१ ॥ इंद्रुतीकामादिजयोमायानाह ॥ असंककल्पा

कामंसंतंतंचस्तुनरूप्यांक्रोधस्यैतत्फलोदयात् ॥ जनोयातिनलोभस्यजित्वानुत्कादिशोनु
व ॥ २० ॥ पंडितावहवोराजन्बहुत्ताः संशयच्छिदः ॥ सदसस्पतयोप्येकअसंतोषात्पतंत्य
धः ॥ २१ ॥ असंककल्पाज्जयेत्कामंक्रोधंकामविवर्जनात् ॥ अर्थानर्थेक्षयालोभंभयंतत्वा
वमर्शनात् ॥ २२ ॥ आन्वीक्षिक्याशोकमोहौदंभंमहदुपासया ॥ योगांतरायान्मौनेनहिंसां
कायाद्यनीहया ॥ २३ ॥ ॥ ॥ ॥ ॥

दिनिचतुर्भिः जयेदितियथापेक्षमन्वेतिअर्थेअनर्थेदर्शनेन ॥ तत्वावमर्शनात्अद्वैतानुसंधानेन ॥ २२ ॥ अन्वीक्षिक्याआत्मानात्म
विवेकेन ॥ महतांसात्त्विकानांसेवया ॥ योगस्यांतरायाः नलोकवार्तादीन् ॥ २३ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येभ्यो भूतेभ्यो भयं जायेत तेषां वत्कृपया हिंसावर्जनेन ॥ दैवोपसर्गनिमित्तं हृद्या मनःपीडादि तदुक्तं याज्ञवल्क्येन ॥ विमनाविफलारंभः
संसीदत्यनिमित्ततः इति आत्मजं देहजं देहजं योगवीर्येण प्राणायामादिबलेन ॥ सत्त्वनिषेवया सात्विकाहारादिना ॥ २४ ॥ ननु कथं
गुरौ भक्त्या सर्वस्य जयः स्यात्तस्यापि मनुष्यत्वेन तदवस्थत्वात्तत्राह ॥ यस्येति ॥ मर्त्यासद्धीः मनुष्य इति दुर्बुद्धिः तस्य शास्त्र

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना ॥ आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ २४ ॥ र
जस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ॥ एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् ॥ २५ ॥ यस्य सा
क्षाद्भगवति ज्ञात्प्रधानपुरुषेश्वरः ॥ योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते नरं ॥ २६ ॥ ए
षवै भगवान्साक्षान दीपप्रदे गुरौ ॥ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् ॥ २७ ॥ ॥

श्रवणादिकं कुंजरस्नानवद्व्यर्थं ॥ २६ ॥ ननु गुरोः पितृपुत्रादयस्तं नरमेव मन्यंते अत आह ॥ एष गुरुः साक्षाद्भगवानेव लोकस्तु नरो
सावितिबुद्धिर्भ्रांतिरित्यर्थः यद्वा न हि तत्सुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानो पि गुरुर्भगवानेव भवेत् यथैव श्रीकृष्णस्तद्वदित्यर्थः ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं सर्वैरुपायैः कामादिवेगं जित्वा नियतेंद्रियो भूत्वा ध्यानपरो भवे ॥ इत्यर्थांतं प्रतिसर्वशास्त्रैवेफलं स्यादित्याह ॥ षड्वर्गेति ॥ सर्वा अपि नियमचोदनाः ॥ इष्टापूर्त्तादिविषयाः षडिंद्रियवर्गस्य यः संयमः तस्मैनैवैकस्मिन्नंतो यासां गतदेकपराइत्यर्थः ॥ नचतावतापि चरितार्था इत्याह ॥ तदंताः सत्योपि यदि योगान्धारणाध्यानसमाधीन्नो आवहेयुः नसाधयेयुः तर्हि केवलं श्रमावहा एवेत्यर्थः ॥२८॥ तदेवदृष्टांतेमाह ॥ यथावार्त्तादयः कृष्यादयः कृष्यादयः अर्थाः तत्फलानि च ॥ योगस्यार्थं ॥ मोक्षं

षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः ॥ तदंता यदि नो योगानावहेयुः श्रमावहाः ॥२८॥ यथा वार्त्तादयो ह्यर्था योगस्यार्थं न विभ्रति ॥ अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथासतः ॥२९॥ यश्चित्तवि जये यत्तः स्यान्निःसंगोपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥३०॥ देशे शुचौ स मेराजन्संस्थाप्यासनमात्मनः ॥ स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ॐ मिति ॥३१॥ ॥ ॥

नसाधयंति ॥ प्रत्युत अनर्थाय संसाराये वच अस तो वहिर्मुखस्येष्टापूर्त्तादि यथा ॥२९॥ एवं योगं युंजतोपि यस्य कुटुंबादि संयोगेन चित्तं विक्षिप्येत तस्यैकांतसमाह ॥ यश्चित्तस्य विजये यत्तः उद्युक्तः स भिक्षुः स्यात ॥ तथा च स्मृतिः ॥ द्वंद्वाहतस्य गार्हस्थ्ये ध्यानभंगा दिकारणं ॥ लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्नितिनिष्किंचनमिताशनो यस्य ॥३०॥ ऋतुसममंगं यस्य सः सुखेयथा भवतेि

वमीमानदीपिकायांवसमस्कंधस्य ॥ ह० ॥

भा॰ स॰ ३२।३३॥ एवमनिशमभ्यस्यतस्तस्ययतेःचित्तंनिर्वाणंशांतिंयाति॥३४॥ नचपुनर्विक्षिप्येतेत्याह॥ कामादिभिरक्षुभितंयत्॥ चित्तं
॥७८॥ मन्नोत्तिष्ठेतयतःप्रशान्ताअखिलावृत्तयोयस्य॥ कुतःब्रह्मसुखेनस्पृष्टं॥३५॥ यस्तुप्रव्रज्याकृत्वाभोगलिप्सुःस्यात्तंनिंदति॥ य

प्राणापानौसंनिरुंध्यात्पूरकुंभकरेचकैः॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः॥३२॥
यतोयतोनिःसरतिमनःकामहतंभ्रमत्॥ ततस्ततउपाहृत्यहृदिरुंध्याच्छनैर्बुधः॥३३॥ एवम
भ्यसतश्चित्तंकालेनाल्पीयसायतेः॥ अनिशंतस्यनिर्वाणंयात्यनिंधनवह्निवत्॥३४॥ कामा
दिभिरनाविद्धंप्रशांताखिलवृत्तियत्॥ चित्तंब्रह्मसुखस्पृष्टंनैवोत्तिष्ठेतकर्हिचित्॥३५॥ यः
प्रव्रज्यगृहात्पूर्वंत्रिवर्गावपनात्पुनः॥ यदिसेवेततान्भिक्षुःसवैवांताश्यपत्रपः॥३६॥ यैः
स्वदेहःस्मृतोनात्मामर्त्योविट्कृमिभस्मसात्॥ तएनमात्मसात्कृत्वाश्लाघयंतिह्यसत्तमाः॥३७॥

इति॥ त्रयाणांधर्मादीनांवर्गःआसमंताद्रुप्यतेयस्मिन्तस्माद्गृहात्तान्धर्मादीन्वांताशीछर्दितभोजीनिर्लज्जश्चसः॥३६॥ नचेद राम
मघटितंहृष्टत्वादित्याह॥ यैःपूर्वंस्वदेहः॥ अनात्मादिरूपःस्मृतःचिंतितः॥ तएवपुनरेनमात्मेतिमत्वाश्लाघयंतिलालयंतिहि॥३७॥ ॥७८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतिमुपलक्ष्य सर्वाश्रमस्यान्यानपि स्वधर्मत्यागिनो निंदति गृहस्थस्येति द्वाभ्यां ॥३८॥ न चात्मनस्तत्त्वस्य भिक्षोरिंद्रियलौल्येऽपि को दोषस्तत्रा
ह ॥ आत्मानं परं ब्रह्म चेत् जानीयात् ॥ ज्ञानेन धुतो निरस्त आशयो वासना यस्य तस्य ज्ञानिनो लौल्यमेव न संभवतीत्यर्थः ॥ तथा च श्रु
तिः ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति ॥४०॥ अज्ञस्य तु लौल्येन नरक

गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि ॥ तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोलता ॥३८॥ आ
श्रमापसदा ह्येते खल्वाश्रमविडंबकाः ॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया ॥३९॥ आत्मानं
चेद्विजानीयात्परं ज्ञानधुताशयः ॥ किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ॥४०॥ आहुः श
रीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशं ॥ वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बंधु
रमीशसृष्टं ॥४१॥ ॥

पातापत्तेः स्वमतेनैव तस्य ज्ञानेन यतितव्यमितीममर्थं आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिश्रुत्युक्तरथरूपकद्वारेणाह
आहुरिति षड्भिः ॥ इंद्रियेशं मनोऽभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि मार्गान् देशानाहुः ॥ सत्वं चित्तं बृहत् देहव्यापि बंधु
रं बंधनं ॥ चित्तं विना ह्यनिर्वद्धमिव शरीरमवतिष्ठेत ईशसृष्टमिति बंधनकर्तृत्वात् ईशएवैक्यध्यः ॥४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणादयः पंच ॥ नागः कूर्मश्च कृकलो देवदत्तो धनंजयश्चेत्येवं दशविधं प्राणाम स्वं अभिमानं साहंकारं जीवं रथिनं मुख्यं जीवं शरं ॥ प
रं ब्रह्म लक्ष्यं ॥ यथा धनुषा शरो लक्ष्ये निपात्यते ॥ तथा प्रणवेन जीवो ब्रह्मणि निपात्यते इत्यर्थः ॥ ४२ ॥ रागादयो जेतव्याः शत्रवः ॥ ४३ ॥
नत्रऽस्तोऽभिनिवेशः क्वचिद्रारूढसमाधेः सत्त्वप्रकृतयोऽपि परोपकारादिप्रवृत्तरूपाः शत्रवः ॥ ४४ ॥ न कायरूपं रथं आत्मवशः उपक

अमुं दशप्राणमधर्ममधर्मौ चक्रेऽभिमानं रथिनं च जीवं ॥ धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमे
व लक्ष्यं ॥ ४२ ॥ रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोऽवमानोऽसूया च माया हिंसा च म
त्सरः ॥ ४३ ॥ रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयः सत्त्वप्रकृतयः क्व
चित् ॥ ४४ ॥ यावन्न काय रथमात्मवशोपकल्पं धत्तेऽगरिष्ठचरणार्चनपानिशानं ॥ ज्ञानासि
मच्युतबलोदधटस्तरान्तुः स्वराज्यतुष्टउपशांतरदं स्वजह्यात् ॥ ४५ ॥ ॥ छ ॥

ल्पं इंद्रियादिपरिष्कारो यस्मिन् तथाभूतं यावद्धत्ते ॥ तावदेव गरिष्ठानां गुरूणां चरणसेवयानिशितं ज्ञानखड्गं विभ्रत् ॥ अच्युताश्रयः सन्नि
त शत्रुरुपशांतः स्वानंदेन तुष्टो नूत्ना इदं राज्यादिकमुपेक्षते सर्वं ॥ ४५ ॥ ॥ श्री० ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अच्युताश्रयाभावे बाधकमाह ॥ नोचेदिति ॥ असंतो वहिर्मुखा यदींद्रियवाजिनः सूतश्चेते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयदस्युषु
निक्षिपंति ॥ हयैः सूतेन च सहवर्तमानं तमोंधे तमसा व्याप्ते ॥ उरु मृत्युभयं यस्मिन् ॥ ४६ ॥ ननु च वेदविहिते ष्वप्रवृत्तौ हिंका
रिणः पुंसः कथमेवमनर्थप्राप्तिः स्यादित्याशंक्य वेदोक्तकर्मणो द्वैविध्यं दर्शयन् फलभेदमाह ॥ प्रवृत्तं चेति दशभिः ॥ ४७ ॥

नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नी ॥ त्वोत्पथं विषयदस्युषु निक्षिपंति ते दस्यवः सहय
सूतममुं तमोंधे संसारकूप उरुमृत्युभये क्षिपंति ॥ ४६ ॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदि
कं ॥ आवर्तते प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतं ॥ ४७ ॥ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशां
तिदं ॥ दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥ ४८ ॥ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहु
तमेव च ॥ पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं ॥ ४९ ॥

हिंस्रं श्येनादिकर्म ॥ अशांतिदं अत्याशक्तियुक्तं आ
दिशब्दार्थविवरणं दर्शश्चेति पशुः पशुयागः ॥ सुतः सोमयागः ॥ ४८ ॥ ॥ श्रीगोविंदायनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥८०॥

हुतं वैश्वदेवं॥ प्रहुतं वैश्वदेवं॥ प्रहुतं बलिहरणं॥ एतत्सर्वमिष्टमुच्यते॥ एतदेव यदि काम्यं अग्न्याधानादि चेत्तर्हि प्रवृत्तारम्भमपीत्यर्थः
ओजीवंप्रपाद्वि॥४९॥ प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह॥ द्रव्यसूक्ष्मपुरोडाशादेः सूक्ष्मो विपाकः परिणा
मो देहांतरारंभकः येन संपरिषक्तो गच्छति॥ यदाह वसूनां वसुधैनेक्तः॥ इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति॥ पा
ठांतरे द्रव्यशब्देन तेजोमात्राशब्दोक्तानींद्रियाणि उच्यन्ते विपाकशब्देन हृदयाग्रप्रद्योतः तथा च श्रुतिः स एतास्तेजोमात्राः समभ्या
ददानो हृदयमेवान्ववक्रामतीति॥ तथा तस्य हृदयस्याग्रं प्रद्योतते तेन एष आत्मा निष्क्रामतीति॥ धूमादिशब्दैस्तत्तदभिमानिन्यो

द्रव्यसूक्ष्मविपाकस्थो धूमो रात्रिरपक्षयः॥ अयनं दक्षिणं सोमो दर्शो औषधिवीरुधः॥५०॥ अन्नं
रेत इति क्ष्मेश पितृयानं पुनर्भवः॥ एकैकश्येनानुपूर्व्यं भूत्वा भूत्वेह जायते॥५१॥ निषेकादि श्म
शानांतैः संस्कारैः संस्कृतो द्विजः॥ इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति॥५२॥ ॥ ७॥

देवताः॥ तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहप्रकारमाह दर्शोऽदस्यादि॥ दर्श इति॥ विपरीतलक्षण
या विशिष्टभोगस्य यशोकान्तिना देहलयेनादर्शनमुच्यते एतदुक्तं भवति॥ भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकैर्देवताभिः सोमलोकं
प्रापितस्तद्भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधीवीरुधादिसाम्यापत्तिक्रमेण जायते॥ एवं पुनर्भवहेतुः पितृयानं प्रवृत्तमार्गम
ति॥४९॥ क्ष्मेश हे भूपते पुनर्भवमेवाह॥ एकैकश्येन प्रत्येकं क्रमेणानुभूत्वा तत्तत्साम्यमापद्य इह भूमौ जायते॥५१॥ तत्राधिकारिणमा
ह॥ निषेकादिति॥ जन्मप्रभृत्विष्टादिकार्यपर्यंतं जन्मनः लभत इत्यर्थः
निवृत्तकर्मनिष्ठस्योपासनाविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्म
लोकप्राप्तिमाह॥ इंद्रियेष्वित्यादिना यज्ञाद्रव्यप्रत्येषु हिंसाया
दुर्वारत्वादिति मुख्यं निवृत्तकर्मैव दर्शयन्नाह॥ ज्ञानेन दीप्यंत
इति॥ तथा तेषु इंद्रियव्यापाराणामिष्टासक्तौ दीर्वामिंद्रियता
वन्मात्रानां भावयंतीत्यर्थः एवमुत्तरत्रापि॥५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मैर्दर्शनादिसंकल्परूपेमनसि ॥ वैकारिकंविकारउक्तंमनोवाचि ॥ विद्याद्दिलक्षणयावाचाहिमनः कर्तृत्वादिविकारंभजति ॥ वर्णानांसमाम्नायेसमुदायेतिद्विशेषत्वाद्व्याच ॥ स्वरेअकारादिस्वरत्रयात्मके ॥५३॥ ॐकारंविंदेत् ॥ तंचनादे ॥ प्राणेसूत्रात्मनिमहतिबुद्धौ ॥ अग्निरितितन्नरभिमानिन्योदेवताः ॥ ताः प्राप्नोतीतिपूर्ववत् ॥ दिवाह्नः प्राह्णस्तस्यैवांताः ॥ राकाशुक्लपक्षस्तानः यद्वा प्राह्णेराकेतिचपुराणमतं ॥ उत्तरमयनंस्वराट्स्वतोह्या ॥ एवंब्रह्मलोकगतस्यभोगावसानेमोक्षप्रकारमाह विश्वइतिविश्वःस्थूलोपाधिः सस्थूलंसूक्ष्मेविलाप्यसूक्ष्मोपाधिस्तैजसोभवति ॥ सूक्ष्मंचकारणेविलाप्यकारणोपाधिः प्राज्ञोभवति कारणंच

इंद्रियाणांमनस्यर्मैर्वाचिवैकारिकंमनः ॥ वाचंवर्णसमाम्नायेतमोंकारेस्वरेन्यसेत् ॥५३॥ ॐकारंबिंदौनादेतंतंतुप्राणेमहत्यमुं ॥ अग्निःसूर्योदिवाप्राह्णःशुक्लोराकोत्तरंस्वराट् ॥ विश्वश्चतैजसःप्राज्ञस्तुर्यआत्मासमन्वयात् ॥५५॥ देवयानमिदंप्राहुर्भूत्वाभूत्वानुपूर्वशः ॥ आत्मयाज्युपशांतात्माह्यात्मस्थोननिवर्तते ॥५५॥ यएतेपितृदेवानामयनेवेदनिर्मिते च सुषावेदजनस्यापिनमुह्यति ॥५६॥

सर्वसाक्षित्वेनान्वयात्साक्षिस्वरूपेविलाप्य तुर्योभवति ॥ तेषांचव्यभिचारिणांसाक्ष्यारणेलयेशुद्धआत्माभवतिमुच्यतइत्यर्थः ॥५५॥ यएतेतरोभूत्वानिवर्ततेनेनयानेननिवर्ततइत्यर्थः ॥५५॥ वेदेननिर्मिते ॥ तेधूममभिरंभवतीत्यादिनाअर्चिरमिसंभवतीत्यादिनाच ॥ निश्चयेनविविच्यज्ञापितेइत्यर्थः ॥ जनस्यादेहस्यापिनमुह्यति ॥५६॥

भा॰ स॰ ॥ ८१ ॥

तत्र हेतुमाह ॥ आद्यावितिजनानां देहादीनां आदौ कारणत्वेन अंते चावधित्वेन यत्सत् ॥ तथा बहिर्भोग्यप्रसंगं भोक्तृ ॥ परमवरं च उच्चं नीचं
तमोप्रकाशः ज्योतिः प्रकाशः तत्तु सर्वं अयं ज्ञानी स्वयमेव तत्तस्माद्व्यतिरिक्तं वस्तु किंचिदस्ति ॥ येन मुह्येदित्यर्थः ॥ ५७ ॥ ननु तर्हि
कथं पृथगर्थतया प्रतीयते तत्राह ॥ आबाधितः तर्कविरोधेन सर्वतो बाधितोपि आभासः प्रतिविवादिः वस्तुतया यथास्म
तः ॥ तद्द्वैतं द्वैतं दीपकं सर्वमर्थ तेन विकल्पितं न तु परमार्थतः दुर्घटत्वात् ॥ ५७ ॥ तदेवाह ॥ क्षित्यादीनां पंचभूतानां छायारेकावुद्ध

आद्यावंते जनानां सद्बहिरंतः परावरं ॥ ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिः स्वयं स्वयं ॥ ५७ ॥ आबाधितो
पि ह्याभासो यथा वस्तुतयास्मृतः ॥ दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितं ॥ ५८ ॥ क्षित्यादीनाम
िहार्थानां छाया न कतमापि हि ॥ न संघातो विकारोपि न पृथक् नान्वितो मृषा ॥ ५९ ॥

लं वत्तरूपं देहादिसंघातारंभपरिणामानां मध्ये कतमापि अन्यतमा न भवति ॥ न तावत्तेषां संघातः ॥ वृक्षाणामिव वनं ॥ एकदेश
कर्षेणोसर्वाकर्षणानुपपत्तेः ॥ न ह्येकस्मिन् वृक्षे आकृष्टे सर्वं वनमाकृष्यते ॥ नापि विकारः ॥ आरब्धो अवयवी अपिशब्दात्प
रिणामोपि ॥ कुतः सर्किस्वावयवेभ्यो वा परिणामेभ्यो वा पृथक् तदन्वितो वा ॥ न तावदवयवेभ्यः पृथक् ॥ तथा अप्रतीतेः ॥ न चान्वितः सर्कि राम
प्रत्यवयवं तत्र वोप्यन्वेति अंशेन वा ॥ आद्ये अंगुलिमात्रेऽपि देहबुद्धिः स्यात् ॥ द्वितीये तस्याप्यंशांशीकारे सत्यनवस्था स्यात् अतो मृ ॥ ८१ ॥
षैवेत्यर्थः ॥ ५८ ॥ ५९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंदेहादौर्मिथ्यात्वमुक्त्वा तद्धेतुत्वोक्त्यस्मिन्नादीनामपि मिथ्यात्वमाह ॥ धारयंतीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अ
वयवित्वात्तेषामपि तर्हि अवयवः सत्य इति चेत्तत्राह ॥ उक्तप्रकारेणावयविन्यसतिअवयवोप्यनणोसन्नेव स्यात् ॥ अवयवी प्रतीयमान
त्वानुपपत्तिं विना न सद्भावे प्रमाणाभावादित्यर्थः ॥ तदुक्तं पंचमस्कंधे एवं निरुक्तं क्षितिशब्दवृत्तमित्यादि ॥ वस्तुतः परमात्मनोविवि
कल्पेभेदे असति ॥ यद्वा वस्तुनो ऽविद्ययाविकल्पेसति पूर्वोरोपसादृश्यमपत्तस्यैवेति भ्रमः स्यात् ॥ एवं तावद्देवयावदप्रिया निवृ

धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ॥ न स्युर्ह्यऽसत्यवयविन्यसन्नऽवयवोऽनणुः ॥५९॥
स्यात्ताहृस्य सम्मसत्वावद्विकल्पेसति वस्तुनः ॥ जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधतः ॥६०॥
भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं यथात्मनः ॥ वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मु
नि ॥६१॥ कार्यकारणवस्त्वैकामर्शनं पटतन्तुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्य

ते ॥ ननु सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधधर्मा कथं तत्राह ॥ स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ॥६०॥ इदानीं ते ॥६१॥
मुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति ॥ भावाद्वैतमिति चतुर्भिः वर्तयन्नालोचयन् ॥ स्वानुभूत्यात्मतत्त्वानुभवेन त्रीन् जाग्रदा
दीन् त्रय आवस्थाः स्वप्नाः इति श्रुतेः ॥ यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ॥ ततस्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः ततो मल

साधीनिमित्तरूपत्वेनैवेसंभोग्यावसमितितलीयः। गात्वयुक्तं
निर्वकलीपति ॥६२॥ कार्यकारणार्थेक[illegible]भावेन जातीतिवंत

६३

मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा ॥ उद्देश्यफलभेदो हि क्रियाभेदो हेतुः ॥ ईश्वरार्प्पणेचनद्भावात् ॥ क्रिया
णामैद्वैतं ॥ ६४ ॥ आत्मनः स्वस्य जायादीनां च स्वार्थस्य कामस्य च तयोः देहादीनां पंचभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोच
नेनार्थकामयोर्यदैक्यदर्शनमित्यर्थः ॥ ६५ ॥ उक्तानां त्रयाणां धर्माणां संक्षिप्याह यदिति यत द्रव्यं ॥ येनोपायेन यत्नः काशात् ॥ ६६ ॥ प्र
स्तुतमुपसंहरति ॥ अस्य श्रीकृष्णस्य गाति ॥ नद्भक्तिभाक्तस्य भक्तः ॥ ६७ ॥ एतच्च सर्वसाधारणमुक्तं भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहे

यत्तु सर्वाणि परेशे साक्षात्सर्वकर्मसमर्पणं ॥ मनोवाक्कृततनुभिः पार्थक्रियाहि तं तदुच्यते ॥ ६४ ॥ आत्मजा
यासुतादीनामप्येषां सर्वदेहिनां ॥ यत्स्वार्थकामयोरैक्यं दृश्या हि तं तदुच्यते ॥ ६५ ॥ यद्यत्स्वभावऽनि
पितं स्याद्येन यत्र यतोन्तप ॥ स तेनेहेत कार्याणि नरो नान्यैरनापदि ॥ ६६ ॥ एतैरन्यैश्च वेदोक्तैर्वर्त्तमा
नः स्वकर्मभिः ॥ इहैव स्यागतिं पापाद्राजं सद्भक्तिभाग्नरः ॥ ६७ ॥ यथा हि मृत्युं न पदं वदन्त्यजा

नुरितिपाठे वा नैव लक्ष्मीकृष्णा हयथाहीजि ॥ हेतप वपे पद्मरागादुत्तरतात्मनः प्रभोः ॥ यत्पादपंकेरुहसेवया भवान्
हैवैश्रमसदायैर्दुस्त्यजादिनिवा ॥ आत्मनः श्रीकृष्णादेवप्रेमोहितोः अडभावः आर्षः उत्कर्षेणानन्तरते इत्यर्थः यथायथावत् ॥ तमेव भज
नेति शेषः ॥ यद्वा ॥ यथा आपद्मरागादुत्तीर्णस्त्वं यथा चक्रे नतत ॥ अहार्षीत् ॥ तथा श्रीकृष्णादेवनारकात्संसारादप्युत्तरतेत्यर्थः ॥ ६८ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिदर्शयन्स्वदर्वृत्तांतमाह॥अहमितिसार्द्धैः पंचभिः नाम्नाउपवर्हेणः॥६९॥ पेशलंसौकुमार्यरूपादिभिः प्रियंदर्शनंयस्य ७०

अहंपुराभवंकश्चिद्गंधर्वउपवर्हणः॥ नाम्नातीतेमहाकल्पेगंधर्वाणांसुसंमतः॥६९॥ रूप
पेशलमाधुर्यसौगंध्यप्रियदर्शनः॥ स्त्रीणांप्रियतमोनित्यंमत्तःपुरुलंपटः॥७०॥ ए
कदादेवसत्रेतुगंधर्वाप्सरसांगणाः॥ उपहूताविश्वसृग्भिर्हरिगाथोपगा
यने॥७१॥ अहंचगायंस्तद्विद्वान्स्त्रीभिःपरिवृतोगतः॥ ज्ञात्वाविश्वसृजस्तन्मेहेल
नंशेपुरोजसा॥ ७२॥ ॥ श्रीगोविंदायनमः ॥ ७ ॥

नतद्व्हानंविद्वानउन्मत्तःगायन्निवगतः॥७१॥ ७२॥ ॥ श्रीगोविंदायनमः॥ ७ ॥ श्री०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७३॥ ७४॥ त्वंतुकृतार्थएवेतिहर्षेणपुनःपूर्वोक्तान्श्लोकानेवपठतिपश्यमितिशेषंस्पष्टं॥७५॥ ७६॥ ७७॥ ७८॥

याहित्वंमृदुगामाशुनष्टश्रीःकृतहेलनः॥ तावद्दास्यामहंजज्ञेतत्रापिब्रह्मवादिनां॥७३॥
शुश्रूषयानुषंगेणप्राप्तोहंब्रह्मपुत्रतां॥ धर्मस्तेगृहमेधीयोवर्णितःपापनाशनः गृह
स्थोयेनपदवीमंजसान्यासिनामियात्॥७४॥ यूयंनृलोकेवतभूरिभागालोकंपुनाना
मुनयोऽभियंति॥ येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगं॥७५॥ सवाऽयं
ब्रह्ममहद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वःखलुमातुलेयआत्मार्हणी
योविधिकृद्गुरुश्च॥७६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७७॥७८॥७९॥८०॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेगूढार्थपदतिश्रीधरनिर्मितटीकायांसप्तमेपंचदशोऽध्यायः ॥१५॥ ॥

नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णितं ॥ मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषससात्वतांपतिः ॥७७॥ श्रीशुकउवाच ॥ इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः ॥ पूजयामाससुप्रीतःकृष्णंचप्रेमविह्वलः ॥७८॥ कृष्णपार्थावुपामंत्र्यपूजितःप्रययौमुनिः ॥ श्रुत्वाकृष्णंपरंब्रह्मपार्थःपरमविस्मितः ॥७९॥ इतिदाक्षायणीनांतेपृथग्वंशाःप्रकीर्तिताः ॥ देवासुरमनुष्याद्यालोकायत्रचराचराः ॥८०॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेपारमहंस्यांसंहितायांप्रल्हादानुचरितेयुधिष्ठिरनारदसंवादेपंचदशोऽध्यायः ॥१५॥

॥ श्रीकाशीविश्वेश्वरायनमः ॥ छ ॥ श्री० ॥ छ ॥ श्री०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥भागवतेसप्तमस्कंधसमाप्तः१२८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥भागवते ष. छस्कंधप्रारंभः पत्र १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ पुण्यारण्ये ... सिंहैकनामसिंहो विराजते ॥ यन्नादतः पलायन्ते महाकल्मषकुंजराः ॥ विसर्गे हि भगवान्जीवान्स
मर्यादानुगृह्यनाव ॥ विष्णुः पात्यखिलेलृहपेरित्येवं पंचमे स्थिते ॥ अध्यायैकोनविंशत्या षष्ठे पोषणमुच्यते ॥ अतिलंघितमर्यादस्य
करक्षणात्स्मृतं ॥ अजामिलो मनुष्येषु महापापोपयावितः ॥ विष्णुरूपारिघातीव यथा देवेषु वासवः ॥ अजामिलस्य नरकस्तोवि
मुहूर्तैर्निरूपितं ॥ संकेतनामयन्नामसुतस्नेहानुषंगतं ॥ इंद्रोपि भगवद्भक्तः सत्स्नेहोपि द्रोहेतवक्रं ॥ तदधीनसुरैश्वर्यपेक्षात्तु नं
विनः ॥ तत्राद्यैस्त्रिभिरध्यायैरजामिलकथोच्यते ॥ विश्वरूपकथा षड्भिरिन्द्रदोषो क्षयेत नः ॥ ... सैवतु दोषोपाक्षैव त्वाख्यानेत ते

राजोवाच ॥ निवृत्तिमार्गः कथित आदौ भगवता यथा ॥ क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥

श्रमिः ॥ ह्याभ्यां नमस्तस्मै व्याख्याने मे वंशकरणाक्रम ॥ तत्राद्ये प्रथमे विप्रो हूतैः पातकिमोचने ॥ तत्यापरस्याप नामोक्ते या
म्येदैर्मोदितसत्तां ॥ अथ षष्ठस्कंधो व्याख्यायते ॥ वृत्तोक्तानुवादपूर्वकं निरंतरोक्तनरकपरिहारोपायं पृच्छति निवृत्तिमार्ग इ
ति षड्भिः ॥ आदौ द्वितीयस्कंधे वैष्णानं रयामीत्यादिना भगवता तत्यायथा यावत् यतयेन मार्गेण क्रमेण योगो विरोहद्यादिः तेन
पलब्धो व्यसातेन सहा संसृतिमोक्षो भवति ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमि
ति वचनात् ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्यं यस्य न लीना प्रकृतिर्यस्य तस्य पुंसः पुनः पुनर्गुणात्मपि भोगार्थदेहारंभरूपो मोमार्गः सच कथित इत्यर्थः ॥२॥ नर
यदक्षिणेन पथा अर्यमाः पितृलोकं व्रजंतीत्यादिना २ अनुवर्णिताः निरूपिता ध्याये ॥ व्याख्यात इत्यर्थः चतुर्थ्यादौ ॥ यतः यस्मिन् ॥३॥ द्वीपादि
न भागतो लक्षणतो मानतश्च ॥४॥ धरामंडलस्य संस्थानं ज्योतिषां विवराणां च इदं संस्थानं विभुर्यथासृजत् तथा व्याख्यातमित्यर्थः ॥५॥ ना

प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ॥ योसावलीनप्रकृते गुणसर्गः पुनः पुनः ॥२॥ अधर्मलक्ष
णा नानानरकाश्चानुवर्णिताः ॥ मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥३॥ प्रियव्रतोत्तान
पदोर्वंशस्तच्चरितानि च ॥ द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥४॥ धरामंडलसंस्थानं भा
गलक्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥५॥ अधुनेह महाभाग यथैव नर
कान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥६॥ श्रीशुक उवाच ॥ न चेदिहैवापचितिं य
थांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ॥

नानाउग्रा यातना येषु तान् नरकान् यथा येनोपायेन न ईयात् न गच्छेत् तन्मे अधुना व्या
ख्यातुमर्हसि ॥६॥ तत्र तावत् प्रायश्चित्तं विना नरकाद्दुर्निवारा इत्याह न चेदिति द्वाभ्यां मनउक्तिपाणिभिर्मनोवाक्कायैः ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰ ॥ २ ॥

कृतस्यांहसस्तैरेवद्वारैर्वा पापचितिं प्रायश्चित्तं न कुर्याच्चेत्तर्हि पुरुषः प्रेत्य मरणानंतरं कान्नरकानुपैति ॥ ये मया ये भवतः कीर्तिताः तिग्मा दारु
णा यातना येषु तान् ॥ ७ ॥ यस्मादेवं तस्मात्सर्वस्य निष्कृतौ प्रायश्चित्ते यतेत ॥ कदा मृत्योः पुरैव ॥ तत्रापि अविपद्यमाने अम्रियमाणे न
आत्मना देहेन ॥ यद्वा अविपन्नः विपत्तिरहितो यावत् ॥ यतात्मना संयतेन मनसा ॥ तत्रापि आशु ॥ अन्यथा अतीते चिरकाले तु दुष्करं

ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥ तस्मात्पुरैवाश्विह पापनिष्कृ
तौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चिकित्सेत रुजां निदा
नवित् ॥ ८ ॥ राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं ॥ करोति भूयो विवशः प्रा
यश्चित्तमथो कथं ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥

व्रतं महतीति हेतुगुण्यापत्तेः ॥ तत्र च पापस्य महत्त्वमल्पत्वं चावेक्ष्य तत्तदनुरूपे प्रायश्चित्ते यतेत रुजां रोगाणां निदानविद्यथा वैद्यस्तदनु
रूपं चिकित्सेत तद्वत् ॥ ८ ॥ अत्र चोदयति द्वाभ्यां ॥ दृष्टं राजदंडादि ॥ श्रुतं नरकपातादि ॥ ताभ्यामात्मनः पापमहितं जानन्नपि भूयः प्रा
यश्चित्तानंतरं करोति ॥ अथो अतः कारणान्न ह्यादृशाचारादिकं कथं प्रायश्चित्तं ॥ तेन न सम्यक् दोषस्यानिवृत्तेः ॥ निवृत्तौ वा पुनश्च पापप्ररोहात् ॥

राम ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच कश्चित्कदाचित् अभक्ष्यभक्षणात्पापान्निवर्त्तेत ॥ कश्चित्तु देववशान्नराचरति ॥ यथा कुंजरः स्नातोपि रजोभिरात्मानं मलिनीकरोति ॥ तथा पापस्य
पुनर्दुर्निवारत्वेन नरः कथं तस्याव्रसंभावितात्प्रायश्चित्तं कार्यमिति ॥ १० ॥ परिहरति ॥ कर्मणा कृच्छ्रादिप्रायश्चित्तेन ॥ कर्मणः पापस्य
निर्हारेण नाशः आत्यंतिकः संपन्नो न हीयते ॥ अविद्वानधिकारी यस्मिन् तस्य भावस्तत्वं तस्मात् ॥ अतो विद्यापानाद्याभावात् नष्टेपि न

कश्चिन्निवर्त्ततेऽभक्ष्यात्कश्चिच्चरति तत्पुनः प्रायश्चित्तमथोऽपार्थमन्ये कुंजरशौचवत् ॥ १० ॥ श्री
बादरायणिरुवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते ॥ अविद्वदधिकारित्वात्प्रायश्चि
त्तं विमर्शनं ॥ ११ ॥ नाश्नतः पथ्यमेवान्नं व्याधयोभिभवंति हि ॥ एवं नियमकृद्राजन् शनैः क्षेमा
य कल्पते ॥ १२ ॥ ॥ ॥ ॥

स्मिन्पापे तत्संस्कारेण पापांतरस्य पुनः पुनः प्ररोहो भवत्येव ॥ किं नर्हि मुख्यं प्रायश्चित्तं तदाह ॥ प्रायश्चित्तं तु विमर्शनं ज्ञानं ॥ ११ ॥ ननु नि
यमप्रमत्तः शनैर्लभेते ॥ नान्यदृष्टांतमाह ॥ नेति ॥ पथ्यमेवान्नमश्नतः क्षुल्लपानं यथा व्याधयो न बाधंते तथा नियमादिकर्त्ता क्षेमाय
तत्त्वज्ञानाय समर्थो भवति ॥ १२ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰
॥ ३ ॥

एतदेव विशदयति द्वाभ्यां ॥ तपसा ऐकाग्र्येण ॥ मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तप इति स्मृतेः ॥ ब्रह्मचर्येणाष्टांगेन ॥ तदुक्तं ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं ॥ शमो मनसो नियमनं ॥ दमो बाह्येंद्रियाणां ॥ त्यागो दानं ॥ यमोऽहिंसादिः ॥ नियमो जपादिः ॥ ९ ॥ अन्यानि दुष्क

तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ ९ ॥ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥ १० ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥ ११ ॥ न तथा ह्यघवान्राजन्पूयेत तप आदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १२ ॥ ॥ ॥

रत्वात् मुख्यमेवान्यसाधनमित्याह ॥ केचिदिति ॥ नैवं मता भक्तिप्रधाना विरला इति दर्शयति ॥ केवलया तप आदिनिरपेक्षया ॥ वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् ॥ किंत्वन्येषामश्रद्धया तत्राहे यदेतैर्यो वासुदेवपरायणत्वस्तेष्वेव पर्यवसानादनुवादमात्रं ॥ ११ ॥ एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह ॥ न तथा पूयेत शुद्धेन तत्पुरुषनिषेवया ॥ कृष्णार्पिताः प्राणा येन ॥ १२ ॥ एम ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र हेतुः सध्रीचीनः समीचीनः ॥ अयं पंथाः भक्तिमार्गः ॥ यतः क्षेमः क्षेमत्वे हेतुः ॥ न कुतश्चिदपि भयं यस्मिन् ॥ तदेवाह ॥ सुशीलाः कृपा
लवः साधवो निष्कामाः ॥ यत्र यस्मिन्मार्गे धर्मे निष्ठाः ॥ अनेन ज्ञानमार्ग इवात्र हार्यं नानिमित्तं भयं ॥ नापि कर्ममार्ग इव मत्सरादिषु कैश्चि
भयं इति भावः ॥ १३ ॥ भक्तेरन्यनिरपेक्षत्वमुक्तं कृच्छ्रादीनि तु भक्तिं विना न शोधयंतीत्याह प्रायश्चित्तानीति ॥ महतामप्यशोधकत्वे

सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः सुशीलाः साधवो यत्र नारायणपरायणाः ॥ १३ ॥
प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं ॥ न निःष्पुनंति राजेंद्र सुराकुंभमिवापगाः ॥ १४ ॥ स
कृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटान्स
प्नेपि पश्यंति हि चीर्णनिष्कृताः ॥ १५ ॥ अत्र चोदाहरंतीममितिहासं पुरातनं ॥ दूतानां विष्णु
र्यमस्य च संवादस्तं निबोध मे ॥ १६ ॥

दृष्टांतमाह सुराकुंभमिवेति ॥ १४ ॥ भक्तिः स्वल्पापि पुनात्येवेत्याह सकृदिति ॥ तस्य गुणेषु राग
मात्रमस्ति न तु ज्ञानं ॥ यस्य तन्मनः तावतैव चीर्णनिष्कृतं प्रायश्चित्तं यैः ॥ १५ ॥ इममर्थमितिहासेनोपपादयति ॥ अत्र चेति ॥ मे मत्तः ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰
४

कन्यकुब्जेपुरे ॥ दास्याः पतिः नाम्ना अजामिलः ॥२१॥ वंद्यग्रहेण अक्षैश्च द्यूतेन कैतवैर्वचनादिभिश्च ॥ वृत्तिं जीविकां ॥ बिभ्रत् पुष्णन्
यातयामास पीडयामास ॥२२॥ आयुषः संबंधी महान्कालोऽत्यगात् ॥ स कियानित्यपेक्षायामाह ॥ अष्टाशीत्यासंख्यायुक्ताः समाः सं

कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥ नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥२१॥ बंद्य
क्षैः कैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः ॥२२॥ एवं निवस
तस्तस्य लालयानस्य तत्सुतान् ॥ कालोऽत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥२३॥ तस्य प्रवय
सः पुत्रा दश तेषां तु योऽवमः ॥ बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं ॥२४॥ स बद्धहृदयस्त
स्मिन्नर्भके कलभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं ॥२५॥ भुंजानः प्रपिबन्खाद
न्बालकं स्नेहयंत्रितः ॥ भोजयन्पाययन्मूढो न वेदागतमंतकं ॥२६॥ स एवं वर्तमानोऽज्ञो मृत्युकाल
उपस्थिते ॥ मतिं चकार तनये बाले नारायणाह्वये ॥२७॥ ॥

वत्सराः ॥२३॥ प्रवयसो वृद्धस्य ॥२४॥ बद्धहृदयेन जरठो वृद्धः
॥२५॥ एतच्चेतदुपलालनादिना श्रीनारायणनामोपचारमाहात्म्येन तदुक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेनापि द्रष्टव्यं ॥२६॥ ॥२७॥ ॥

राम
४

व कागि गतेऽशानि मुखानि यत्तां ॥ २३ ॥ बोलिरोमाणि मे पातात ॥ २४ ॥ स्लाविते न सुनरं वीतेन ॥ २५ ॥ हरिकीर्त्तनं निशम्यापतत ॥ यतस्तद्दूर्तलो
म र्यद ॥ २७ ॥ पुरःसराः सस्याः ॥ २८ ॥ अस्यानयनं निषेधय ॥ २९ ॥ वयं दुष्मान् जाबीम इति न कोपः कार्यः यतो लोकिकाद्दुगरूपायस्यामि

सपाशहस्तो सौ न्दस्त्रा पुरुषाननेत्रादाहणान ॥ वक्रतुंडानूर्ध्वकेशमास्यात्मानं नेतुमागतान ॥ २४ ॥
हरेः कीर्त्तनकालस्था पुत्रं नारायणाह्वयं ॥ स्लावितेन स्लोकप्पोक्षैस्तत्तुहावाकुलेन्द्रियः ॥ २५ ॥ निशम्य
विपनाशास्सभुवतो हरिकीर्त्तनं ॥ भर्तुर्नाममहाराजपार्षदाः सहसा ऽपतन् ॥ २६ ॥ विकर्षतो न्तर्हृ
दयाद्दासीपतिमजामिलं ॥ यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ २७ ॥ ऊचुर्निषेधितास्तां
स्ते वैवस्वतपुरःसराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ॥ २८ ॥ कस्य वा कुत आयाताः कस्मा
दस्य निषेधथ ॥ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ २९ ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेय
वाससः ॥ किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥ ३० ॥

साऊः ॥ सर्वे इति सार्द्धाभ्यां ॥ लसंत्यः पुष्करमालाः संति येषां ॥ ३० ॥ ॥ ॥ ॥ श्री ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰ नवलं नवं नयोयेषां ॥ निषंगः इषुधिः धनुः निषंगासिभिः श्रीः शोभा येषां ते ॥ ३१ ॥ विगतं तिमिरं आलोकश्चानस्य प्रकाशो यया सुतया च

॥५॥ तादिशः कुर्वंतः ॥ भवगोपेन दस्तु चितमि स्याऊः ॥ किमर्थमिति ॥ ३२ ॥ अहो इत्यादि शावगस्त्याद एते चोरा इव अस्मद्विषय धर्मराजस्य किंकरा

सर्वे च रुक्मलग्नधराः सर्वे चाकृतमभुजाः ॥ धनुर्निषंगासिगदाशंखचक्राब्जश्रियः ॥ ३१ ॥ दिशो वि

भिः लोकाः कुर्वंतः स्वेन तेजसा ॥ किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ॥ ३२ ॥ श्रुकउ

वाच ॥ इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः ॥ तानूचुस्ते प्रहस्येदं मेघनिह्रादया गिरा ॥ ३३ ॥

विष्णुदूता ऊचुः ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्वं यच्चाधर्मस्य

लक्षणं ॥ ३४ ॥ कथं स्विद्ध्रियते दंडः किं वास्य स्थानमीप्सितं ॥ दंड्याः किंकारिणः सर्वे आ

होस्वित्कतिचिन्नृणां ॥ ३५ ॥

इत्यनेन इदं तीति विस्मयेन प्रहस्य तान्प्रत्यूचुः मेघस्येव निह्रादो ध्वनिर्यस्याः तया

गिरा ॥ ३३ ॥ तत्वं स्वरूपं लक्षणं प्रमाणं ॥ ३४ ॥ कथं स्वित् केन प्रकारेण स्थानं विषयः कारिणः कर्मिणः नृणामिति ॥ नरा एवं न पश्वाद टाप

यः ते षाप कतिचिदेवेत्यर्थः ॥ ३५ ॥ ॥५॥

वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः ॥ अनेन यो वेदप्रमाणकः स धर्म इत्यर्थः । यो धर्मः स वेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तं
यथाहुर्जैमिनिः ॥ चोदनालक्षणोऽर्थो धर्म इति ॥ व्याख्यातं भेदैः ह्ययमेकेन लक्षणेनाक्रम्य सर्वाण्यपि निरूप्यत इति ॥ अदृष्टस्याधर्मस्य स्वरूपं लक्ष
णं चवदंडस्यानकथनायाहुः ॥ तद्विपर्ययः ॥ यो वेदनिषिद्धः सोऽधर्मः ॥ निषेधश्च तस्मिन्प्रमाणमित्यर्थः ॥ वेदस्य प्रामाण्यहेतुः वेदो नारा
यणाद्युद्भूतः स एव साक्षाद्विष्णुपचारः ॥ स्वयंभूरिति वर्तितः श्वासमात्रेणाप्रयत्नेन भवतीति तथा ॥ तथा च श्रुतिः ॥ अस्य महतो भूतस्य निश्वसि

यमदूता ऊचुः ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति शु
श्रुम ॥ ३८ ॥ येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयः ॥ गुणनामक्रियारूपैर्विभाव्यंते यथात
थं ॥ ३९ ॥ सूर्योऽग्निः खं मरुद्देवः सोमः संध्याहनी दिशः ॥ कं कुः स्वयं धर्म इति ह्येते दैह्यस्य
साक्षिणः ॥ ४० ॥

तमेतदृग्वेद इति ॥ ३८ ॥ कोऽसौ नारायणस्तत्राहुः येन स्वधाम्नि स्वस्वरूपे अमी भावाः प्राणिनः गु
णाः शांतत्वादयः ॥ नामानि ब्राह्मणादीनि ॥ क्रिया अध्ययनाद्याः ॥ रूपाणि वर्णाश्रमादयः तैर्विभाव्यंते विरच्यंते ॥ यथातथं यथार्थं त
स नारायणः ॥ ३९ ॥ तथाप्यधर्मोऽनेन कृत इति कुतो ज्ञायते तत्राहुः सूर्य इति ॥ अहनी अहश्च रात्रिश्च कं उदकं ॥ कुः पृथ्वी ॥ दैह्यस्य जीव
स्य यथाहुः ॥ आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ प
॥ ६ ॥

स्यानमाहुः एतैर्निमित्तभूतैर्विज्ञानः ॥ दंस्यानाहुः सर्वे इति ॥४३॥ विपरीतानि अभद्राण्यपि कर्मिणां संभवंति ॥ यत्तस्तेषां गुणसंयोगोस्ति ॥ यदि क
श्चिदकर्त्ता स्यात् नहि तस्याभद्राणि नस्युः ॥ नत्वनदस्तीत्याहुः ॥ नहि देहवान् अकर्मकृदस्तीति ॥ अतः सर्वे कार्मिणः कार्मिणां च पापस्याव
मावित्वात्तेसर्वे दंडमर्हंतीत्यर्थः ॥४४॥ कथंचित्तन्नियते दंडइत्यस्योत्तरं ॥ येनेति ॥ धर्मोवीतस्पृहांतः ॥ अधर्मानुसारेण दंडो धर्मानुसारे
ण सुखवदित्यर्थः ॥४५॥ न केवलं सूर्यादय एव ज्ञापकाः किंतु भयोपत्तिरपीत्याहुः ॥ यदेति ॥ हि देवभवराः इह जन्मनि ज्ञातंघोरस्पष्टत्वेन वा

एतै र्धर्मो विज्ञानः स्थानैर्दंडस्य युज्यते ॥ सर्वकर्मानुरोधेन दंडं मर्हंति कारिणः ॥४३॥ संभवंति हि
भद्राणि विपरीतानि चानघाः ॥ कारणं गुणसंयोगे देहवान्नस्यकर्मकृत ॥४४॥ येनच्यावा
स्थया धर्माधर्मो वीतसमीहिनः ॥ स एव तत्फलं भुंक्ते नथानावरमुत्रवै ॥४५॥ यदेहं देवच
वरास्त्रैविध्यमुपलभ्यते ॥ गुणैस्तेषु गुणा वैचित्र्यात्तथान्यत्रानुमीयते ॥४६॥ वर्तमानोन्ययोः
कालो गुणाभिज्ञापको यया ॥ एवं जन्मान्ययोरेतद्धर्मा

सुखिदुःखमिश्रत्वेन वा धार्मिकत्वादिना वा त्रैविध्यं गुणेषु प
्योपलभ्यते ॥ तथान्यत्र जन्मांतरेप्यनुमीयते ॥ त्रैविध्यान्यथानुपपत्त्याकल्प्यते ॥४६॥ वर्तमानजन्मना पूर्वोपरजन्मधर्माधर्मज्ञानं भवतीति
सदृष्टांतमाहुः ॥ वर्तमानो वसंतादिकालः अन्ययोर्भूतभाविनोर्विध्ययोर्वसंततयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यया ॥ एवमेतज्जन्म अन्य
योर्भूतभाविजन्मनोः धर्माधर्मौ निदर्शयतीतितथा ॥४७॥

रा॰ प
॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं च धर्मो धर्मज्ञानमज्ञानरोऽस्य पां॥ धर्मेराजस्तु मनसैव सर्वं पश्यतीत्याह॥ [illegible] स्यं यदि स्यां स्थित एव देवो धर्मः॥ देहे स्थितो तं तथा मीवाजीवस्य स्व
वेरूपे च यथा धर्मोदियुक्तं विशेषेराप श्यति॥ अनुभवेन तत्सर्वं रूपं [illegible] स्य तु रूपं तद्विचारयति॥ यतो [illegible] गवानजः॥४४॥ जीव
स्तोभ्योरणो पस्यापि तं वर्त्तमान देहं पश्यति न तु पूर्वमपरं वा वेदेत्याह॥ [illegible]॥ अत्र अविद्योपाधिर्जीवस्तु [illegible] कर्मभिर्युक्तं
वर्त्तमानमेव देहमुपास्ते अहमिति मन्यते॥ पूर्वमपरं वा न वेद॥ तत्र हेतुः॥ नष्टा जन्मना स्मृतिर्यस्य॥ अत्र दृष्टान्तः॥ मस्तानिद्रया युक्तो यथास्व

मनसैव पुरे देवः पूर्वरूपं विपश्यति॥ अनुमीमांसते [illegible] मनसा भगवानजः॥४४॥ यथा यत्नत
मसा युक्तउपास्ते व्यक्तमेव हि॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा॥४५॥ पंचभिः कृतेस्वार्थी
नं पंचभेदाय पंचभिः॥ एककल्कषोऽशेनत्रीन्त्व यंस रूद्रं शोऽक्रते॥४६॥ मृदेन्नस्तोऽशाकं तलि
गं शाक्तिनं यमहत॥ य तेनुसंस्मृति पुंमिह येश्यो कर्मयात्नि तं॥४७॥ देहस्तो जिमपद्गुणेनेच्छ्त्व

नेऽभिव्यक्तमेव देहाध्यपास्ते॥ न तु जायदेहादि॥ पूर्वं वा मादिग तं वान मौशिकार्यते॥ कोशाकारइवात्मानं कर्मणाच्छादयन्
द्वादित्यर्थः॥४५॥ एवं मृतस्य जीवस्य संसारं पंचपदिभिः श्लोकैः पंचभिः कर्मेन्द्रियैः स्वार्थानुपादानादीन् पंचशब्दादीन् वेदं पंचभिर्ज्ञानेन्द्रि
यैः षोडशो मनसा सह सप्तदशः॥ षोडशोपाध्यंतर्गतोपि स्वयं तेक एव सर्वेन्द्रियविषयप्रतिसंधानात् त्रीन् ज्ञानकर्मेन्द्रियमनोविषयान् भो
ति॥४६॥ न देहलिंगशरीरं शाक्तिनं यं गुणत्रयकार्यं महदनादिं पुंसि जीवे अन्वनुसंस्मरति संधत्ते॥४७॥ नेच्छन्नपि अनिच्छन्नपि अनेनैव कर्माणि कार्यते

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰ ७

कार्यत इत्यत्रानुभवं प्रमाणयति ॥ नहीति ॥ गुणैर्गुणकार्यैरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ॥ ५३ ॥ कर्मबद्धो न चेत्तदनुरूपो देहो भवतीत्याह ॥ लब्ध्वेति ॥ अव्यक्तं अदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलसूक्ष्मं शरीरं भवति ॥ यथायोनि ॥ मातृसदृशं ॥ यथाबीजं पितृसदृशं ॥ स्वभावो वासना शुक्रशोणितयोरेकत्वेपि कर्मवासनया मातापितृसदृशो देहो भवतीत्यर्थः ॥ ५४ ॥ संसारबन्धमुपसंहरन्नेव मुक्तिप्रकारमाह ॥ एष इति ॥ ईशसंगात्परमेश्वरभजनात् ॥ ५५ ॥ तदेवं सामान्यतो धर्माधर्मनिर्णयमुक्त्वा प्रकृतमजामिलस्याधर्मं प्रपंचय

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥
५३ ॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ॥ यथायोनि यथाबीजं स्वभावेन बलीयसा ॥
५४ ॥ एष प्रकृतिसंगेन पुरुषस्य विपर्ययः ॥ आसीत्स एव न चिरादीशसंगाद्विलीयते ॥ ५५ ॥ अ
यं हि श्रुतसंपन्नः शीलवृत्तगुणालयः ॥ धृतव्रतो मृदुर्दान्तः सत्यवाङ्मन्त्रविच्छुचिः ॥ ५६ ॥ गुर्व
ग्न्यतिथिवृद्धानां शुश्रूषुरनहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥ ॥

न्नाह अयमादि: अयं हीति ॥ यावत्समाप्ति ॥ तत्र द्वाभ्यां तत्स्वरूपं वृत्तानुवादः पापातिरेकप्रदर्शनार्थः ॥ शीलं सुस्वभावः वृत्तं सदाचारः गुणाः क्षमादयः तेषामालयः ॥ ५६ ॥ निरहंकृतो निरहंकारः ॥ ५७ ॥ आवृत्तः वनात्स्वगृहं प्रति ॥ ५८ ॥ भुजिष्यया भोगस्त्रिया दास्या ॥ मैरेयं मधु पैष्टीं सुरां पीत्वा मदेनाघूर्णिते नेत्रे यस्याः सा ॥ ५९ ॥

६८

राम ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषेणास्त्रयंपतीनीवीयस्याः तयासहस्थपेनसाचाराज्ञ्हं ॥ ५६ ॥ कामोहीपकेनतदंगरागेणहारिद्राश्लिनालिवेन ॥ ५७ ॥ सत्वंधैर्यस्क
तेज्ञानेनहृलेनसंभयन्नापिमदनेनकंपं पितमनः समाधातुंमशक्तोभूत् ॥ ५८ ॥ तदृष्टेनमेवनिमित्तंयस्यसरव्यानत्यापहस्यतेनप्रसूः वि
चेननोगनस्मृतिः ॥ ५९ ॥ यावनासमन्वेषणा ॥ ६० ॥ लभितांपरिषीनीतां ॥ ६१ ॥ ६२ ॥ अघहतपमायुयेस्य ॥ मलमेवनदीयमन्नादिकमनीतिमलान ॥ ६३ ॥

एकस्तसौवनंयातः पितृसंदेशकृन्नहि हृतः ॥ आसाद्यतेनजाह्नः फलपुष्पसमित्कुशान् ॥ ५४ ॥
इदंलोकाभिनंदं विस्फूर्जं सहसुग्रिष्म्या ॥ पीलाचमधुमैरेयंमराद्यर्णेतनेत्रता ॥ ५५ ॥ मत्रपावि
स्मयनीन्यात्मपेनिरपत्रपंक्रीडंनमन्नुगायंतंहसंनमनयानिके ॥ ५६ ॥ इस्त्रांतोकामलिसेन
वाङ्मापरिरंभितां ॥ जगामहृष्टयवनांसहमैथविमोहितः ॥ ५७ ॥ लंभयन्नालनान्मानेपावत्स
लंघयन्स्कंतं ॥ नशशाकसमाधातुंमनोमदनवेपितं ॥ ५८ ॥ वल्लिमिन्नसरव्यानयग्रहयन्तोविचे
तनः ॥ तामेवमनसाध्यायन्स्वधर्मोहिहरामहा ॥ ५९ ॥ तामेवतोषयामासपित्रेणार्थेनयावता ॥ या
मैमेनोरमैः कामैः प्रसीदेनययातया ॥ ६० ॥

चेननोगनस्मृतिः ॥ ५९ ॥ यावतारनमेरा ॥ ६० ॥ ॥ ६१ ॥ ॥ ॥ ६२ ॥ ॥ ॥ ६३ ॥ ॥ ६४ ॥ ॥

भा॰ष
८

लंभितां परिणीतां ६२ ६३ अघायुरूपमायुर्यस्य मलमेव तदीयमन्नादीकमत्तीति मलात् ६४ अकृतनिर्वेशं अकृतप्रायश्चित्तं अस्यैव वहितार्थे
नेष्याम इत्याहुः यत्रेति ६५ ॥ इति श्रीभागवते षष्ठे प्रथमोऽध्यायः ॥ ॥ द्विती[ये] वैष्णवैर्याम्यानां नाममाहात्म्यमद्भुतं ॥ श्रावयित्वा द्विजो विष्णो

विप्रां स्वभार्यामप्रौढां कुले महति लंभितां ॥ विससर्ज्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ६२ य
तस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनं ॥ बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ६३ यदसौ
शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः ॥ अवर्त्तताचिरं कालमघायुरशुचिर्मलात् ६४ ततएनं दंड
पाणेः सकाशं कृतकिल्बिषं ॥ नेष्यामोऽकृतनिर्वेशं यत्र दंडेन शुध्यति ६५ ॥ इति श्रीभाग
वते महापुराणे षष्ठस्कंधे प्रथमोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ एवं ते भगवद्दूता यमदूताभिभाषि
तं ॥ उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः ॥ १ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मः
स्पृशते सभां ॥ यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा २ ॥

लोके नीतज्ञा ये ते १ नयकोविदाः न्यायनिपुणाः धर्मदृशां सभामधर्मः स्पृशतीति यदाह यत्र सभायां ये धर्मदृग्भिः तेषां तां सभां २ ॥

राम
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितरः पितृव्यसालकाः ज्ञातारः अनुशिष्यसकाः वैषम्यमरंध्यदंडनं ॥ ३ ॥ एतत्सर्वं जितमथमेमन्योपिकरिष्यतीतिमहत्कष्टमस्मदिप्साङ्कः ॥ यद्य
दिति ॥ अयानम्येष्ट ॥ ४ ॥ विश्वस्तघातारपोत्साङ्कः मस्येतिष्ठाम्यां ॥ निर्दृष्टोपि ॥ ग्रंथः ॥ ५ ॥ विश्वासेनानितरामर्पितआत्मायेनतं ॥ विश्रंभणीय

स्वानां पितरो मे च ज्योत्स्नाः साधवः समाः ॥ यदि स्वान्नेषु वैषम्यं कं यामि शरणं प्रजाः ॥ ३ ॥ यद्यन्नाच
ति श्रेयानितरः स्नान्नदोहं ते मयत्स्रमाणां कुरुते लोकस्तदनुवर्तते ॥ ४ ॥ यस्यां केऽपि आधाय लो
कः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा न हि वेद यथा प्रजाः ॥ न कथं न्यपिता स्मान्ते कृतं मे ग्रंथमे वा
नं ॥ विश्रंभणीयोऽमृतानां सहजो लोद्रोग्धुमर्हति ॥ ६ ॥ अयं हि कृतनिर्वेशो जन्मकोटिंहसामपि ॥ य
द्याजहारविवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥ ॥ ॥ छ ॥

विश्रंभनीयः सहचाश्चेतर्द्दि ॥ नत्वस्य पापिनो दंडे किमर्थमाक्रोशं क्रियते तत्राह ॥ अयं हीति ॥ यद्यस्मादि विवशोपि हरेर्नाम व्याजहार उ
च्चारितवान् ॥ न केवलं प्रायश्चित्तमात्रं हरेर्नाम अपितु स्वस्त्ययनं मोक्षसाधनमपि ॥ सकृदुच्चारितं येन हरिरित्यक्षरद्वयं ॥ बद्धः परिकरस्तेन
मोक्षाय गमनं प्रतीति स्मृतेः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·प
॥९॥

नतु कर्मसाद्गुण्यकरं हरेर्नामेति युक्तं ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमित्यादिवचनात् स्मृ(ते)
स्तात्त्वेन त्वद्यानवर्त्तकं हरेर्नाम कथं स्यादित्याशङ्क्य ॥ एतेनैवेति ॥ आचीर्णः अचरितः मघवत्कृच्छ्रस्वरूपं ॥ यत्र आइ्डामहं दः आर्षत्र(?) आभा
समात्रं चतुरस्रं रम्यं नामनगादमः एतेनैव केवलेन ॥ चतुरस्रं रमित्यनेन नाधिकं दर्शितं ॥ कथं तदाह ॥ नारायणस्याप आगच्छ इत्येवं विकोश रू
पेण युवाह्वानेन अयंभावः कर्मांगत्वेपि हरिनाम्नः स्वातिरस्कारस्वयत्वंयोग्यत्वसंभवेन सवेषामयश्चित्तार्थत्वंयुक्तमेव ॥ गयाहि अवशेनापि यन्ना
म्निकीर्तिते सर्वपातकैः पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिभिः पुराणेषु महत्त्वंश्रोनाम्नः स्वातंत्र्यमवगम्यते ॥ नैवैतेनार्थवादा इति

एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतं ॥ यदा नारायणायेति जगाद चतुरक्षरं ॥ ॥ ॥

शंका ॥ विधिरोषत्वाभावात् न च विद्यमानवपादत्वशेषः फलनीया ॥ यदाग्नेयोष्टाकपालो मावास्यायां भवतीत्यादिवद्भागार्थ
त्वेनविधिकस्यानोपपत्तेः ॥ मंत्रेषु च ॥ मन्त्राभिमन्त्रस्यैतेनूरिनामनामहेविद्याहो ज्ञानेदक्षः आसज्ञानं नामचिद्विवक्तनमहस्तेविष्णो
सुमतिं भजामहइत्यादिषु नामलपादानादिधर्मीधिकामवगम्यते ॥ उपपादितं च मंत्रार्थवादानामपि स्वार्थेप्रामाण्यं देवताधिकरणे
तस्मान्नश्री नारायणनामाभासमात्रेणैव सर्वाघनिः कृतं स्यादिति ॥ ॥ ॥ ५४ ॥ ॥ ॥

राम
॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतुकामतः कृतानांबहूनांमहापातकानांसहस्रआवर्तनानांहृदआवृत्तिदिकोटिभिरप्यनिवर्त्यानांकथमिदमेकमेवप्रायश्चित्तंस्यादितितत्रा
हः स्तेनइतिद्वाभ्यां॥९॥ सुनिष्कृतंश्रेष्ठप्रायश्चित्तमिदमेव॥ तत्रहेतुः यतोनामव्याहरणात्तद्विषयानामोच्चारकपुरुषविषयामदीयोप
मयासर्वतोरक्षणीयइतिविष्णोर्मतिर्भवति॥१०॥ श्रेष्ठत्वमेवोपपादयति॥ नेतिद्वाभ्यां॥ मन्वादिभिर्ब्रह्मवादिभिरुक्तैर्व्रतादिभिर्निष्कृ

स्तेनः सुरापोमित्रध्रुग्ब्रह्महागुरुतल्पगः॥ स्त्रीराजपितृगोहंताचेपातकिनोपरे॥ सर्वेषा
मप्यघवतामिदमेवसुनिष्कृतं॥ नामव्याहरणंविष्णोर्यतस्तद्विषयामतिः॥१०॥ ननिष्कृतैरुदितै
र्ब्रह्मवादिभिस्तथाविशुद्ध्यत्यघवान्व्रतादिभिः॥ यथाहरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगु
णोपलंभकं॥११॥ ॥ ॥ ॥ ॥ छ ॥ ॥

तैस्तथानशुध्यति॥ उदाहृतैरुच्चारितैर्यथानामपदैस्तथानेननमामीत्यादिक्रियायोगोपिनापेक्षितइतिदर्शितं॥ किंच॥ तन्नामपदोच्चारणं
उत्तमश्लोकस्यगुणानांवोपलंभकंज्ञापकंभवति॥ नतुकृच्छ्चांद्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः॥११॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰
॥ २० ॥

नैकांतिकं नात्यंतं तत्रोधकं न निःकृतं ॥ यस्मिन् कृतेपि असत्सु एव पापमार्गे मनो धावति चेत् ॥ न तत् स्यात् ॥ कर्मणां पापानां निर्हारं आत्यंति
कं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं ॥ यतो सौ खलु सत्वभावनः चित्तशोधकः ॥ १२ ॥ अथ तस्मादेनं माजपमार्गेणानयत ॥ कृतम
शेषाणामघानां निष्कृतं येन ॥ यद्यस्मात्समगृहीत् संपूर्णमुच्चालितवान् ॥ नामैकदेशेनापि फलमिति भावः ॥ म्रियमाणस्तेनेन पुनः पापा

नैकांतिकं तद्धि कृतेपि निष्कृते मनः पुनर्धावति चेदसत्पथेनत्कर्मनिर्हारमभीप्सतां हरेर्गुणानु
वादः खलु सत्वभावनः ॥ १२ ॥ अथैनं मापनयत कृताशेषाघनिष्कृतं ॥ यदसौ भगवन्नाम म्रि
यमाणः समग्रहीत् ॥ १३ ॥ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषा
घहरं विदुः ॥ १४ ॥

नराः स एव उक्तः ॥ ननु तत्कालत्वमेव विवक्षितं ॥ तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात् ॥ न च विधिं विना काकतालीयव
न्नामोच्चारणेन पापापहरमिति प्रमाणमस्ति ॥ १३ ॥ ननु अयं पुत्रनामाग्रहीत् न तु भगवन्नाम ॥ तत्राह ॥ सांकेत्यं पुत्रादौ संकेतितं ॥ परिहास्यं
परिहासेन कृतं ॥ स्तोभं गीतालापपूरणार्थं कृतं हेलनं नाकं विष्णुनेति सावज्ञमपि वैकुंठनामोच्चारणं ॥ १४ ॥ ॥ ॥ छ

राम
॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु नायं संकल्प दर्वकं वैकुंठनामा यहीत किंतु पुत्रस्नेहपरवशः सन् तत्त्वाकृष्टः पतितः इति ॥ अवशेनापि यो हरिरित्याह तस्य यातनां नार्हति पु
मान् सर्वेन नवात्र वर्णाश्रमादिनियम इत्युक्तं ॥ अवशत्वमेवाह ॥ पतितः प्रासादादिभ्यः ॥ स्खलितो मार्गे ॥ भग्नः भग्नगात्रः संदष्टः सर्पादि
भिः ॥ तप्तो ज्वरादिना ॥ आहतो दंडादिना ॥ १५ ॥ ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं ॥ न तु स्वल्पं नामग्रहणमात्रं ॥ पापतारतम्येन लघु

पतितस्खलितो भग्नः संदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनां ॥ १५ ॥ गुरू
णां च लघूनां च गुरूणि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥

दितारतम्यवत्तत्ताकृद्धिः स्यात् ॥ गुरूणां गुरूणि प्रायश्चित्तानि ॥ लघूनां च लघूनि ॥ तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि ॥ अतस्तत्र तत्र
तथैव व्यवस्था ॥ हरिनाम्न कृते यं व्यवस्थोक्ता ॥ विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् ॥ न च गुरुविंदुपानेन महापा
तकत्वस्मरणावत् ॥ नाम्नस्तत्प्रायश्चित्तत्वस्मरणस्यायमतिभारः ॥ १६ ॥ ॥ छ ॥ ॥

भा॰ष॰ किंच । तैस्तपोदानादिभिस्तान्यघान्येव पूयंते नश्यंति । अधर्मोत्थं तं मलिनं तु तस्य पापकर्तुर्हृदयं न । यद्वा तेषामघानां हृदयं सूक्ष्मं सं-
संस्काररूपं न शुध्यति । तदपीशांघ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः । अयं भावः । महांत्यपि पापानि सकृदुच्चारितेनैव नाम्ना नश्यंति
॥३१॥ तत्कालवर्तितेन दीपेनेव गाढध्वांतानि । न तावत्तस्यानुतापो नास्यानुसृतिः । दीपधारणा इव तन्मोतरस्य । यतश्चैवमतः क्षयात्तद्धृदयशु-

नैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥१७॥ अज्ञा-
नादथवा ज्ञानादुत्तमश्लोकनामयत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥१८॥ ॥

टी॰ ॥ एतदर्थमेव तत्र तत्र प्रायश्चित्तविधानं । पापक्षयश्च भवति स्मरतां तमहर्निशं ग्रामिण्यादिषु । तदेवात्राप्युक्तं गुणानुवादः खलु सत्त्वभा-
वनः । तदपीशांघ्रिसेवयेति च । अतोस्य हरिनाम्नैव सर्वपापक्षयः । आसन्नाक्षयस्य महापुरुषदर्शनादिभिरिति ॥१७॥ तथापि न राम
प्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति वेत्तत्राह । अज्ञानादिति । बालकेनाज्ञानादपि प्रक्षिप्तोग्निर्यथा काष्ठराशिं दहति । त- ॥३२॥
द्वत् ॥१८॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवमपिपर्षदनुपदिष्टंश्रद्धाहीनंचकथंप्रायश्चित्तंस्यात् ।तत्राहुः।यथेति ।अगदमौषधंवीर्यवत्तममितिचक्रेणवीर्यतममित्यु
क्तं ।यदृच्छयाश्रद्धादिहीनंउपयुक्तंभक्षितंतत्पर्षक्युखोरजानतोपिस्वगुणमारोग्यंकुर्यात् ।मंत्रोपिनामात्मकस्तथास्वकार्यंकुर्यादेव
नहिवस्तुशक्तिःश्रद्धादिकमपेक्षतइत्यर्थः ।तदुक्तंविष्णुधर्मेहरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः ।अनिच्छयापिसंस्पृष्टोदहत्ये

यथाऽगदंवीर्यतममुपयुक्तंयदृच्छया ।अजानतोप्यात्मगुणंकुर्यान्मंत्रोप्युदाहृतः ।१९।
श्रीशुकउवाच ।एवंसुविनिर्णीयधर्मंभागवतंनृप ।तंयाम्यपाशान्निर्मुच्यविप्रंमृत्योर
मूमुचन् ।२०। इतिप्रत्युदितायाम्यादूतायात्वायमांतिके ।यमराज्ञेयथासर्वमाचचक्षुर
रिंदम ।२१।

वहिपावकः ।१९। तेविप्रंअमूमुचन्मोचयामासुः ।२०। प्रत्युदितानिराकृताःसंतः ।यात्वागत्वायमराजायय
थावत्कथयामासुः ।२१। ॥ ॥ छ ॥ ॥ श्रीकृष्णः ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ष
॥१२॥

दर्शनेनोत्सवो यस्य ॥ २२ ॥ विवक्षुं वक्तुमिच्छं तं ज्ञात्वा ॥ २३ ॥ त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं विष्णुदूतानां च भागवतं
॰ गवत्प्रणीतं शुद्धं निर्गुणं धर्ममाकर्ण्येति योज्यं भक्तिमान् आसीदित्युत्तरस्यानुषंगः ॥ २४ ॥ २५ ॥ अनुतापं प्रपंचयति अहो इति चतुर्भिः

द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववंदे शिरसा विष्णोः किंकरान्दर्शनोत्सवः ॥ २२ ॥
तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेनघ ॥ २३ ॥ सजा-
मिलोप्युपाकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं ॥ २४ ॥ भक्ति-
मान्भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महानासीत्स्मरतोऽशुभमात्मनः ॥ २५ ॥ अ-
हो मे परमं कष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥

येन आत्मना मया वृषल्यां पुत्रतया जायमानेन ॥ ब्रह्म ब्राह्मणजातिः विप्लावितं नाशितं ॥ २६ ॥ ॥ ॥ श्री ॥

राम
॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दु:कांदोषकर्त्तारं कुलस्य कज्जलंकलंकं ॥२७॥ नात्मपत्नीवंधु:पुत्रादिर्यस्य सो: ॥ तत्पतितोसंगसी ॥ अधुनानस्वरणमेव ॥२८॥ २९
इदानीं गस्यविमत्रोहस्वकं मोक्षक्रममाह ॥ किमिदमिखष्टमि:साक्षात्प्रत्यक्षमिहजात्रोवदृष्टं ॥३०॥ येमांव्यमोचयन ते स्वर्गगता: ॥३२॥

धिग्अस्मां विगर्हितं सद्विदूषकं कुलस्य कज्जलं॥ हित्वा बालां सतीं योहं सुरापानमतोमगां ॥२७॥ स्व
स्वपत्नी योपितनयेनान्यं संयुतपातितो॥ अहो मयाधुनासक्ता वक्रमतङ्गेन नीचवत ॥२८॥ सोहं
यत्कंपतिष्यामि नरके महाघोरे हता ॥ धर्मघ्नाः कामिनो यत्र विदंति यमयातना:॥२९॥ कि
मिदं लभन आहो स्वित्सा साक्षाद्दृष्टमिहाभुदंत॥ कन्या ना अद्य ते ये मां व्यकर्षन्पापिनो पापा:॥३०॥
अथ ते स्वर्गगता: सिद्धास्वचारस्याहृदर्शना:॥ यमो वपत्नी यमानं वध्या पापारै रधोभुव:॥३१॥
अथ स्वापि मे दुर्भगस्याविबुधो न मदर्शने ॥ भविजयं मंगले न ये ना व्यामेतसीदति॥३२॥ ॥

यद्यप्यहमभिनतजक्ष विदुर्भगः पापी यावत्तथापि जगां गो नूनं पुण्यवानित्याह ॥ विबुधोन्नमदर्शनेश इति निमित्तसप्तमी ॥ तेषां दर्शनार्थं स्वर्वे
णमंगलेन महता पुरेण न भवितव्यं ॥ येन दर्शनं ॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ष॰ ॥२३॥

अन्यथाह्यशुचेर्वैगुण्यं विना॥ कथं मृते वैकुंठनामग्रहणं जिह्वा क्रियते अनेनेति ग्रहणं॥ ३३॥ ब्रह्मघ्नः विप्रत्वमाते आक॰ ॥३४॥ ३६॥ अनिष्या
मृते धीर्थेधी ... सत्यान्मृतः सर्वदेहादौ मम अहं इति मतिं हित्वा धास्ये॥ ३८॥ मुक्तं सर्वमनुबंधनं पुत्रादिस्नेहो येन सः॥ ३९॥ प्रत्याहृत्येंद्रि

अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः॥ वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति॥ ३३॥ क्वचाहं
कितवः पापो ब्रह्मघ्नो निरपत्रपः॥ क्वचनारायणेत्येतद्भगवन्नाममंगलं॥ ३४॥ सोहं तथा यतिष्या
मि यतचित्तेंद्रियानिलः॥ यथा न भूय आत्मानमंधे तमसि मज्जये॥ ३५॥ विमुच्य तमिमं बंधम
विद्याकामकर्मजं॥ सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान्॥ ३६॥ मोचये ग्रस्तमात्मानं यो
षिन्मय्यात्ममायया॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः॥ ३७॥ ममाहमिति देहादौ हित्वा
मिथ्यार्थधीर्मतिं॥ धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः॥ ३८॥ इति जातसुनिर्वेदः क्षणसं
गेन साधुषु॥ गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः॥ ३९॥ शुक उवाच॥ स तस्मिन् देवसदन आसीनो
योगमास्थितः॥ प्रत्याहृत्येंद्रियग्रामं युयोज
यग्रामोयेन ॥४०॥ ॥ ॥ ॥ ॥

भागवतषष्ठ

राम ॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरोर्भ्योरेहं ह्रियादिभ्य आत्मानं वियुज्य विश्लोष्य आत्मसमाधिना चित्तैकाग्र्येण भगवतो धाम्नि स्वरूपे ॥४१॥ तस्मिन्भगवद्धाम्नि उपरता निश्चल
धार्यस्मात् तस्मिन्काले ऽद्राक्षीरितिवा ध्रुवः प्रश्नः ॥ ततश्च प्रागुपलब्धानेव तानुपलभ्य प्रत्यभिज्ञाय ववंदे ॥४२॥ उपसंहरन्निरव भिनिहितां मं
विलापिताः सर्वे धर्मा येन ॥ हतेत्रतं त्वदादिनियमादिप्रसंग ॥४३॥ कर्मनिबंधस्य पापमूलस्य निकृंतनं छेदकं मत्तः परं नास्ति ॥ कलासर्वं नीर्थप

ततो गुरोश्च आत्मानं वियुज्यात्मसमाधिना । मुमुचे भगवद्धाम्नि ब्रह्मण्यप्युतु भवात्मनि ॥४१॥ यद्दोषा
लेश्यां तस्मिन्ददर्शनिपुरुषान्पुरः । उपलभ्योपलब्धान्प्राक् ववंदे शिरसा द्विजः ॥४२॥ हित्वा क
लेवरं तीर्थे गंगायां दर्शनादनु । सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां ॥४३॥ साकं विहायसा विप्रो
महापुरुषकिंकरैः । हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥४४॥ एवं स विप्लावितसर्वधर्मा दा
स्याः पतिः पतितो गर्ह्यकर्मणा । निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥४५॥
नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात् । न यत्पुनः कर्मसु सज्जते मनो रजस्त
मोभ्यां कलिलं ततोन्यथा ॥४६॥

दस्यानुकीर्तनात् ॥ तत्र हेतुः यद्यतोनुकीर्तनात् ततोनुकीर्तनादन्यथा प्रायश्चित्तादितरे रजस्तमो
भ्यां कलिलं मलिनमेवावतिष्ठति यत्र तन्मनः ॥४६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ष नैव क्षितो भवति॥ ४८॥ म्रियमाणः अवशत्वेन श्रद्धाविनापि॥ ४९॥ षष्ठे द्वितीयः॥ तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनं॥ तां त्वाथित्वा स्वदूतानां
॥२५॥ वैष्णवे किंकरीकृता॥ विष्णुदूतैर्निर्जितं ज्ञात्वार्थं यममुखेन द्रढयितुं तृतीयाध्यायारंभः॥ तत्र यदुक्तं यमराजेन यास्तं वैमाच च दस्युरिजितः॥

यस्त्वेवं परमं गुह्यमितिहासमघापहं॥ शृणुयाच्छ्रद्धयायुक्तो यं म्रियमाणो हरेर्नाम गृणन्पुत्रो
पचारितं॥ अजामिलोप्यगाद्धाम किं पुनः श्रद्धया गृणन्॥ ४९॥ ॥ इति श्री भागवते महापुरा
णे षष्ठस्कंधे द्वितीयोध्यायः॥ ॥ राजोवाच॥ निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान
पि धर्मराजः॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोयं॥ १॥ यः + स्वभक्त्यानुकी
र्तयेत्॥ ४७॥ नैव स नरकं याति नेक्षितो यमकिंकरैः॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके मही
यते॥ ४८॥ + २॥ ॥ ॥१॥ ॥ ॥१॥ ॥ ॥१॥

किं तत्र वृत्तमिति पृच्छति॥ निशम्येति॥ मुरारेर्नैदेशिकैः किंकरैरेवं विहतान्॥ अत एव हताज्ञा यस्य॥ यस्य वशवर्त्ती अयं जनः सो राम ॥२५॥
पि तान्प्रति किमाह॥ १॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मास्वयमेव नहिस्याह यमस्येति ॥ हे कृष्ण यमस्य दंडभंगः कुतश्चन क[illegible] ॥ [illegible] ॥ [illegible]
न पूर्वः ॥ एतद्यमदूतनिराकरणं चाभीत् ॥ अतः सर्वस्यापि लोकस्य संशयापनोदनाय ॥ तं च त्वत्तोन्यो न छिनत्ति मे निश्चितम् अतः
कथयेति श्लोकार्थः ॥३॥ भगवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः ॥४॥ कति संतीत्याक्षेपोक्तिः ॥ त्रैविध्यं त्रिविधत्वं सार्थेष्व

यमस्य देवस्य न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं न हि
त्वदन्य इति मे विनिश्चितम् ॥३॥ शुक उवाच ॥ भगवत्पुरुषै राजन् याम्याः प्रतिहतोद्यमाः ॥ प
तिं विज्ञापयामासुर्यमं संयमनीपतिम् ॥४॥ यमदूता ऊचुः ॥ कति संतीह शास्तारो जीवलोकस्य
वै प्रभो ॥ त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥५॥ ॥

न ॥ यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः ॥ नरस्य च कर्मफलस्याभिव्यक्तिहेतवः कति संतीति ॥५॥ ॥ ५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भी०प्र

॥ १४ ॥

स्तनुरेव: कोवाथ लत्राङ्कः ॥ प्रवीति ॥ स्त्त्नुद्दुः त्वं अन्यं तु त्वं तेषां विप्रतिपत्तौ नेतु एकैकस्य स्यात् तां न कस्यापि ॥ साम्यरावरोधेनो भयोः ॥ एप्र तिवधात ॥ एकमस्येनु कस्य वा न स्यामो एकः सुखं कर्तृमिष्ठत्ति ॥ दुखं वान्य: एकमस्येव तेषां: पवस्ये कामांतु मोक्षेनो भयोः स्थिप्र स्थि: कस्य यतेः मेत्रा नन स्यान्तामिस्य थं: ॥५॥ ननु बहूनां कामिनां कथं वस्य भावहवे: शास्तारो भवंतु न यासति नाथे ॥ दोष: स्यात्तत्राऽऽ

यदि स्युर्बहवो लोके शास्तारो दंडधारिणः ॥ कः स्यात्तां न वा कस्य मम त्वं स्यान्न मे वचः ॥ किंतु शालवने स्यात् बहूनामिह कामिनां ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्तिनां ॥ ६ ॥ अन्तस्त्वेक एव तानां हि स्वरूपाणां मधीश्वरः ॥ शास्ता दंडधरो नृणां प्रभास्तु भविवेचनः ॥ ७ ॥

॥ ५ ॥ ५ ॥ श्री ॥ ५ ॥ ८ ॥

बहूनां कामिनां मध्ये वस्यया शास्तृत्वं बहुत्वे शास्तृत्वं स्यात् घटेत ॥ किंतु नदा यस्त वे शास्तारि सुख्यं शास्तृत्वं ॥ तदेकदेशो उपचारमात्रमेव वस्यात ॥ यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मंडलवर्तिनां तु उपचारमात्रं न तु कुशला भासात ॥ यस्मादेवं शास्तृबहुत्वं न घटेत ॥ अन्ततस्त्व मेकएव शास्ता प्रभुर्भावाभिः भिन्न का ति तया ॥ ७ ॥ ॥

राम

२५

तथाविप्रलंभिता वंचिता लंघिताइत्यर्थः ॥८॥ तदेवाहुः नीयमानमिति ॥ ॥ तत्त्वतः यदिनो साकं स्यमहितं मन्यसे अन्यथा ऽज्ञानत
स्त्वदवज्ञानेनवाप्यनर्थः स्यात् अनर्थमाहितस्याभावः ॥ पुतो नारायणनामेति केवलमभिहिते माभैरुक्त्वा विनिवर्त्य दूरमागताः ॥

स्येनो विहन्तारं दण्डो न लोके वर्त्तते धुना ॥ चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ॥८॥ नीयमा
नं तवादेशादस्माभिर्यातनागृहान् ॥ व्यमोचयन्पातकिनं छित्वा पाशान्प्रसह्य ते ॥९॥ तां
स्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं ॥ नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतं ॥१०॥ श्रीशु
क उवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः ॥ प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबु
जं हरेः ॥११॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं ॥ यदंशतो
स्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥१२॥ ॥

संयमयतीति संयमनः हरिपादांबुजं स्मरन्निति
तमत्याह ॥११॥ मत्तोऽन्यो जगतः तस्थुषश्च परोऽधीश्वरोऽस्ति अहं तु तद्गमानामेव ॥ तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰भ॰
॥२६॥

पिनष्टामेव॥ तत्राविद्यापिनामेव॥ तत्किंकारः तल्लीश्वरः सत्तुसर्वेश्वरः कौमो॥ यत्रयस्मिन्नविश्वमोतंप्रोतंचउर्ध्वोनिर्यक्तंतुषुपटइव॥ यस्य
तेजोंशेनो विष्णुब्रह्मरुद्रेशोऽस्यास्यिस्मारणो भवंति॥ तस्यवस्त्रोलोकोवर्त्तते॥ नसिनातिकायांप्रोतवलीवर्द्दवत्॥ १२॥ एतत्स्वपिवयति
यइति ब्राह्मणादिनानमभिर्वाचिनितयांनत्यांरामन्यांजनेयोवध्नाति॥ दामभिगोःबलीवर्द्दानिव॥ तइमेजीवानामकर्मभिर्नितिवद्धैर्बद्धाय

योनामभिर्वाचिजनान्निजायांवध्नातितंत्साभिवद्दमभिगोः॥ यस्मैबलिंतइमेनामकर्मनिव
घबद्धाश्चकितावहंति॥ १३॥ अहंमहेंद्रोनिर्ऋतिःप्रचेताःसोमोग्निरीशःपवनोर्कोविरिंच्यः
आदित्यविश्वेवसवोथसाध्यामरुद्गणारुद्रगणाःससिद्धाः॥ १४॥ अन्येचयेविश्वसृजाम
रेशाभृग्वादयोऽस्पृष्टरजस्तमस्काः॥ यस्येहितंनविदुःस्पृष्टमायाःसत्वप्रधानाअपिकिं
ततोन्ये॥ १५॥

सेवबलिंवहंति यदधीनाःकर्मकुर्वंतीत्यर्थः॥ १३॥ यस्यवलीलाद्दुर्विभाव्यमस्याह॥ अहमितिद्वाभ्यां नस्पृष्टरजस्तमस्कायेः॥ इहितमभि
प्रेतं चेष्टितंवानविदुः स्पृष्टमायाः मायया स्पृष्टाः॥ ततस्तेभ्योऽन्ये नविदुरितिकिंपुनर्वक्तव्यं॥ १४॥ १५॥ ॥

राम
॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्मायामोहितत्वान्नजानंतीत्युक्तं ॥ अविषयत्वाच्चतत्वेप्याह ॥ यमिति ॥ गोभिरिंद्रियैर्हृदापि चित्तेन नविचक्षते तेनपश्यंति ॥ यद्वावाचस्तुदितं
यस्मै तेन नमंतुनरस्मा द्विष्यते: आत्मनांजीवानां आत्मानंदष्टारं ॥ आक्रांतयो ह्यधिपाणिवस्तु यथाकर्मभृतंमजानानि ॥ नतः परस्मात्क्रीनां पु
काश्यकं ॥ नहिस्वमायामयनारायस्यविषयइतिमावः ॥ एवंभूत: परमेश्वरो स्तीतिसर्वैरीवसंबंध: ॥ १६ ॥ भवत्वेवमहतोन्य: परमेश्वर: येषु

वैनतेयोऽभिमनसा: सुमित्रो हरुरागिराबा: सुमनो विचक्षते ॥ आत्मानमंतर्हितंतमात्मनां च
सुधैर्येणाक्रांतयतनत: पदं ॥ १६ ॥ नसा मतं त्वस्य हरेरधीशितु: परस्य मायाधिपतेर्महात्म
न: प्रायेण हतारह वैमनो हरण्यं गिनिमद्रूपगुणस्वभावा: ॥ १७ ॥ रूपाणि विष्णो: सुरशक्ति
नानि दुर्दर्शलिंगानि महाद्भुतानि ॥ रसंनितद्धिकिमत: परेभ्यो मनःस्वमर्त्यानथ सर्वतस्त्व ॥ १८ ॥

नरस्मान्निमंत्रस्येपाधिनंरक्षितसंतस्त्वेकेताभ्याह ॥ नस्येत्यिद्वाभ्यां ॥ तस्येवरूपंगुणा: स्वभावादय: स्वभाव: मक्रूपास्तस्मादिर्येषांते ॥ १७ ॥
विष्णोर्मूर्तानिन्रस: दुर्दर्शानि द्रष्टुमशक्यानिलिंगानि रूपाणियेषांतानि ॥ नद्धिकिमत: विष्णुभक्तान्परेभ्यो भेतेभ्य: नात्रुभ्य:
सर्वत: अस्यादिभस्वरसंति ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ प॰
॥ २८ ॥

ननु विष्णुभक्ताश्चेत्कथमधर्मे प्रवृत्तानेकृतवंत ॥ तत्राह ॥ धर्ममिति ॥ ऋषयः भृग्वादयः ॥ १९ ॥ ननु केपि वेत्त्वा अनंतितत्सत्यत्वे किंप्रमाणं तत्रा-
ह ॥ स्वयंभूरिति ॥ कुमारः सनत्कुमारः ॥ वयमित्यात्मानमेव वक्तुमन्यमानोयमोनिर्दिशति ॥ २० ॥ हे भटाः ॥ २१ ॥ तमेव धर्ममाह एतावा-
निति ॥ २२ ॥ तथा च प्रमाणं वक्तुं कंठ्युक्ताद्दिसाह ॥ नामोच्चारणेति ॥ येनैव केवलेन ॥ २३ ॥ ननु कथं तु च्चारितेन नामाभासेन कथं सर्वपा-

धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ॥ न सिद्धमुख्या असुरा मनुष्याः कुतो नु
विद्याधरचारणादयः ॥ १९ ॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः ॥ प्रह्लादो जनको भी-
ष्मो बलिर्वैयासकिर्वयं ॥ २० ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः ॥ गुह्यं विशुद्धं दुर्बो-
धं यं ज्ञात्वामृतमश्नुते ॥ २१ ॥ एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः ॥ भक्तियोगो भग-
वति तन्नामग्रहणादिभिः ॥ २२ ॥ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ॥ अजामिलोपि ये-
नैव मृत्युपाशादमुच्यत ॥ २३ ॥

पक्षयः स्यात् ॥ अद्धा भक्तो ह्यसादेरपि विधानात् ॥ तथा हि ॥ सायंप्रातर्गृणन्भक्त्या
दुःखग्रामाद्विमुच्यत इति ॥ अनुदिनमिदमादरेण शृण्वन्निति ॥ श्रवणं कीर्तनं ध्यानं हरेरित्यादि अस्मिन्ने व तु राजेन्मत्त तत्त्वपद्यते ॥ २

राम
॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एरणांतरेच ॥ पापस्य यस्य भवतिस्मरणात महान्निरासिति ॥ अतएव तस्य संकीर्त्तनं विस्रोजेगन्मंगलमहत्तं ॥ महतामपिकोस्माविडोकं
नेकनिष्कृतमितस्तारितासम्यक्कीर्त्तनादेवसंप्यते ॥ किंच ॥ तयासतितमिति मन्वादयोह्यादष्टा ह्यदीनिस्तेरेमुलस्तादिदमतुपपन्नमि
त्यत्राह ॥ एतावतेति ॥ भगवतोगुणानांकर्मणांचनाम्नांसम्यक्कीर्त्तनमितियत्तु ॥ एतावतापुंसामघनिर्हरणायपापक्षयमात्राय
लंउपयोगोनास्ति अलंशब्दोत्रवारणे ॥ तदाहामरसिंहः ॥ अलंभूषणपर्याप्तिशक्तिवारणवाचकमितिउपक्षयमात्रायअलंउपयो

एतावतालमघनिर्हरणायपुंसांसंकीर्त्तनंभगवतोगुणकर्मनाम्नां ॥ विक्रुश्यपुत्रमघवान्यदजा
मिलोपिनारायणेतिम्रियमाणअवापमुक्तिं ॥ २४ ॥ ॥ छ ॥ ॥

गोनास्ति अलंशब्दोत्रवारणे ॥ तदाहामरसिंहः ॥ अलंभूषणपर्याप्तिशक्तिवारणवाचकमिति उपयोगाभावमेवाह ॥ अजा
मिलोमहापातक्यपिनारायणेतिविक्रुश्य ॥ नतुसम्यक्कीर्त्तयित्वा ॥ तच्चपुत्रंविक्रुश्य ॥ नतुहरिं ॥ अघवानप्युच्चैरपिम्रियमा
णःस्वस्थचित्तोपिमुक्तिमवाप ॥ नत्वघनिर्हरणमात्रं ॥ अतोनामाभासेनापिसर्वपापक्षयइतिसेवततत्वं ॥ आस्तांनिःशेषविधय
स्यपापवासनाक्षयायोरस्तुक्रमेवहरेर्गुणानुवादः खलुसत्वभावनइतिसत्र २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ष
॥२०॥

यत्तूक्तं स्वयंभूर्नारद इत्यादि द्वादशाद्यादिस्मालानिमिनत्राह ॥ प्रायेणेति ॥ महाजनो मन्वादिः अयं भावः ॥ यथा मनुष्यो जीवनौषधमज्ञानंतोवेघारो
गतिहेणा यत्रिकटुकानंवादीनि स्मरंति ॥ तथा स्वयंभूत्रामुख्यप्रमुखद्वादशास्मतिरेकेणायं महाजनोऽतिगुह्यमिदं मन्त्रात्वाद्वादशाद्वृ
दिकं स्मरंतीति ॥ किंच ॥ मायया देव्या अलं विमोहितमतिरयं जनः ॥ मधुरं यथा भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोहरायां

प्रायेण वेद तदिदं न महाजनोयं देव्या विमोहितमतिर्बत मायया लं ॥ त्रय्यां जडीकृतमतिर्मधु
पुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥२५॥ ॥ ॥ ॥७॥

त्रय्यां जडीकृता अभिनिविष्टा मतिर्यस्य अतो महत्से वक्रकर्मणि श्रद्धया युज्यमानो नाऽल्पे प्रवर्तते ॥ ददर्पणे हि यथा कृतस्य लोकस्य
महति मंत्रौदौर्घ्याद्वा अल्पे चाश्रद्धा ॥ तस्मादल्प आह हे कोनालीनिमेनौक्ते ॥ यद्वा स्वाधीनः सिंहोऽस्ति सेनावतास्त्रगालादिनिवारणा
यंतं यथा न प्रयुंक्ते तेन यथा नितुच्छतानामानकस्य नतानिरससनाय परमंगलहरेर्नाम स्मरंति ॥ यद्वा नाममाहात्म्यज्ञानेन सर्वेन कि राम ॥२१॥
प्रसंगादिदं यथा दिक्क्रम्यं यथा विस्तरभयात् नानि प्रपंच्यते ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावयोगं भक्तियोगं । अमीषां पातकं न स्यादेव यदि स्यात्तदुरुगायवादो हरेः संकीर्तनं ॥ २६ ॥ तदेवं धर्मतत्त्वं निर्णीय भृत्याननुशास्ति
त इति ॥ ये भगवंतं प्रपन्नास्ते देवैः सिद्धैश्च परिगीता पवित्रगाथाः वर्णिता पवित्रकथा यः । अतस्तान्नोपसीदत न समीपमपि गच्छत

एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगं ॥ ते मे न दंडमर्हंत्यथ यद्य
मीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः स
मदृशो भगवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे
॥ २७ तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं ॥ निष्किंचनैः परमहं
सकुलैरसंगैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥ २८ ॥ ॥ छ ॥

वयः कालोपि न प्रभवामि ॥ २७ के तर्हि दंडार्हा इत्यत आह तानिति द्वाभ्यां । असतः दुष्टान् ॥ तानेवाह ॥ मुकुंदपादारविंदयो
र्यो मकरंदरसोऽरसस्तस्माद्विमुखान् । कथंभूतात् निःकिंचनैः परमहंसैर्जुष्टान् । तेषां ज्ञापकमाह ॥ निरयवर्त्मनि सर्वधर्मशून्ये गेहे च
बद्धतृष्णापेक्षान् ॥ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ष॰
॥२९॥

किंच ॥ जिह्वेत्यादि ॥ यद्येषां जिह्वा ... न्वयः ॥ न कृतं विष्णुकृत्यं भगवद्भजनं यैः ॥२९॥ भगवंतं क्षमापयति तदिति ॥ अघं भावः नः स्वपुरुषै
रस्मदीयैस्तेन नाऽस्थितैः स्वीयैरेव पुरुषैः यदसत्कृतं अन्यायं कृतं तन्नस्तात्त्वयैव क्षम्यतां ॥ स कृतां ॥ स्वानां नाशौ यानां नः न विदुषां अ

जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदं ॥ कृष्णाय नो नमति यच्छिर एकदा
पि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥२९॥ तत्क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः
स्वपुरुषैर्यदसत्कृतं नः ॥ स्वानामहो न विदुषां रचितांजलीनां सांतो गरीयसि नमः पुरुषाय भूम्ने
॥३०॥ तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां ॥ महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतं ॥३१॥
शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ॥ यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥३२॥

ज्ञानां ॥ अहो गरीयसि तस्मिन् क्षांतिर्युक्तैव ॥ महत्त्वतिगो ॥ सौयानां माहात्म्यमविदुषां नः क्षमां करोतित्यर्थः ॥३०॥ तस्मादित्यादि ॥ हे
कौरव्य ॥ जगतोऽपि मंगलरूपं ॥३१॥ ऐकांतिकत्वमेवाह ॥ शृण्वतामिति ॥ व्रतादिभिस्तथा न शुद्ध्येत् ॥३२॥ ॥

राम
॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुपपादयति कस्तामिति अङ्घ्रिपद्मयोर्मधुलेढि आस्वादयतीति तथा । मधुलिहानां तुच्छत्वेन येविसृष्टा मायागुणा विषयास्तेषु पुन रमते अन्यस्तु तन्मधुस्वादरहितः अत एव कामाभिहतः सन्नात्मनो रजः पापं प्रमार्ष्टुं प्रायश्चित्तरूपमीहते य न कर्मणा पुनरपि रजः पापं स्यादेव कुञ्जरशौचवत् सत्वशोधनत्वाभावात् २३ नैवाविस्मितधियो बभूवुः किंतु सस्मुः

कस्तां त्वङ्घ्रिपद्ममधुलिट्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् २३ इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् २४ इतिहासमिमं गुह्यं भगवान्कुंभसंभवः कथयामास मलय आसीनो हरिमर्चयन् २५

इत्येवमेनिरे ततः प्रभृति प्रतिशंकमानाः अस्मानेवैष हन्यादिति शंकां वहन्तः तं द्रष्टुमपि बिभ्यति स्म पाठांतरे तु विस्मितधियो नाना इति वचनं ततः प्रभृति विभ्यतीत्यर्थः २४ कुंभसंभवोऽगस्त्यो मलयपर्वते आसीनो हरिमर्चयन् पुनः पुनर्विश्वासार्थं पहरे पाठोऽस्त्वाल्लित्यर्थः ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ष
॥२५॥

॥ इतिषष्ठेतृतीयः ॥ ॥ चतुर्थादित्रिभिर्विश्वसृष्टेजन्मविवक्षया ॥ प्रचेतःसुतदक्षस्यवंशालावत्मतन्यते ॥ चतुर्थेतुप्रजातसृष्ट्येदक्षेणाराधनं ह
रेः ॥ तपसाहंसगुह्याख्यस्तोत्रेणचनिरूप्यते ॥ प्रसक्तानुप्रसक्तेनस्वायंभुवसुतान्वये ॥ नामप्रभावमाकर्ण्यवंशव्याख्यांचपृच्छति ॥ देवासुरनृ
णामिति सामासिकः संक्षिप्तोयः प्रोक्तस्तृतीयस्कंधे ॥१॥ व्यासंविस्तारं ॥ तेत्वत्तः ययाशक्त्यायथावाससर्जतांशक्तिं तेचप्रकारं ज्ञातुमिच्छामि ॥२॥

॥ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेतृतीयोध्यायः ॥ ॥ राजोवाच ॥ देवासुरनृणांसर्गोनागानां
मृगपक्षिणां ॥ सामासिकस्त्वयाप्रोक्तोयस्तुस्वायंभुवेंतरे ॥१॥ तस्यैवव्यासमिच्छामिज्ञातुंते भगवन्
यथा ॥ अनुसर्गंययाशक्त्याससर्जभगवान्परः ॥२॥ सूतउवाच ॥ इतिसंप्रश्नमाकर्ण्यराजर्षेर्बादराय
णिः ॥ प्रतिनंद्यमहायोगीजगादमुनिसत्तमाः ॥३॥ श्रीशुकउवाच ॥ यदाप्रचेतसःपुत्रादशप्राचीनब
र्हिषः ॥ अंतःसमुद्रादुन्मग्नाददृशुर्गांद्रुमैर्वृतां ॥४॥ ॥छ
नुसर्गमनुवृत्तंसर्गं ॥३॥ दक्षादिरूपेणससर्जेति
वंशदक्षजन्मप्रकारमाह ॥ प्राचीनबर्हिषःपुत्राःयदासमुद्रमध्यादुन्मग्नानिर्गतास्तदागांपृथ्वींद्रुमैर्वृतांददृशुः ॥ नारदोपदेशतःप्राची
नबर्हिषोनिवृत्तस्यअराजकेसतितत्रव्याप्यभावात् ॥४॥ ॥ ॥ ॥ ॥ ॥

राम
॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नपत्ता दीपितो मन्युर्येषां ते तेषां द्रुमाणां हन्तुमिच्छया ॥५॥ तांस्तां वा घाग्निं स्पंदं दह्यमानां तान् ॥ क्रमानुवनस्पतीनां राजा सोम उवाच
व ॥६॥ मा द्रुमेभ्य इति नवभिः हे महा[illegible]गा विशेषेण वर्धयितुमिच्छवः ॥७॥ प्रजापतीनां तद्वृक्षमोज्यदाहोऽनुचित इत्याह अहो इति त्रि

द्रुमेभ्यः क्रुध्यमानानां तपो दीपितमन्यवः । मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥५॥ तांस्तां
निर्दह्यमानानालोक्य कुरूद्वह । राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥६॥ मा द्रुमेभ्यो
म[illegible]भागा दीनेभ्यो द्रोग्धुमर्हथ । विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥७॥ अहो प्रजाप
तिपतिर्भगवान्हरिरव्ययः । वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥८॥ अन्नं चराणामच
राह्यपदः पादचारिणः । अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥९॥ यूयं च पित्रान्वादिष्टा
देवदेवेन चानघाः । प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥१०॥ ॥ छ ॥ ॥१९॥

मिः ऊर्जमन्नं इषमन्नं ॥८॥ ॥९॥ ॥१०॥ ॥ ॥१०॥ ॥ छ ॥ श्रीरामायनमः ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ४॰
॥ २१ ॥

तः आतिष्ठत आश्रयत ॥ जगतां मार्गमुपशमं पित्रादिभिर्जुष्टं ॥ ११ ॥ प्रजानां प्रजापतिरेव बंधुः अन्नसस्य जीविकानाशो न कर्त्तव्य इति दृष्टांतपंचके
नाह ॥ बालानां मातापितरौ ॥ अज्ञानां ज्ञानदो बुध एव सुहृत् ॥ १२ ॥ ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह ॥ अंशो देहेष्विति ॥ वय
ष्माभिः ॥ १३ ॥ आकाशाद्देहसमुत्पत्तिं आकस्मिकामित्यर्थः ॥ आत्मविचारेणायो नियच्छेत ॥ १४ ॥ खिलानां शेषाणां वः युष्माकं वयि

आतिष्ठत जगतां मार्गं कोपं यच्छत दीपितं ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥ लोका
नां प्रभुर्गे बंधुः हंसः परमहिंसायाः पतिः ॥ पतिः प्रजानां भिक्षूणां गुह्यज्ञानां बुधः सुहृत् ॥ १२ ॥
अंशो देहेषु भूतानां आत्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥ यः
समुत्पतितं देह आकाशान्मन्युमुल्वणं ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्त्तते ॥ १४ ॥ अ
लं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥ वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां ॥ १५ ॥ इ
त्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे ॥ १६ ॥

यक्तस ॥ वृक्षरक्षणार्थं मदीयां कन्यां ददामि ॥ वार्क्षी वृक्षैः पालिता ॥ १५ ॥ आमंत्र्य संलापयित्वा अप्सरसः प्रम्लोचायाः सुतां ॥ १६ ॥ ॥

राम
॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ दुहितृवत्सलत्वमिति तस्य कन्यावंशस्येत्युक्तं ॥ नमस्ते ॥ १९ प्रजापतिर्देष ॥ १९ अन्वहितैअसंपद्धः विंध्यस्यपादान्तसन्निहित

नेभ्यस्तत्संभवत्रसः पावेतनसः किल ॥ यस्यप्रजाविसर्गेणालोका आप्रपूरिताल्लयः १७
प्रयागसंज्ञंमहानाशि दक्षो दुहितृवत्सलः ॥ तेनसामनसा चैव तन्मनावहितः शृणु १८ ॥ मनसैव
वासृजत्सर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्लभस्थलजलौकसः ॥ १९ ॥ एमच्चैहि
तमालोकप्रजासर्गे प्रजापतिः ॥ विंध्यपादानुपव्रज्य सोऽचरद्दुःकरंतपः ॥ २० ॥ तेनाद्यमर्ष
एं नाम तीर्थं पापहरं परं ॥ उपस्पृश्यानुसवनं तपसातोषयद्धरिं ॥ २१ ॥ अस्तौषीद्धंसगुह्येनभ
गवंतमधोक्षजं ॥ तुभ्यंतदभिधास्यामि कस्यातुष्यद्यतोहरिः ॥ २२ ॥ प्रजापतिरुवाच ॥ नमः प
रायावितथायानुभूतये गुणत्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमाना

य वेनान २० ॥ हंसगुह्यस्तवेन स्तोत्रेण ॥ कस्यदक्षस्य ॥ २१ ॥ पापमर्वोत्तमाय ॥ नमोऽदधेन मनं करोमि ॥ परत्वे हेतुः ॥ अवितथा अनुभूतिः विद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ष० ॥२२॥

क्रियस्य ॥ अतो गुणत्रयाभासो जीवो निमित्तमात्रं तयोर्बंधे वेनिर्यंत्रे ॥ एवमपि गुणेषु तत्त्वबुद्धिर्येषां ते जीवे दृष्टं धाम स्वरूपं यस्य ॥ न च हेतु
निवृत्तं मानं यस्मात् पाठांतरे निवृत्तमानमवधिश्च यस्मात् तर्हि कथं तस्य सिद्धिः अतआह स्वयं प्रभुवे स्वप्रकाशाय ॥ २३ ॥ अदृष्टधाम
त्वं दर्शयन्नाह नेति पुरुषः सखा जीवः अस्मिन् पुरे देहे वसन्नपि अत्रैव सन् तः सख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकं नावैति न जा
नाति तस्मै ॥ कुतः व्यक्तदृष्टेः प्रपंचदृष्टेः ॥ नहि द्रष्टा दृश्यो भवतीति ॥ प्रथमांतपाठे ॥ व्यक्ते प्रपंच एव दृष्टिर्यस्य सः गुणो विषयो गुणि

न यस्य सख्यं पुरुषो वैति सख्युः सखा वसन् ॥ संवसतः पुरेस्मिन् ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्त
स्मै महेशाय नमस्करोमि ॥ २४ ॥ देहोसवोक्षा मनवो भूतमात्रानात्मानमन्यं च विदुः परं यत् ॥ सर्वं
पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ २५ ॥ ॥

प: नो विषयिणः इंद्रियादेः स्वरूपप्रकाशकत्वं यथा न वेत्ति तद्वत् ॥ २४ ॥ ननु गुणो जडत्वान्न जानातु जीवस्तु चेतनः किमिति न जानाति ॥ तत्रा
ह देहइति ॥ देहः असवः प्राणाः अक्षाणींद्रियाणि ॥ मनवः अंतःकरणानि ॥ भूतानि च मात्राश्च तन्मात्राणि आत्मानं स्वस्वरूपं दृश्यं अ
न्यं इंद्रियवर्गं जयोः परं देवतावर्गं च विदुः ॥ पुमान् जीवस्तु सर्वमेतत्त्रयं वेद गुणांश्च तत्कृतांस्तान्वेद ॥ तज्ज्ञोपि स्वयं सर्वज्ञं न वेद तमन
नंतमीडे स्तौमि ॥ २५ ॥ ॥

राम ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीभागवतेअष्टमस्कंधप्रारंभ॥१नं८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰ श्रीगणेशायनमः॥ ॐ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय॥ अथाष्टमे च
॥१॥ तुर्विंशत्यध्यायैर्मनुवर्णनं॥ नत्सु तैः क्रियते देवे द्वे मूर्त्तिर्निःस्वहरेः॥ सह प्रतिमन्वंतरं चैवमन्वाद्याः षट्‌पृथक्‌पृथक्॥ पवर्तयंति
सद्धर्मान्पालयंत्याचरंति च॥२॥ अतो मन्वंतरस्यांके सद्धर्म इति लक्षणं॥ येनैवं क्रियमाणेन नरो निःश्रेयसं व्रजेत्॥३॥ तत्र तु प्रथमे
स्वायंभुवः स्वारोचिषस्तथा॥ उत्तमस्तामसश्चेति चतुर्मनुनिरूपणं॥४॥ स्वायंभुवं मरे नंतदुरंतगुणवर्णनात्॥ मुदितः परिपृच्छ

ॐ नमो भगवते वासुदेवाय॥ राजोवाच॥ स्वायंभुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः॥ यत्र विश्वसृजां
सर्गो मनूनन्यान्वदस्व नः॥१॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः॥ गृणंति कवयो ब्रह्मंस्तानि
नो वद शृण्वतां॥२॥ यद्यस्मिन्नंतरे ब्रह्मन्भगवान्विश्वभावनः॥ कृतवान्कुरुते कर्ता ह्यतीतेऽ
नागतेऽद्य वा॥३॥ ऋषिरुवाच॥ मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायंभुवादयः॥ आद्यस्ते कथितो
(यत्र देवादीनां च संभवः॥४॥

सर्वमन्वंतरस्थितिं॥५॥ स्वायंभुवस्येति त्रिभिः॥ यत्र विश्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौ राम ॥१॥
त्रादिसर्गः॥१॥ महीयसो हरेः॥ अत्र कश्चिदह्नुपाठो नरमलिनत्वादुपेक्षितोऽस्माभिः॥२॥ यस्मिन्नतीते यत्कृतवान्॥ यस्मिन्ननागते य
त्करिष्यति॥ अद्य वा वर्तमाने यत्कुरुते तत्तद्वदेत्यन्वयः॥३॥ यस्मिन्कल्पे षण्मनवो व्यतीताः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य मनोर्दुहित्रोः कपिलयज्ञमूर्त्तिमां पुत्रतां गतः प्राप्तः ॥ ६ ॥ ७ ॥ ८ ॥ घोरं दुश्चरं तपस्तप्यमानः ॥ ९ ॥ समाधावनुभूतमिदं व
क्ष्यमाणं निद्रिता छ्वसितवद्विस्मितवत्स्वउपदिशन्निव अनुवदन्निव च अष्टभिः श्लोकैरन्वाह ॥ येननिदात्मनाविश्वं चेतयते

॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान्
पुत्रतां गतः ॥ ५ ॥ चरितं पुण्यकीर्तेस्त्वं कपिलस्यानुवर्णितं ॥ आख्यास्ये भगवान्
यज्ञो यच्चकार कुरूद्वह ॥ ६ ॥ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ॥ विसृज्य
राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन्
तप्यमानस्तपो घोरमिदमाह समारत ॥ ८ ॥ श्री मनुः ॥ येन चेतयते विश्वं वि
श्वं चेतयते न यं ॥ यो जागर्ति शयानेऽस्मिन् नाऽयं तं वेद वेद सः ॥ ९ ॥ राम

चेतनी भवति विश्वं तु यं न चेतयते न चेतनी करोति स्वत एव चिद्रूपत्वात् तत्र हेतुः अस्मिन् जने स्वपति यो जागर्ति साक्षितया

वर्तते ॥ अहो सिलिमायजनानां वेदमुनरमवद ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०अ०
२

तस्येश्वरत्वं दर्शयन् लोकस्य हितमुपदिशति ॥ आत्मनाईश्वरेण आवास्यं स्वसत्ताचैतन्याभ्यां संव्याप्यं विश्वं सर्वं जगत्यां लोके य
त्किंचिज्जगद्भूतजातं ॥ अतः तेनेश्वरेण यत्किंचित्त्यक्तं दत्तं धनं तेनैव भुंजीथाः भोगान् भुंक्ष्व यद्दानेन हेतुना त्यक्ते नईश्वरार्पणेनैव
भुंजीथाः न स्वार्थं ॥ कस्यास्वित् कस्यचिदपि धनं मा गृधः माभिकांक्षीः ॥ यद्वा कस्यास्विदिति कस्यान्यस्य धनमास्ति यत्तो धनाकांक्षा
क्रियतइत्यर्थः तथा च श्रुतिः ॥ ईशावास्यमिति यथाश्लोकमेव ॥ ननु यदि स सर्वं व्याप्नोति ॥ तर्हि चक्षुरादिभिः किं न प्रतीयते ॥ तत्राह

आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् ॥ तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनं १०
यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति ॥ तं भूतनिलयं देवं सुपर्णमुपधावत ११ ७

यं पश्यंतं जनश्चक्षुर्वा न पश्यति ॥ चक्षुराद्यविषयत्वात् ॥ नहि प्रमातारं प्रमाणं विषयीकरोतीति भावः ॥ तथा च श्रुतिः ॥ चक्षुष
श्चक्षुरुत श्रोत्रस्य श्रोत्रमित्यादि ॥ ननु तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञा
नं नश्येत् ॥ तत्राह ॥ तस्य तु पश्यतः चक्षुर्ज्ञानं न रिष्यति न नश्यति ॥ न तदाकारेणोत्पन्नाया वृत्तेरेव नाशो न स्वतः सिद्धस्य ज्ञा
नस्य ॥ नहि सवितृप्रकाशः प्रकाश्यनाशेन नश्यतीति भावः ॥ भूतानि निलयो यस्य तं सर्वांतर्यामिणं ॥ तया ऽपि सुपर्णं शोभनं प

तंतमसंगंपश्यावतमक्षं॥

राम
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यसत्स्यस्यनित्यत्वमेवोपपादयन्नाहनयस्येति ॥ अमूनिआद्यंतादीनिविश्वस्ययस्मात्भवंतिविश्वंचयत्‌यद्रूपंअतएवाव्य
भिचारित्वात् ॥ ततऋतंसत्यंमहत्‌परिपूर्णंब्रह्म ॥ १२ ॥ ननुविश्वंचेतद्रूपंतर्हितस्यकुतोजन्माद्यभाव: ॥ स्वप्रका शत्वेवाक
यंवाजगत्जन्मादिकर्तृत्वेनविकारित्वात:सत्यत्वंपूर्णत्वंचतत्राह ॥ सईश: अज: सत्यश्चस्वप्रकाशश्चपुराणश्चनिर्विका

न यस्याद्यंतौ मध्यं च स्व: परो नांतरं बहि: ॥ विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ १२ ॥
स विश्वकाय: पुरुहूत ईश: सत्य: स्वयंज्योतिरज: पुराण: ॥ धत्तेस्य जन्माद्यजयात्मशक्त्या
तां विद्ययोदस्य निरीह आस्ते ॥ १३ ॥ अथाग्रे ऋषय: कर्माणीहंतेऽकर्महेतवे ॥ ईहमानो हि पु
रुष: प्रायोऽनीहां प्रपद्यते ॥ १४ ॥ ॥

र: विश्वंकायोयस्यपुरुभिराहूतानिनामानियस्यतयाविधोपियत:
अस्यविश्वस्यजन्मादिस्वशक्त्यामायया धत्ते तांचनित्यसिद्धयाविद्ययाउदस्यहित्वानिष्क्रियएवास्ते ॥ १३ ॥ यस्मादेवमीश्वर:
कर्मकृत्वासत्स्यइपनैष्कर्म्यैणास्तेअतएवअस्माद्धेतोऋषयोप्यग्रेआदौकर्माणिकुर्वंतिकिमर्थंअकर्महेतवेमोक्षार्थंयतोहीदंतरकर्मना

भागवतटीका ॥ ८ ॥

भा·अ· ॥२॥

नन्वीहमानः कर्मभिरवगुंठितः कोशकार इव बध्येतेत्यत आह॥ ईहत इति॥ अतस्तमनुवर्तमाना ये ते नावसीदंति न विषज्जंते
न देवलोकानुग्रहाय विश्वसृष्ट्यादिषु करोति श्रीरामकृष्णाद्यवतारेष्वेव दोषमप्याचरतीति तत्राशंक्याभीप्साह॥ तमिति
निजवर्त्मन्यवस्थितानुरूपो मार्गः तत्र सम्यक् स्थितं अत ईहमानं कर्माचरंतं तथापि जीववैलक्षण्यमाह निरहंकृतं निराशि

ईहते भगवानीशो न हि तत्र विषज्जते॥ आत्मलाभेन पूर्णार्थो नावसीदंति येऽनु तं॥ १५॥ तमीहमा
नं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितं॥ नॄन् शिक्षयंतं निजवर्त्मसंस्थितं प्रभुं प्रप
द्येऽखिलधर्मभावनं॥ १६॥ शुक उवाच॥ इति मंत्रोपनिषदं व्याहरंतं समाहितं॥ दृष्ट्वासु
रा यातुधाना जग्धुमभ्यद्रवन् क्षुधा॥ १७॥

षं अनन्यचोदितमिति निरहंकारत्वे हेतुः बुधं निराशीष्ट्वे
हेतुः पूर्णं अनन्यचोदितत्वे हेतुः प्रभुं॥ तथापि कर्मानुष्ठाने हेतुः नॄन् स्वाचारेण शिक्षयंतं ननु किमर्थं यजेत्तत्राह॥ अखिलानां ध
र्माणां भावयति प्रवर्तयतीति तथा तं॥ १६॥ समाहितमपि सन्तं मंत्रोपनिषदं व्याहरंतं दृष्ट्वासुरोपस्थितवद्विद्वेषमिव मन्वाना असु
रा यातुधानाश्च क्षुधाभिभूता न जग्धुं अत्तुमभ्यद्रवन् अभिदुद्रुवुः॥ १७

राम ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपालयत् ॥ स्वयमेवेंद्रो बभूवेत्यर्थः ॥ तत्र प्रतिमन्वंतरं मन्वादयः षडन्ये ऽन्ये भवंति ॥ तथा हि नतो द्वादशो
वक्ष्यति मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ॥ ऋषयों ऽशावतारश्च हरेः षाड्विध्यमुच्यत इति तत्राद्ये स्वायंभुवो मनुः ॥ प्रियव्रतो
त्तानपादौ मनुपुत्रौ ॥ यामाद्या देवाः मरीचिप्रमुखाः सप्तर्षयः ॥ यज्ञो हरेरवतारः ॥ इंद्रश्च स एवेति तन्मन्वंतरं पंचविधमेव

तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः ॥ यामैः परिवृतो देवैर्हत्वा ऽशासत्त्रिविष्टपं ॥ स्वा
रोचिषो द्वितीयस्तु मनुरग्नेः सुतो ऽभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः
१९ ॥ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥
ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ॥ तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ २१ ॥

तच्चतुर्थस्कंधोपक्रमे निरूपितं ॥ द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादि षट्कमाह ॥ स्वारोचिषो द्वितीयस्त्विति ॥ यावद्गजेंद्रमो
क्षप्रश्नं ॥ २० ॥ २१ ॥ २२ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभोरसाधारणंचरितमाह ॥ अष्टाशीतिसहस्राणीति ॥ सत्याजितइंद्रस्यसखासन् ॥ उत्तमस्तृतीयोमनुः तस्यभ्रातातामसः

अष्टाशीतिसहस्राणिमुनयोयेधृतव्रताः ॥ अन्वशिक्षन्व्रतंतस्यकौमारब्रह्मचारिणः २२ तृती
यउत्तमोनामप्रियव्रतसुतोमनुः ॥ पवनःसृंजयोयज्ञहोत्राद्यास्तत्सुतानृप २३ वसिष्ठतनयाःस
प्तऋषयःप्रमदादयः ॥ सत्यावेदश्रुताभद्रादेवाइंद्रस्तुसत्यजित् २४ धर्मस्यसूनृतायांतुभगवा
न्पुरुषोत्तमः ॥ सत्यसेनइतिख्यातोजातःसत्यव्रतैःसह २५ सोऽनृतव्रतदुःशीलानसतोय
क्षराक्षसान् ॥ भूतद्रुहोभूतगणांस्त्ववधीत्सत्यजित्सखः २६ चतुर्थउत्तमभ्रातामनुर्नाम्ना
चतामसः ॥ पृथुःख्यातिर्नरःकेतुरित्याद्यादशतत्सुताः २७ सत्यकाहरयोवीरादेवास्त्रिशिखई
श्वरः ॥ ज्योतिर्धामादयःसप्तऋषयस्तामसेंतरे २८ देवावैधृतयोनामविधृतेस्तनयानृप ॥ नष्टाः
कालेनयैर्वेदाविधृताःस्वेनतेजसा २९ अन्यान्यपिविशिष्टपराक्रमान्देवाना

चतुर्थोमनुरिति ॥ त्रिशिखईश्वरःइंद्रः

८ देवौविश्वप्रयति ॥ ८ ।

राम
४

हरिरित्याहृतः व्याहृतः ग्रहात्ग्राहात् ॥ ३१ ॥ अमूमुचन्मोचयामास ॥ ३२ ॥ श्रवणेच्छायां हेतुः तत्कथासु तासु कथासु सामकथेषु वा
सुमहत्पुण्यं पुण्यस्य विवृद्धिकरं धन्यमित्यादि ॥ ३३ ॥ ३३ ॥ अष्टमे प्रथमोध्यायः ॥ तुर्ये मन्वन्तरे मोक्षं गजेन्द्रस्य विमोक्षणं ॥ द्विती

तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः ॥ हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ॥ ३० ॥ राजो
वाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयं ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥ ३१ ॥ त
त्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभं ॥ यत्र यत्रोत्तमश्लोको भगवान्गीयते हरिः ॥ ३२ ॥ सू
त उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनं
द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वतां ॥ ३३ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे म
न्वन्तरानुचरिते प्रथमोध्यायः ॥ १ ॥ श्रीशुक उ० ॥ आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ॥ क्षीरोदेना

यादिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥ १ ॥ द्वितीये तु गजेन्द्रस्य ग्राहेभिः क्री(वृतः श्रीमान् योजनायुतमुच्छ्रितः ॥ २ ॥
डतो जले ॥ देवाद्यहग्रहोनस्य हरिस्मृतिरुदीर्यते ॥ आसीत् अस्ति ॥ २ ॥ ॥ श्री० ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰ ॥ ५ ॥

तावता योजनायुतेन पर्यक् परितः त्रिकूटसमाख्या बीजमाह त्रिभिः शृंगैः मुख्यैः सुवर्णरौप्यलोहमयैः राख्यायस्य ॥ २ ॥ अन्यैश्च शृंगैः
निर्झरांभसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्त इति पूर्वेणान्वयः ॥ कथंभूतैः शृंगैः रत्नैः धातुभिश्च विचित्रितैः ॥ नानाविधा
नां द्रुमलतानां गुल्मा येषु तैः ॥ ३ ॥ पयस ऊर्मिभिः समंतादवनिज्यमाना अंघ्रयो मूलप्रांता यस्य सः हरिद्भिः पाच्चाश्मवर्णैः ॥ ४ ॥ ५ ॥

तावता विस्तृतः पर्यक् त्रिभिः शृंगैः पयोनिधिं ॥ दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥ २ ॥
अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसां ॥ ३ ॥ स
चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥ सि
द्धचारणगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥ ५ ॥ यत्र संगीत
सन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंति हरयः श्लाघिनः परशंकया ॥ ६ ॥ नानारण्यपशुव्रातसं

किंनरादीनां संगीतसंनादैर्नदंत्यो गुहा यस्मिन् (कुलद्रोण्यलंकृतः चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥ ७ ॥
प्रदेशे तत्र अभिगर्जंति हरयः सिंहाः अमर्षया असहनेन ॥ ६ ॥ नानाये आरण्याः पशवः तेषां व्रातैः संकुलाभिर्द्रोणीभिः ॥ अलंकृत

आसीत् किंच ॥ [illegible] ॥ कलकं
[illegible] ॥ २ ॥ ॥ ८ ॥

राम ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचस्वछोदकैःसरित्सरोभिर्युतः॥मसृणपाडुववालुकायेषुतैःपुलिनैश्चयुक्तदेववल्लीणांमज्जनेनयआमोदःतेनसौरभसुक्रांत्यंब
निअनिलाश्चतैश्चयुतआस्ते॥८॥तस्यद्रोण्यांभगवतोवरुणस्योद्यानमालेगिरिवनादिसर्वंछ्यमितिवस्यतिअतोगिरिमुपवर्ण्यनेव
र्णयतिसर्वतोलंकृतमिति॥९॥पुनर्गिरिंवर्णयतिमंदारैरिभिश्चतुर्भिःमंदारादिभिर्दृष्टेनइत्यन्वयः॥१०॥३॥तस्मिन्गिरौसरआ

सरित्सरोभिरछोदैःपुलिनैर्मणिवालुकैः॥देवस्त्रीमज्जनामोदसौरभांवानिलैर्युतः॥८॥त
स्यद्रोण्यांभगवतोवरुणस्यमहात्मनः॥उद्यानमृतुमन्नामआक्रीडंसुरयोषितां॥सर्वतो ९
लंकृतंदिव्यैर्नित्यपुष्पफलद्रुमैः॥१०॥मंदारैःपारिजातैश्चपाटलाशोकचंपकैः॥चतैःप्रि
यालैःपनसैराम्रैराम्रातकैरपि॥११॥क्रमुकैर्नारिकेलैश्चखर्जूरैर्बीजपूरकैः॥मधुकैःशा
लतालैश्चतमालैरसनार्जुनैः॥१२॥अरिष्टोडुंबरप्लक्षैर्वटैःकिंशुकचंदनैः॥पिचुमंदैःकोवि
दारैः॥सरलैःसुरदारुभिः॥१३॥द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः॥बिल्वैःकपित्थैर्जं
लेनद्रष्टणयानेसुविपुलमित्यादिसार्धैःपंचभिः२८ बीरैर्वृतोभल्लातकादिभिः॥१४॥तस्मिन्सरःसुविपुलंलसत्कां
संतिकांचनपंकजानियस्मिन्॥१४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰

॥ ६ ॥

कुमुदादीनां श्रिया कूजितं ॥ कलहंसनो येषां तैः शकुंतैश्च निर्घुष्टं ॥१५॥ चक्राह्वैः सारसैरण्याकीर्णं ॥ जलकुक्कुटादीनां कुलैः कूजितं
॥१६॥ मत्स्यानां कच्छपानां च संचारेण चलतां पद्मानां रजसा युक्तं पयो यस्मिन् तत् ॥१७॥१८॥ नित्यमृतवः फलपुष्पादिसंपत्ति

कुमुदोत्पलकह्लारशतपत्रश्रियार्जितं ॥ मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः ॥१५॥ हंस
कारंडवाकीर्णं चक्राह्वैः सारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितं ॥१६॥ मत्स्य
कच्छपसंचारचलत्पद्मरजःपयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतं ॥१७॥ कुंदैः कुरबकाशो
कैः शिरीषैः कुटजेंगुदैः ॥ कुब्जकैः स्वर्णयूथीभिर्नागपुंनागजातिभिः ॥१८॥ मल्लिकाशतप
त्रैश्च माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः ॥१९॥ तत्रैकदा तद्गि
रिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ॥ सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररु

हेतवो येषां तैः अलं शोभितं ॥१९॥ तत्रैव तस्मिन्नेव गिरिकाननाश्रयो वारणयूथपः करेणुभिश्च (जन्वनस्पतीन् ॥२०॥
रन् तृषार्दितेन स्वयूथेन वृतः सरोवरस्याभ्याशं समीपमगमत् इति पंचमेनान्वयः किं कुर्वन् ॥ कीचकवेणुवेत्रवंतो विशालं गुल्मं लता
दि संदंभं वनस्पतींश्च प्ररुजन् प्रभंजन् ॥२०॥

राम

॥ ६ ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृपंभूतः यस्यगंधमात्राद्बहयः सिंहाः गजेंद्रादयश्च भयादुद्रवंति पलायंते ॥ २४ ॥ सकारयः क्षुद्रा अल्पप्राणिनः अम्पत्र तदृक्षिप
भयस्त्काचरंति ॥ २४ ॥ पुनः कीदृशः धर्मात्मः महच्युतमरस्त्रावीमदमग्नेतीनिनयातैः ॥ २४ ॥ २५ ॥ निजेन पुष्करेण काण्डेनोद्ध

यन्नंधमात्राद्बहयोगजेंद्रा व्याघ्रादयो व्यालमृगाश्च खड्गाः ॥ महोरगाश्चापि भयाद्द्रवंति सगो
रसल्लाः शरभाश्च भयः ॥ २४ ॥ एकांतदृष्टा महिषर्षभाशल्यागोपुच्छशालावृकमर्कटाश्च ॥ अ
न्यत्र सृष्ठाहरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण ॥ २४ ॥ स घर्मतप्तः करिभिः करे
णुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ॥ गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोलिकु
लैर्मदाशनैः ॥ २३ ॥ सरोनिलोत्पलकंजरेणुभिः सुवासितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ॥ वृतः स्व
यूथ्यैस्तृषितेन तत्सरोवराभ्याशमथागमत्द्रुतं ॥ २४ ॥ विगाह्य तस्मिन्नमृतांबु निर्मलं हे
मारविंदोत्पलरेणुवासितं ॥ पपौ निकामं निजपुष्करोद्धृतमात्मा
नं गतक्लमः सस्नौ निकामंमपै ॥ २५ ॥ ॥ २५ ॥

५ ॥ ५ ॥ श्रीगोविंदायनमः ॥ ५

नमद्धिः स्वपयनुगतक्रमः ॥ २५ ॥

CC-0. In Public Domajn.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰अ॰ ॥७॥

रदै ॥२७॥ दीनधियः करेणवः तं केवलं विचुक्रुशुः ॥ रम ॥२२॥ मनउत्साहशक्तिः ॥ बलं शारीरं तेजो ऐन्द्रियं तेषां सकलं बलादि विपर्ययो

स्वपुष्करेणोद्धृतशीकराम्बुभिर्निपाययन्संस्नपयन्यथा गृही ॥ घृणी करेणूः कलभांश्च दुर्मद

देनाचचक्रक्रमणो गजमायया ॥२६॥ तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणो रुषा

गृहीत ॥ यदृच्छयैवं व्यसनं गतो गजो यथा बलं सोऽतिबलो विचक्रमे ॥२७॥ तथातुरं यूथपतिं

करेणवो विकृष्यमाणं तरसा बलीयसा विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं

न चाशकन् ॥२८॥ नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः ॥ समाः सहस्त्र

व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः ॥२९॥ ततो गजेंद्रस्य मनोबलौजसां कालेन दी

र्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ॥३०॥

विपरीतमधिकं जलौकसो ग्राहस्य ॥३०॥ ग्रदतं ॥ श्रीगोविंदायनमः ॥ छ छ ॥ श्री०

राम ॥७॥

सद्दृष्टं यदा प्राणस्य संकष्टमापयतो देही ॥३१॥ बुद्धिमेवाहनमामिति ॥ अहं च न प्रभवामि यतः प्राह स्वेनैण केवलं विधातुः पाशेनावृतः । तथा
पि तं परं परमेश्वरं परेषां ब्रह्मादीनां अयनमाश्रयमतं शरणं यामि ॥३२॥ कोसौ यं शरणं यामि तत्राह यः कश्चनेति ॥ अंतक एव उरगस्तस्मा
त्तं शरणमीमहि व्रजेम ॥ यद्भयादित्यत्र श्रुतिः ॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति

इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्या
विमां बुद्धिमथाभ्यपद्यत ॥३१॥ न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुं
ग्राहेण पाशेन विधातुरावृतोप्यहं च तं यामि परं परायणं ॥३२॥ यः कश्चनेशो बलिनोंतकोरगा
त्प्रचंडवेगादभिधावतो भृशं ॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ॥३३॥
इति श्रीभागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने गजेंद्रोपाख्याने द्वितीयोध्यायः ॥२॥ श्रु
कउवाच ॥ एवं व्यवसितो बुध्या समाधाय मनो हृदि ॥ जजाप परमं जाप्यं

३३ ॥ अष्टमे द्वितीयः ॥ तृतीये तु गजेंद्रेण स्तु
तो हरिरुपेत्य तं ॥ समुद्दधार स्वं ग्राहाद्धूहूं देवलशापतः ॥१॥ जाप्यं जप्यं स्तोत्रं प्राग्जन्मनि इंद्रद्युम्नत्वे ॥१॥ ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स्कं॰ ॥ ८ ॥

तस्मैनमोनमः तं अभिधीमहि: अभिध्यायेमकेवलंग्राहग्रहीतत्वेनकायप्रणानेन्द्रियाक्षमत्वात ॥ स्वस्मिनज्ञानेनसंभावयितुंविज्ञानस्थियतस्विद्र
यात एतद्देहादिचिदात्मकंचेतनंभवतितदुक्तं ॥ येनचेतयतेविश्वमिति ॥ तत्रहेतुः पुरुषायपूर्वकारणत्वेनप्रविष्टाय ॥ ननुप्रकृतिपु
रुषौकारणमितिप्रसिद्धं तत्राह ॥ आदिः प्रकृतिः बीजंपुरुषः तद्रूपाय ॥ प्रविष्टत्वेपिजीववत्संसारित्वंवारयतिपरेशायेति ॥ २ ॥ परस्मै

गजेंद्र उवाच ॥ ॐ नमो भगवते तस्मै यत एतच्चिदात्मकं ॥ पुरुषायादिबीजाय परेशायाभिधीम
हि ॥ २ ॥ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं ॥ योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं ॥ ३ ॥ यः
स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्वच तत्तिरोहितं ॥ अविद्धदृक्साक्ष्युभयं तदीक्ष
ते स आत्ममूलोवतु मां परात्परः ॥ ४ ॥ ॥ ७ ॥ ॥ ॥

स्वयंविश्वरूपत्वमाह यावत्समाप्ति ॥ यस्मिन्नधिष्ठाने ॥ यत उपादानात येनकर्त्रा यश्चस्वयमेवेदंविश्वंभवतिअस्मात्कार्यात्परस्मात्कारण
च्च यः परः तंस्वयंभुवंस्वतः सिद्धं ॥ प्रपद्येशरणंव्रजामि ॥ ३ ॥ विश्वहेतुत्वंस्वतः सिद्धत्वंचोक्तं इदानींविश्वप्रकाशकत्वंस्वप्रकाशत्वंचवर्णय
न्नाश्रयपतेयः स्वात्मनीति ॥ विभातंमभिव्यक्तंसत क्वचित्प्रलयेतिरोहितंलीनंसत्तदुभयंकार्यकारणंचसाक्षीसन्नसमीक्षते ॥ साक्षित्वेहे
तुः ॥ अविद्धदृक् अलुप्तदृष्टिः आत्ममूलः स्वप्रकाशः कुतः परात्प्रकाशकात्चक्षुरादेरपिपरः तस्याप्रकाशक इत्यर्थः ॥ तत्सुषुप्त्यादिरिति

कृतिः ॥ ३ ॥ ८

राम ॥ ८ ॥

गिरेहितमीक्ष्य तद्दृश्यत्वं प्रपंचपूर्वकं दुर्ज्ञेयत्वं वदन्प्रार्थयते कालेनेति द्वाभ्यां पंचत्वमितेषु नाशं प्राप्तेषु: गहनं दुरवगाहं गंभीरमनंतं
तस्मात्तमसः॥ आदित्यवर्णं तमसः परस्तादिति श्रुतेः॥५॥ अत एव देवादयो यस्य स्वरूपं न विदुः॥ जंतुरर्वाचीनः। गंतुं ज्ञातुं ईरितुं वक्तुं वा
दुरत्ययं दुर्गमं अनुक्रमणं चरितं कथनं वा यस्य सः॥ मामावतु॥६॥ कथं तर्हि तमेव विदित्वाऽतिमृत्युमेतीत्यादि श्रुतिरित्याशंक्य तद्धा

कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु॥ तमस्तदासीद्गहनं गभीरं यत्तस्य
पारेऽभिविराजते विभुः॥५॥ न यस्य देवा ऋषयः पदं विदुर्जंतुः पुनः कोऽर्हति गंतुमीरितुं॥ यथा
नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु॥६॥ दिदृक्षवो यस्य पदं सुमंगलं वि
मुक्तसंगा मुनयः सुसाधवः॥ चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः॥७॥
न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा॥ तथापि लोकाप्ययसंभवाय यः स्वमाय
या तान्यनुकालमृच्छति॥८

नोपायं कथयन्नाह॥ दिदृक्षव इति॥ अलोकव्रतं ब्रह्मचर्यादि अव्रणमच्छिद्रं भूतानामात्मभूताः भूतेषा
त्मदृष्टयः संतः सो मे गतिरस्तु॥७॥ दुरत्ययानुक्रमणत्वं प्रपंचयन्नशरणमाह॥ न विद्यत इत्यादिना लोकानामप्ययः प्रलयः संभवो ज
न्म तयोरीहैकांतरं यथे यस्तानि जन्मादीनि स्वीकरोतीति तेनैव मदुत्कीर्तनेनान्वयः॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ स॰
॥ ९ ॥

ब्रह्मणे अरूपाय अनंतशक्तये उरुरूपाय अत आश्चर्याणि कर्माणि यस्य तस्मै परेशाय नमः ॥ ९ ॥ आत्मप्रदीपाय प्रकाशांतरस्याविषया
यकुतः साक्षिणे प्रकाशकाय परमात्मने जीवनियंत्रे ॥ अत एव गिरां विदूराय अप्राप्याय ॥ चेतसां चित्तवृत्तीनां ॥ तथा च श्रुतिः ॥ यतो वा
चो निवर्त्तंते अप्राप्य मनसा सहेति ॥ १० ॥ एवमपि विपश्चितां निपुणानां नैष्कर्म्येण संन्यासेन सत्वेन शुद्धेन ॥ संन्यासयोगाद्यतयः ॥ शु

तस्मै नमः परेशाय ब्रह्मणेऽनंतशक्तये ॥ अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥ नम आत्मप्र
दीपाय साक्षिणे परमात्मने ॥ नमो गिरां विदूराय मनसश्चेतसामपि ॥ १० ॥ सत्वेन प्रतिलभ्याय
नैष्कर्म्येण विपश्चिता ॥ नमः [illegible]वल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥ नमः शांताय घोराय मू
ढाय गुणधर्मिणे ॥ निर्विशेषाय सा[illegible]म्याय नमो ज्ञानघनाय च ॥ १२ ॥ क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्य
क्षाय साक्षिणे ॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥ १३ ॥

द्धसत्वाः इति शंकाते: प्रतिलभ्याय प्रत्यक्त्वेन प्राप्याय निर्वाणसुखसंविदे मोक्षानंदानुभूतये ॥ ११ ॥ गुणधर्मिणे गृहीतसत्वादिधर्मानुकारिणे
ज्ञानघनाय चेति निर्विशेषत्वेऽपि प्रधानत्वे लक्षण्यमुक्तं ॥ १२ ॥ साक्षिणा इति ॥ सर्वाध्यक्षत्वेऽपि निर्विकारत्वमुक्तं ॥ आत्मनां क्षेत्रज्ञानां मूला
य मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे तत्र हेतुः पुरुषाय पूर्वमेव सते ॥ तथा च श्रुतिः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरु
षत्वमिति ॥ हर्णायेति वा ॥ १३ ॥

राम
॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वेंद्रियाणां ये गुणाः विषयास्तेषां द्रष्ट्रे सर्वे प्रत्ययाः इंद्रियवृत्तयो हेतवो ज्ञापका यस्य तस्मै न देवाह ॥ असता अहंकारादिप्रपंचेन छायया
याः सद्रूपया उक्ताय प्रतीतिविंबेनाबिंबमिव वस्तुप्रतिपत्तिहेतुः सद्रूपेणानुविषयेष्वाभासो यस्य तस्मै ॥ न तु कर्तृतयेति ॥ यथा जलस्य आभास उ-
ष्णादिना पाठांतरे असतस्य च्छायया अध्यासेन उक्ताय युक्ताय तदधिष्ठानायेत्यर्थः ॥१४॥ अखिलकारणाय सर्वकारणरूपाय अनए

सर्वेंद्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ।असताच्छाययोक्ताय सदाभासाय ते
नमः ॥१४॥ नमो नमस्तेखिलकारणाय निष्कारणायाद्भुतकारणा-
य ॥ सर्वागमाम्नायमहार्णवाय नमोपवर्गाय परायणाय ॥१५॥ गुणारणिच्छन्नचिदूष्मपाय त-
त्क्षोभविस्फूर्जितमानसाय ॥ नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥१६॥

वस्तुयं निष्कारणाय कारणत्वेपि मृदादिवद्विकारं न यातीति ॥ अद्भुतकारणायेति ॥ एवंभूतत्वे प्रमाणमाह ॥ सर्वे आगमाः पंचरात्रादयः
आम्नायाश्च वेदाः तेषां महार्णवाय तल्लीनसाम्यविपर्यवसानस्थानाय अपवर्गाय मोक्षरूपाय ॥ अतः परायणाय उत्तमानामाश्रयाय ॥१५॥
गुणाः एव अरणिः तया छन्नश्चिदूष्मा यो ज्ञानाग्निः तस्मै तेषां गुणानां क्षोभे कार्ये विस्फूर्जितं बहिर्दृष्टिनिर्गमनं संयस्य ॥ लोकाभयदेन बडस्वामि-
निष्कृते ॥ नैष्कर्म्यमात्मतत्त्वं तस्य भावेन भावनया विवर्जिता आगमा विधिनिषेधलक्षणा यैः तेषु स्वयमेव प्रकाशाय तस्मै ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥१०॥

मादृक् मद्विधश्चासौ प्रपन्नः पशुः तस्य पाशोऽविद्या तस्य विशेषेण मोक्षणं येन तत्र योग्यतामाह ॥ मुक्ताय ॥ मोचने हेतुः भूरिः करुणा यस्य अ
नलसत्वार्थे अलयाय अनलसाय स्वांशेन अंतर्यामिरूपेण ॥ सर्वेषां तनुभृतां मनसि प्रतीताय प्रत्यग्दृशे प्रत्यक्दृक् तस्मै ॥ तथाच श्रुतिः
य आत्मनि तिष्ठन् आत्मानमंतरो यमयतीति भगवते सर्वेषां तनुभृतां नियमने समर्थाय ॥ तेषां मनसि स्थितत्वेपि बृहते अपरिच्छिन्नाय

मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि
प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥१७॥ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुःप्रापणाय गु
णसंगविवर्जिताय ॥ मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥१८॥
यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति ॥ किं त्वाशिषो रात्यपि देहमव्ययं करोतु
मेऽदभ्रदयो विमोक्षणम् ॥१९॥ ॥

१७ ॥ अंतस्थत्वेपि देहादिषु आसक्तैः दुष्प्रापणाय प्राप्तुमशक्याय तत्र हेतुः गुणासंगेन विवर्जिताय अत एव मुक्तात्मभिः देहादिषु अनास
क्तैः चिंतिताय तैः परिभावितं रूपमाह ज्ञानात्मने इत्यादि ॥१८॥ इष्टां गतिं कामितं धर्मादिफलं प्राप्नुवंत्येव यास्तैरकामिता अन्या अप्या
शिषो राति देहमप्यव्ययं राति एवं यः अदभ्रदयः स मे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थये ॥१९॥ ॥

राम
॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावदेवाहं भक्तिसुखानभिज्ञत्वेन वांछामि ॥ यस्य त्वेकांतिनो भक्ता न कंचिदर्थं वांछंति ॥ तं परमेश्वरमीडे स्तौमीत्युत्तरेणान्वयः ॥ तेषां निष्कामत्वे
हेतुः ये वै भगवतः सर्वज्ञान्मुमुक्षून्प्रपन्नाः सेवितवंतः ॥२०॥ अत्यद्भुतं तत्सुमंगलत्वप्रदर्शनार्थमक्षरादि विशेषणानि ॥२१॥ परिपूर्णत्वं प्र
दर्शयन्नाह त्रिभिः यस्येति । फल्ग्व्याल्पयैव कलयांशेन कृताः स जयतादिति तृतीयेनान्वयः ॥२२॥ कथं कृता इत्यपेक्षायामाह

एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः ॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदस
मुद्रमग्नाः ॥२०॥ तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं ॥ अतींद्रियं सूक्ष्ममिवातिदू
रमनंतमाद्यं परिपूर्णमीडे ॥२१॥ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ॥ नामरूपविभेदेन
फल्ग्व्या च कलया कृताः ॥२२॥ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरोचिषः ॥
तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥२३॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षं
ढो न पुमान्न जंतुः ॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥२४॥

यो ॥ यथार्चिषोऽग्नेरिति प्रवाहे दृष्टांतः सवितुर्गभस्त
यः स्वांशवः ॥ निर्यांति उद्गच्छंति ॥ संयांति लीयंते गुणसंप्रवाहमेवाह ॥ बुद्धिर्मनः खानि करणानि शरीरसर्गाः कार्या देहप्रवाहाश्च यतो

भवंति सः ॥२३॥ अत एव देहित्वादीनां मध्ये कोऽपि न भवतीति न
जंतुः लिंगत्रयशून्यं प्राणिमात्रमपि किंतु सर्वस्य निषेधे अव
धित्वेनावशिष्यत इति निषेधशेषः मायया अशेषात्मकश्च
जयतान्महिमोत्कर्षेणाविर्भवतु ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥११॥

न च यामहा छरीरस्य मोक्षणे नाहं जीवितुमिच्छामि ॥ अत्र हेतुः अमुयांतर्बहिश्चाविवेकव्याप्तया गजजात्या किं प्रयोजनं आत्मलोकस्य आत्म
प्रकाशस्य यदावरणमज्ञानं तस्यैव तु मोक्षमिच्छामि ॥ यस्य मोक्षस्य कालेन नाशो वा नास्ति यद्वा देहसंबंधो देहनाशेन नश्यत्येवं किं तन्मोक्षस्य र्थ
न ॥ आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति ॥ ज्ञानैकनिवर्त्यत्वात् ॥ अतस्तस्यैव मोक्षमिच्छामीत्यर्थः ॥२५॥ सोहं मुमुक्षुर्विश्वं ॥ विश्व
रूपं अविश्वरूपं विश्वव्यतिरिक्तं च विश्वं वेदो धनमुपकरणं यस्य तं विश्वस्यात्मानं च केवलं प्रणतोऽस्मि न तु न जानामि ॥२६॥ योगं विना दुर्लभं त

निर्जीविषे नाहमिहामुया किमन्तर्बहिश्चावृतयेभयोन्या ॥ इच्छामि कालेन न यस्य विप्लवस्तस्यात्म
लोकावरणस्य मोक्षं ॥२५॥ सोहं विश्वसृजं विश्वमविश्वं विश्ववेदसं ॥ विश्वात्मानं परं ब्रह्म प्रणतोऽस्मि
परं पदं ॥२६॥ योगरन्धितकर्माणो हृदि योगविभाविते ॥ योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहं
॥२७॥ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रि
याणामनवाप्यवर्त्मने ॥२८॥

दित्याह ॥ योगेन भगवद्धर्मेण रन्धितानि दग्धानि कर्माणि येषां ते यं प्रपश्यंति ॥२७॥ न हि सर्वैर्व
योगमेव किंनाश्रिता ॥ तत्राह नमः इति द्वाभ्यां ॥ असह्यो वेगो रागादिलक्षणो यस्य तथाभूतेन शक्तित्रयेण यस्य तस्मै ॥ बहिश्च अखिलधियां स
र्वेन्द्रियाणां गुणाय ग्राह्यादिरूपेण प्रतीयमानाय अतः कदिन्द्रियाणां कुत्सितानीन्द्रियाणि येषां तेषामनवाप्यवर्त्म यस्य ॥२८॥ ॥

राम
॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यच्छक्त्यायस्यमायया अहंधीरूयाहतं आवृतं अयं जनः नवेद दुरत्ययं माहात्म्यं यस्य तं इतः आश्रितोस्मि ॥२९॥ उपवर्णितं निर्विशेषं मन्ये मेदं
नापरं तत्वं येन तं विविधया वा सौ लिंगभिदा मूर्त्तिभेदा तत्स्याभिमानो येषां ॥ अतएतेयदानोपसस्पुर्नोपजग्मुः ॥ तत्र तदा अखिलामरमयः सर्व

नायंवेदस्वमात्मानंयच्छक्त्याहंधियाहतं ॥ तंदुरत्ययमाहात्म्यंभगवंतमितोस्म्यहं ॥२९॥ श्रीशुकउ
वाच ॥ एवंगजेंद्रमुपवर्णितनिर्विशेषंब्रह्मादयोविविधलिंगभिदाभिमानाः ॥ नैतेयदोपसस्
पुर्निखिलात्मकत्वात्तत्राखिलामरमयोहरिराविरासीत् ॥३०॥ तंतद्वदार्त्तमुपलभ्यजगन्निवा
सः स्तोत्रंनिशम्यदिविजैः सहसंस्तुवद्भिः ॥ छंदोमयेनगरुडेनसमुह्यमानश्चक्रायुधोभ्यगम
दाशुयतोगजेंद्रः ॥३१॥ सोंतः सरस्युरुबलेनगृहीतआर्त्तोदृष्ट्वागरुत्मतिहरिंखउपात्तचक्रं ॥ उ
त्क्षिप्यसांबुजकरंगिरमाहकृच्छ्रान्नारायणाखिलगुरोभगवन्नमस्ते ॥३२॥ ॥ छ ॥

देवमयमूर्तिः ॥३०॥ दिविजैर्देवैः सह छंदोमयेनेति रोच्यायोक्तं ॥३१॥ खे दृष्ट्वा उपात्तं उद्यतं चक्रं येन ॥३२॥ ॥ छ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥१२॥

गरुडोपि मंदगातिरिति ततः सहसावतीर्य अरिणा चक्रेण विपाटितं मुखं यस्य ॥ उस्त्रियाणां देवानां ॥३४॥ ॥ इति अष्टमे तृतीयः ॥ चतुर्थे
तु तयोर्ग्राहः प्राप गांधर्वतां पुनः ॥ गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदं ॥१॥ हूहू संज्ञो पो गंधर्वसत्तमः असौ देवलस्य शापेन ग्राहो जातः
सेवेन ततः सद्यो मुक्तः सन उत्तमश्लोकमगायत इत्यन्वयः ॥ एवं हीतिहासो नमेकथा ॥ स्त्रसिस्त्रीभिः क्रीडन्नसौ स्नातुं प्रविष्टं देवलं पादे ग्रग

तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा ग
जेंद्रं संपश्यतां हरिरमूमुचदुस्त्रियाणां ॥३३॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे तृतीयोध्या
यः ॥ श्रीशुक उवाच ॥ तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः ॥ मुमुचुः कुसुमासारं शंसंतः कर्म तद्ध
रेः ॥१॥ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ॥ ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं ॥२॥ योसौ
ग्राहः स वै सद्यः परमाश्चर्यरूपधृक ॥ मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥३॥ प्रणम्य शिरसाधीश
ह्यविवकर्षः स च प्रकुपितो ग्राहो भवेति शशाप ॥ तेम मुत्तमश्लोकमव्ययं ॥ अगायत यशोधाम कीर्तन्यगुणसत्कथं ॥४॥
च प्रसादितः सन्नुवाच एवमेव गजेंद्रं गृहीष्यन् तत्र गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति ॥३॥ कथं भूतं यशसो धाम आश्रयं ॥ अन
कीर्तन्याः कीर्तनीया गुणाः सती कथा च यस्य तं ॥४॥

राम
॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्लोकं गंधर्वलोकं ॥५॥७॥ कुलाचलेन यात्राचाश्रमो यस्य ॥८॥ तूष्णीं रहस्युपासीनं वीक्ष्य ॥९॥ शापमेवाह असाधुरित्यादि ॥ अकृता अशिक्षि
ता बुद्धिर्यस्य ॥ गजो यथा स्तब्धमतिस्तथैवायं अतः स एव गजो भवत्विति शापः ॥१०॥ दिष्टं दैवप्रापितं तदुपधारयन्नालोचयन् ॥११॥ कौंज

सोनुकंपित ईशेन परिक्रम्य प्रणम्य तं ॥ लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ गजेंद्रो भगवत्स्प
र्शाद्विमुक्तोऽज्ञानबंधनात् ॥ प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥६॥ स वै पूर्वमभूद्राजा पांड्यो द्र
विडसत्तमः ॥ इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥७॥ स एकदाराधनकाल आत्मवान् गृहीत
मौनव्रत ईश्वरं हरिं ॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचला[illegible] ॥८॥ यदृच्छया तत्र म
हायशा मुनिः समागमच्छिष्यगणैः परिश्रितः ॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चु
कोप ह ॥९॥ तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य ॥ विप्रावमंता विशतां तमोंधं यथा ग
जः स्तब्धमतिः स एव ॥१०॥ शुक उवाच ॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः ॥ इंद्रद्युम्नोपि राजर्षि
र्दिष्टं तदुपधारयन् ॥११॥ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं ॥ हर्यर्चनानुभावेन यद्गजत्वेप्यनुस्मृ
तिः ॥१२॥

रीं योनिमापन्नः तर्हि पश्चात्कथं स्मृतिरित्यत आह ॥ हर्यर्चनस्यानुभावेनेति ॥१२॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰अ॰

॥१३॥

अद्भुतं स्वभवनमगात् ॥१३॥ एतन्महाराज गजराजमोक्षणं नाम कृष्णस्यानुभावस्तवेरितः कथंभूतं तत्राह ॥ स्वर्ग्यमित्यादि ॥ दुःस्वप्नं नाशयतीति तथा ॥१४

अतः श्रेयस्कामा ये तद्यथा तथानुकीर्त्तयंति ॥१५॥ अनेन श्रेयो भवतीति कुतो ज्ञातं साक्षाद्भगवद्वचनादेवेत्याह ॥ इदमाहेति यावत्समाप्ति ॥१६॥

एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ॥ गंधर्वसिद्धविबुधैरुपगीयमानकर्मा

द्भुतं स्वभवनं गरुडासनोगात् ॥१३॥ एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणं ॥ स्वर्ग्यं य

शस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां ॥१४॥ यथानुकीर्त्तयंत्येतत् [illegible]छ्रेयस्कामा द्विजा

तयः ॥ शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये ॥१५॥ इदमाह हरिः प्रीतो गजेंद्रं कु[illegible]सत्तम ॥ शृण्वतां

सर्वभूतानां सर्वभूतमयो विभुः ॥१६॥ श्रीभगवानुवाच ॥ ये मां त्वां च स[illegible]श्चेदं गिरि कंदरकाननं ॥ वेत्र

कीच[illegible]कवेणूनां गुल्मानि सुरपादपान् ॥१७॥ शृंगाणीमानि धि[illegible]नि ब्रह्मणो मे शिवस्य च ॥ क्षी

रोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं ॥१७॥ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ॥ सुदर्शनं पांचज

प्रसंगात्स्वस्यापि स्मरणोक्तं फलमुच्यते ॥ सर्वेषां द्विनीयांतानां स्मरतीत्यष्टमेनान्वयः ॥१६॥ ॥ (न्यं सुपर्णं पतगेश्वरं ॥१८॥ ॥

॥१७॥ १८॥ ॥ ॥१८॥ ॥१८॥ ॥ ६२ ॥ ६२

राम

॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१९।२० अव्यक्तं मायां अव्ययं धर्मं मक्किल(?) सर्गां सोमकश्यपयोरपि पत्नी दाक्षायणीः २१ सितवारणमैरावतं २२ सुसमाहि

शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयां ॥ ब्रह्माणं नारदमृषिं भवं प्रल्हादमेव च ॥ १९ ॥ मत्स्य
कूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनं ॥ २० ॥ प्रणवं सत्य
मव्यक्तं गोविप्रान्धर्ममव्ययं ॥ दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २१ ॥ गंगां सरस्वतीं
नंदां कालिंदीं सितवारणं ॥ ध्रुवं ब्रह्मर्षीन्सप्त पुण्यश्लोकांश्च मानवान् ॥ २२ ॥ उत्थायापर
रात्रांते प्रयताः सुसमाहिताः ॥ स्मरंति मम रूपाणि मुच्यंते ह्येनसोऽखिलात् ॥ २३ ॥ ये मां स्तुवं
त्यनेनांग प्रतिबुध्य निशात्यये ॥ तेषां प्राणात्यये चाहं ददामि विपुलां गतिं ॥ २४ ॥ शुक उवाच
इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमं ॥ हर्षयन्विबुधानीकमारुरोह खगाधिपं ॥ २५ ॥ इति

ताः एकाग्रचित्ताः मम रूपाणि मच्चरित्र(?)ताः ॥ २३ ॥ २४ ॥ जलजोत्तमं (श्रीभागवते महापुराणेऽष्टमस्कंधे चतुर्थोऽध्यायः
शंखवरं प्रध्माय वादयित्वा ॥ २५ ॥ अष्टमे चतुर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥२४॥

अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते ॥ स्वभक्तपक्षपातेन यत्र योषायितं प्रभो ॥ पंचमे पंचमं वाथ षष्ठं चाकथयन्मनुं ॥ विप्रशापाच्च निःश्री
कैः कृतं देवैर्हरिस्तुतिं ॥ १ ॥ नाम सप्रचतुर्थो मनुः तस्य सोदरः ॥ नामा ॥ २ ॥ ५ ॥ तस्य वैकुंठसंज्ञस्य हरेरनुभावः सनकादिशापेन दैत्यतां प्रा

श्रीशुक उवाच ॥ राजन्नुदितमेतत्ते हरेः कर्माघनाशनं गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु
॥ १ ॥ पंचमो रैवतो नाम मनुस्तामससोदरः ॥ बलिविंध्यादयस्तस्य सुता ह्यर्जुनपूर्वकाः ॥ २ ॥
विभुरिंद्रः सुरगणा राजन्भूतरयादयः ॥ हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥
पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः ॥ तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं ॥ ४ ॥ वैकुं
ठः कल्पितो येन लोको लोकनमस्कृतः ॥ रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ॥ तस्या
नुभावः कथितो गुणाश्च परमोदयाः ॥ भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ॥ ६ ॥ षष्ठ
श्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः पूरुपूरुषसुद्युम्नप्र मुखाश्चाक्षुषात्मजाः ॥ ७ ॥

प्ताभ्यां स्वपार्षदाभ्यां वराहादिरूपेण युद्धादिलक्षणाः गु
णाः ब्रह्मण्यतादयः परमोदयाश्च मरुधयः कथितास्तृतीयस्कंधादिषु ॥ ६ ॥ ७ ॥ ॥

राम
॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ ॥११॥ यतोहेतोः अंबुचरात्मनाकूर्मरूपेण ॥१३॥ सुराणांसाधितासुधेत्युक्तत्वायुद्धाद्यपिस्यादितिमत्वाहः अतः पृच्छतिकिंचेति ॥१४॥ नोत्तिष्ठेरन्नत
पुनर्जीवंतिस्मेत्यर्थः ॥१५॥ दुर्वाससाहिकदाचिन्मार्गेगच्छतामिंद्रंदृष्ट्वास्वकंठस्थामालातस्मैदत्तातेनचश्रीमदेनानादृत्यैरावतस्यकुंभयो

१मित्र

इंद्रोमंत्रद्रुमस्तत्रदेवाआप्यादयोगणाः ॥ मुनयस्तत्रवैराजनहविष्मद्वीरकादयः ॥८॥ तत्रापिदे
वःसंभूत्यांवैराजस्याभवत्सुतः ॥ अजितोनामभगवानंशेनजगतःपतिः ॥९॥ पयोधिंयेननि
र्मथ्यसुराणांसाधितासुधा ॥ भ्रममाणोंभसिधृतःकूर्मरूपेणमंदरः ॥१०॥ राजोवाच ॥ यथाभगवता
ब्रह्मन्मथितःक्षीरसागरः ॥ यदर्थंवायतश्चाद्रिंदधारांबुचरात्मना ॥११॥ यथामृतंसुरैःप्राप्तंकिंचा
न्यदभवत्ततः ॥ एतद्भगवतःकर्मवदस्वपरमाद्भुतं ॥१२॥ त्वयासंकथ्यमानेनमहिम्नासात्वतांपते ॥ ना
तितृप्यतिमेचित्तंसुचिरंतापतापितं ॥१३॥ सूतउवाच ॥ संपृष्टोभगवानेवंद्वैपायनसुतोद्विजाः ॥ अभिनंद्य
हरेर्वीर्यमभ्याचष्टुंप्रचक्रमे ॥१४॥ शुकउवाच ॥ यदायुद्धेसुरैर्देवाबाध्यमानाःशितायुधैः ॥ गतास
निःक्षिप्तासचगजोन्मत्तःपद्भ्यांतांमालांचूर्णीचकारततःकुपितो वोनिपतितानोत्तिष्ठेरन्स्मभूरिशः ॥१५॥ यदादुर्वाससःशापा
दुर्वासाःशक्रंशशापत्रिभिर्लोकैःसहत्वंनिःश्रीकोभवेति ॥ नदेवदाहयदादुर्वाससःशापादिति ॥ उत्पादयःयागाद्याः ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८॥ असुरान्यथा देवैर्वैलक्षण्येन वलपुष्ट्यादियुक्तान् त्रिलोकी स्पर्धः॥१६॥ हरिश्चारणंगताः संतः यथापूर्वं सर्वं प्राप्याम इति हर्षेणोत्फुल्लं वि
कसितं वदनं यस्य॥२०॥ मनुष्यादयो जरायुजांडजोद्भिज्जस्वेदजाः॥ यस्यावतारः पुरुषः॥ तस्यांशो ब्रह्मा तस्य कलाः मरीच्यादयः॥ ताभिर्वि

निद्राम्यैतत्सुराणामहेंद्रवरुणादयः॥ नाध्यगच्छनस्त्वयं मंत्रैर्मंत्रयंतो विनिश्चयं॥१७॥ ततोब्रह्म
सभांजग्मुर्मेरोर्मूर्धनि सर्वशः॥ सर्वं विज्ञाप्ययांचक्रुः प्रणताः परमेष्ठिने॥१८॥ सविलोक्येंद्रवा
य्वादीन्निःसत्वान्विगतप्रभान्॥ लोकानमंगलप्रायानसुरानयथा विभुः॥१९॥ समाहितेन
मनसासंस्मरन्पुरुषंपरं॥ उवाचोत्फुल्लवदनो देवान्सभगवान्परः॥२०॥ अहं भवो यूयमथोसु
राद्योमनुष्यतिर्यग्द्रुमघर्मजातयः॥ यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्य
यं॥२१॥ नयस्यवध्यो न च रक्षणीयोनोपेक्षणीयादरणीयपक्षः॥ अथापि सर्गस्थितिसंयमार्थं ध
त्ते रजः सत्वतमांसिकाले॥२२॥ अयं तु तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनां॥ तस्मा
द्व्रजामः शरणं जगद्गुरुं स्वानां स नो ध्यास्यति शं सुर
प्रियः॥२३॥

सर्जिताः पुत्रपौत्रादिद्वारा जनिताः॥२१॥ ननु तर्हि सर्वेषु सोसमः स्यात्किं
तच्छरणाश्रयेण॥ सत्यं॥ यद्यप्येवं तथाप्यस्मत्पक्षपाती भविष्यतीत्याशयेनाहनयस्येति द्वाभ्यां॥२२॥ स्थितिपालनस्य क्षणः कालः अतः सुरप्रि
यः स्वीयानां नः शं सुखं करिष्यति॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रस्मारब्धो हरेर्वासः नदेवनमसः परंस्थानं ॥ यद्वा॥ लोकालोकात्परतो यत्तमसः परंस्थानंजगाम ॥२४॥ दैवीभिः लोकेऽप्रसिद्धाभिर्वैदिकीभिर्गी
र्भिः स्तुतिमकरोत् ॥२५॥ देववरंनमामहेनमामः॥ हे देववरं त्वांनमामेतिवा॥ वरत्वे हेतुः सत्यंकुतः अविक्रियंतत्कुतः अनंतं॥ आद्यंचअनादि
आद्यंतवंतोहिदृष्ट्यादिविक्रियायुक्ताभवंतिकिंचगुहाशयंसर्वांतरंकुतः निष्कलंनिरुपाधितत्कुतोऽप्रतर्क्यं॥ तत्कुतः मनोग्रयानं॥ मनसो

श्रीशुकउवाच॥ इत्याभाष्य सुरान्वेधाः सहदेवैररिंदम॥ अजितस्यपदंसाक्षाज्जगामतमसःपरं
२४ यत्रादृष्टस्वरूपायश्रुतसर्वायवैविभो॥ स्तुतिमब्रूतदैवीभिर्गीर्भिस्त्ववहितेंद्रियः॥२५॥
ब्रह्मोवाच॥ अविक्रियंसत्यमनंतमाद्यंगुहाशयंनिष्कलमप्रतर्क्यं॥ मनोग्रयाणंवचसा
ऽनिरुक्तंनमामहेदेववरंवरेण्यं॥२६॥ ॥ ॥२६॥ ७ ७

पिजविष्टमनः प्राप्यस्थानेनतः प्रागेवविद्यमानत्वात्तथाचश्रुतिः॥ अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्शत्॥ तद्धावतोन्या
नत्येतितिष्ठदिति॥ वचसाअनिरुक्तंअविषयत्वात्॥ यद्वाचानभ्युदितंयेनवागभ्युद्यतइतिश्रुतेः मनोवचसोरगोचरत्वादप्रतर्क्यं॥ यथेष्ट
वासर्वेषांहेतुहेतुमद्भावः॥२६॥ ॥ श्रीगोविंदायनमः॥ ७ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥२६॥

किंच प्राणादीनां विपश्चितं ज्ञातारं आत्मा अहंकारो देहो वा ॥ ननु तद्धर्मानिरंकुशेयमस्तीत्याह ॥ अर्था विषयाः इंद्रियाणि तद्ग्राहकाणि तदुभय
रूपेण भासत इति तथा तं ॥ तथाप्यनिद्रं स्वप्नद्रष्टृवदज्ञानरहितं ॥ कुतः अव्रणं अदेहं अत एवाक्षरं खमिव व्यापिनं च सर्वत्र हेतुः ॥ यत्र यस्मि
न् गृध्रपक्षौ जीवपक्षपातिनौ छायातपौ अविद्या च तन्निवर्त्तिका विद्या च न स्तः तं ॥ त्रियुगं त्रिषु युगेषु आविर्भवंतं त्वां शरणं व्रजामः ॥२७

विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं ॥ छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥२७॥ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु ॥ त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥२८॥ ॥ छ ॥ छ ॥

तदेवमविक्रियत्वादिभिः सर्वज्ञत्वादिभिश्च सत्त्वं वरेण्यत्वं चोक्तं संसारचक्राधारत्वेनापि तदेव दर्शयन्नाह ॥ अजस्य जीवस्य चक्रं च
क्रवदावर्त्तमानं देहादि अजया मायया प्रेर्यमाणं यत्तत्र यः अक्षो यस्य यदधिष्ठानमाहुः तमृतं सत्यं प्रपद्ये कथंभूतं चक्रं मनोमयं मनःप्र
धानं ॥ दशेंद्रियाणि पंच प्राणाश्चेत्येवं पंचदश अरा यस्य ॥ आशु शीघ्रगं ॥ त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चंचलं अष्टौ प्रकृतयो
नेमय इवावरणानि यस्य ॥२८॥

राम
॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वजीवनियंतृत्वादिना च वरिष्ठत्वमाह॥ य इति॥ य उपसुपर्णो जीवसमीपे गन्नियंतृत्वेन आसांचकार आस्ते स्म॥ द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते इति श्रुतिः॥ यद्वाभ्यक्षरस्यार्थं गरुडस्योपरि उपविष्ट इत्यर्थः नाहं देहस्थत्वाद्व्यक्षरक्षणादिक्रियावेशाज्जीव
साम्यं स्यात्तत्राह॥ एकवर्णेति॥ एकवर्णे ज्ञानैकस्वरूपं॥ तमसः प्रकृतेः परं॥ अलेकम दृश्यं अव्यक्तं निर्विकल्पं अनंतं अपारं कालतो देशतश्चापरिछिन्नं

य एकवर्णस्तमसः परं तदलोकमव्यक्तमनंतपारं॥ आसांचकारोपसुपर्णमेनमुपासते योग
रथेन धीराः॥२९॥ न यस्य कश्चातितितर्त्ति मायां यया जनो मुह्यति वेद नार्थं॥ तं निर्जिता
त्मात्मगुणं परेशं नमाम भूतेषु समं चरंतं॥३०॥ ॥ छ ॥

ततश्च हैत्वयः अमच्युतत्वरूपत्वान्न जीवसाम्यं॥ न योस्य पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीतीति विशेष पक्षवर्णादित्यर्थः॥ अतए
व धीराः॥ योगेन रथेन प्राप्तिसाधनेनोपासते भजंते तं नमामेत्युत्तरेणान्वयः॥२९॥ मायानियंतृत्वेनापि जीवसाम्यं परिहरन्वरिष्ठ
त्वमाह॥ यस्य मायां कश्चित्कश्चिदपि वा नातितितर्त्ति नातिक्रामति कथं भूतां जनो यया मुह्यति अर्थमात्मस्वरूपं न तु वेद॥ निर्जित आ
त्मा शक्तिर्माया वतद्गुणाश्च येन तं॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥१७॥

अर्थं नवेदेतियदुक्तं तत्प्रपंचयन्नाह ॥ इमेवयंदेवाऋषयश्चयस्यप्रियया नन्वासत्वेनैवसृष्टा अपिबहिः स्वांतश्च सत्ता प्रकाशाभ्यामाविः प्र
कटामपि सूक्ष्मां गतिं निरूपाधिस्वरूपं मविद्मः इतरप्रधानाररजस्तमोमयाः कुतोविदुः तंनमामेतिष्ठ वैरीभावान्वयः ॥३१॥ इदानींवेराज
रूपेण एकवन्माथयनेपादैमहीतिद्वादशभिः ॥ पत्र महीयोजगदेकजादिभूतसर्गाः सामहीमस्यपादौ सनः प्रसीदतु ॥ आत्मतंत्राः पाद्या

इमेवयंयत्प्रिययैवतान्वासत्वेनसृष्टाबहिरंतराविः ॥ गतिंनसूक्ष्मामृषयश्चविद्महेकुतो ऽसु
राद्याइतरप्रधानाः ॥३१॥ पादौमहीयंस्वकृतैवयस्यचतुर्विधोयत्रहिभूतसर्गः ॥ सवैमहापू
रुषआत्मतंत्रः प्रसीदतांब्रह्ममहाविभूतिः ॥३२॥ अंभस्ययस्येतउदारवीर्यंसिध्यंतिजीवं
त्युतवर्धमानाः ॥ लोकायतोथाखिललोकपालाः प्रसीदतांब्रह्ममहाविभूतिः ३२ ॥

दिमत्वेपितत्त्वारंतंत्रः ॥ कुतः ब्रह्मअप्रच्युतत्वपः नत्कुतः महतीविभूतिरैश्वर्यंयस्यसः ॥३२॥ उदारंवीर्यंशक्तिर्यस्यतदंभोयस्यरेतः
सनः प्रसीदतु ॥ उदारवीर्यतामाहयतोंभसोलोकादयः ॥ सिध्यंतिजायंते ॥३३॥ ॥ ७ श्री॰ ७ ॥

राम
॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः सोमो देवानामंधः अन्नं अत एव बलमायुश्च नगानां वृक्षाणां प्रकर्षेण जनयतीति वर्द्धयतीति प्रजनः ॥ तं यस्य मनः समामनंति स प्रसीद
तु ॥३४॥ अग्निर्यस्य तु मुखं जातः कथंभूतः जातवेदाः धनं यस्मात् ॥ क्रियाकांडं तन्निमित्तं पाकं कर्म तन्निमित्तं जन्म यस्य ॥ अंतः ॥ समुद्रे उ
दरमध्ये स्वधातून्मालेकाहीनेवाल्यादीन् प्रसिद्धसमुद्रे पिबडवानलरूपेणाउदकान्येवानुपचन्नग्निः ॥३५॥ एष तरणिर्यस्य चक्षु

सोमं मनो यस्य समामनंति दिवौकसां यो बलमंध आयुः ॥ ईशो नगानां प्रजनः प्रजानां प्रसीद
तां नः स महाविभूतिः ॥३४॥ अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा
अंतः समुद्रेनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः ॥३५॥ यच्चक्षुरासीत्तरणिर्देव
यानं त्रयीमयो ब्रह्मण एष धिष्ण्यं ॥ द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः

रादित्यो हिरण्मयः पुरुष इति श्रुतेः ॥ मुक्तेर्द्वारं देवयानत्वात् अमृतं च पुण्यलोकत्वात् ॥ मृत्युश्च कालात्मकत्वात् एवं ॥३६॥
भूतस्तरणिर्यस्य चक्षुः सः ॥३६॥ ॥ श्रीरामः ॥ ॥ श्री० ॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥१८॥

कथंभूतो वायुः चराचराणां सह आदिधर्मवान् प्राणः यं प्राणं वयं बुध्याद्यधिष्ठातारो देवाः संप्राजं सम्राजं इव अन्वासम अनुसृत्याश्रिताः एवं
भूतो वायुर्यस्य प्राणात् प्रभूतः ॥३७॥ खानि देहगतानि छिद्राणि प्राणाः पंचवृत्तिः इंद्रियाणि च आसां मनश्च असवो नागकूर्मादयः शारीरंच

प्राणात्प्रवृत्तश्च चराचराणां प्राणः सहो बलमोजश्च वायुः अन्वासम संम्राजमिवानुगा वयं
प्रसीदतां नः स महाविभूतिः ॥३७॥ श्रोत्रादिह्रीर्यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः
प्राणेंद्रियात्मासु शरीरकेतः प्रसीदतां नः समहाविभूतिः ॥३८॥ बलान्महेंद्रस्त्रिदशाः
प्रसादात् मन्योर्गिरीशो धिषणाद्विरिंचः खेभ्यश्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः
समहाविभूतिः ॥३९॥ श्रीर्वक्षसः पितरः छायया सन् धर्मः स्तनादितरः पृष्ठतोऽभूत् ॥ द्यौ
र्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रसीदतां नः समहाविभूतिः ॥४०॥ विप्रो मुखाद्ब्रह्म च यस्य
गुह्यं राजन्य आसीद्भुजयोर्बलं च ॥ ऊर्वोर्विडोजोंघ्रिरवेदस्य
द्रेप्रसीदतांनः समहाविभूतिः ॥४१॥

तेषां केतं आश्रयभूतं खं वयस्य पुरुषस्य नाभ्याः प्रज
ज्ञे सः ॥३८॥ यस्य बलान्महेंद्रो जज्ञे छंदांसि ऋषयश्च खेभ्यः कः प्रजापतिः ॥३९॥ इतरो धर्मः ॥४०॥ विट् वैश्यः ओजः नैपुण्यं तस्य हृत्तिश्च ॥ अंघ्रि

अंघ्रिलाविस्पर्शो कौमोवदस्य शूद्रोऽभवत् इत्यस्तिनिकास्पुरुष
पादाभ्यां नद्यो विमानपाश्च इष्टपादाद्याः सुगमं ॥४१॥

॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपरिउत्तरोष्ठात्तत्नः नासिकातो घ्राणनिर्वीतिः पश्चात्पायुः पवृत्तो हितः कामः स्पर्शेनाभूत् ॥ ४२ ॥ द्रव्यं भूतानि वयः कालः विशेषं लौकिकिक
प्रपंचेन गृह्यात् दुःखं ग्राह्यं कुतः प्रबुध्यापबाधं विहृद्विरपोह्यमानं ॥ पाठांतरे प्रबुध्यानोमायेस्य वबोधो अखिलविस्य पे ॥ ४३ ॥ नदेवं संप्रपं
चमुपवर्ण्यपनिष्ठ्य पंचतःपुपवर्णयन्नाहामिति ॥ नमइतिद्वाभ्यां त्रिभिर्देशानादिभिः नमस्तान्वायुः ॥ तस्येव ऊतिलीलायस्यासौ ॥ ४४ ॥ नेसस्मितेनम

लोभोऽधरान्नीतिरुपर्यभून्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः । भ्रुवोर्यमः पक्ष्मभवस्तु कालः
प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥ द्रव्यं वयः कर्म गुणान् विशेषं यद्योगमायाविहितान्वद
न्ति ॥ यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥ नमोऽस्तु तस्मा उपशांतश
क्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये
॥ ४४ ॥ स त्वं नो दर्शयात्मानमस्मत्करणगोचरं ॥ प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजं ॥ ४५ ॥ ते
स्वांबुजं दिदृक्षूणां नोस्माकं अस्मदादिकरणगोचरं य (तैः) स्वेच्छाभूतै रूपैः काले काले स्वयं विभो ॥ कर्म दुर्विषहं यन्नो भग
थाभवस्येवं बालानं दर्शय ॥ ४५ ॥ नेच्छान्तुवर्तितं च पन्नववह्रात्मस्यमेवसाह ॥ तैस्तैरिति ॥ यन्नो दुर्विषहमस्माकं कर्म तद्भगवान् स्वयमेव करो
ति हि ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ ॥१९॥

न च बहिर्मुखानामिव त्वदङ्घ्रिप्रपन्नानामस्माकं त्वदर्पितानि निष्फलपुण्यानि विपरीतफलानि भवितुमर्हन्तीत्याह क्लेशेति द्वाभ्यां ॥ अल्पसारं फलं
येषु ॥ यद्वा विफलान्येव सकामानां कर्माणि त्वदर्पितं तु नैव तथा ॥४७॥ नन्वावैफल्यमुपपादयति अवमः ॥ अल्पोपि कर्मकल्पः कर्माभा
सोपि ईश्वरार्पितश्चेद्विफलाय श्रमाय न कल्पते हि यस्मात्स एवेश्वरः पुरुषस्यात्मा अत एव दयितो हितश्च न तस्मान्निदयितो हिते

क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च ॥ देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥४७॥ नावमः कर्मकल्पोपि विफलायेश्वरार्पितः ॥ कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः ॥४८॥ यथा हि स्कंधशाखानां तरोर्मूलावसेचनं ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥४९॥ नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गुणाय गुणेशाय सत्वस्थाय च सांप्रतं ॥५०॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने पंचमोध्यायः ॥ छ

चार्पितं निष्फलं स्यात् ॥४८॥ अनंतफलत्वमाह ॥ यथा हि मूलावसेचनं स्कंधादीनां शाखानां च भवति ॥४९॥ एवं सत्यपि त्वदर्पितकर्मणां त्वद्भ
क्तानामस्माकं यन्निमित्तमिदं दुःखमिति त्वमेव वेत्सी त्याशयेनाह नमइति ॥ दुर्वितर्क्यात्मकर्माणि स्वभावचेष्टितानि यस्य तस्मै ॥५०॥ इ
ति अष्टमे पंचमः ॥

राम ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षष्ठेपुनः स्तुतिविस्तावाविर्भूतेसुरैः स्तुता ॥ तन्मंत्र्याद्यासुरैः साकममनार्थेमहोद्यमः ॥ सहसार्कोणामुदयेच्छनिरिवच्छनिर्यस्य ॥ १ ॥ महत्ता
तेजसाप्रतिहतानीक्षणानिचक्षूंषियेषां ॥ २ ॥ तामाविर्भूतांतनुंविरिंच्योब्रह्मातुष्टावतिपंचमेनान्वयः ॥ कंजगर्भवद्गहरणोसस्याः ॥ ३ ॥ तप्तहेम
वद्गौरेणनपीतेनलसत्कौशेयवाससायुक्ता ॥ प्रसन्नानिचारूणिसर्वाण्यंगानियस्याः शोभनमुखंयस्याः सुंदरेभ्रुवौयस्याः ॥ ४ ॥ महांतोम

श्रीशुक उवाच ॥ एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः
॥ १ ॥ तेनैवसहसासर्वेदेवाः प्रतिहतेक्षणाः ॥ नापश्यन्खंदिशः क्षोणीमात्मानंचकुतोविभुं ॥ २ ॥ वि
रिंच्योभगवानदृष्ट्वासहशर्वेणतांतनुं ॥ स्वच्छांमरकतश्यामांकंजगर्भारुणेक्षणां ॥ ३ ॥ तप्तहेमा
वदातेनलसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगींसुमुखींसुंदरभ्रुवं ॥ ४ ॥ महामणिकिरीटेन
केयूराभ्यांचभूषितां ॥ कर्णाभरणनिर्भातकपोलश्रीमुखांबुजां ॥ ५ ॥ ॥ छ

मणिर्यस्मिन्तेनकिरीटेनाकर्णाभरणेकुंडलेताभ्यांनिर्भातौयौकपोलौताभ्यांश्रीमुखांबुजेयस्याः ॥ ५ ॥ कौस्तुभः ॥ छ
॥ ५ ॥ श्रीगोविंदायनमः ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कौस्तुभः आभरणं कंठे यस्याः लक्ष्मीं वक्षसि बिभ्रतीं ॥ ६ ॥ देवप्रवरो ब्रह्मा सर्वांगैरवनिंगतैः साष्टांगप्रणतैः ॥ अनादि विरा विरामे यन्नामत्स्यादिभिर्भुवन् ब्र
ब्रुवन् ॥ ब्रह्माभिप्रैतिनित्यत्वविभुत्वे भगवन्नतो ॥ ७ ॥ श्रीमद्भिर्जन्मस्थितिसंयमाविर्भाव यावन्न स्वस्मादादिवज्जन्मादि नवासौ साहमजाजाजन्मादयो यस्य कु
तः अगुणाय अतः निर्वाणसुखस्यार्णवाय अपारमोक्षसुखरूपायैत्यर्थः ॥ तथापि अणोरप्यणिम्ने अतिसूक्ष्माय दुर्ज्ञेत्वात् ॥ वस्तुतस्तु अ
परिगण्यं इयत्तानीतं धाम महिमा यस्य तस्मै नैवेन दसंभावितं यतः महानचिन्त्योऽनुभावो यस्य ॥ ८ ॥ तन्महैः सनातनत्वं अपरिमेयत्वं चोपपादय

कांचीकलापवलयहारनूपुरशोभितां ॥ कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीं ॥ ६ ॥ सुदर्शनादि
भिः स्वास्त्रैर्मूर्तिमद्भिरुपासितां तुष्टाव देवप्रवरः ॥ सशर्वः पुरुषं परं ॥ सर्वामरगणैः साकं सर्वांगैरव
निंगतैः ॥ ७ ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमाया गुणाय निर्वाणसुखार्णवाय ॥ अणोरणि
म्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥ रूपं तवैतन्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतां
त्रिकेण ॥ योगेन धातः सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्व

निरूपमिति हे पुरुषर्षभ हे धातः एतत्तवरूपं वैदि
केन तांत्रिकेण च योगेन उपायेन श्रेयोर्थिभिः सदा इज्यं पूज्यं अतो नेदमिदानामपूर्वं जातमिति भावः ननु यूयं देवाः स्वरूपः स्वेन प्रतिष्ठाः सत्यं स
र्वेप्येतैर्वा न भूता इत्याह ॥ हुअहो हस्फुटं अमुष्मिन्नेत्वयि नोस्मान्त्रिलोकांश्च सह पश्यामि तत्र हेतुः विश्वमूर्तौ विश्वं मूर्तौ यस्य ॥ अतस्तवैतद्रूपं
परिच्छिन्नमपि न भवतीति भावः ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वमूर्त्तिस्त्वमेवाहत्त्वयीति॥ घटस्यमन्तिकायथा आदिरंतश्चमध्यंचतथात्वंअस्यजगतः॥ तत्रहेतुः परस्मात्प्रधानादपिपरः १०
मृत्तिकादृष्टांतेनपरिणामंप्राहंवारयति॥ त्वमिति॥ स्वयास्वाधीनया अत एव गुणानांअव्याघेपरिणामिप्रगुणमेवत्वांयुक्ताः प्रकृ-
तिमनीषिणोविवेकिनः॥ विपश्चितः शास्त्रज्ञाः॥ ११॥ एतदेवसदृष्टांतमाह॥ यथाग्निकाष्ठेमथनेन अमृतमाज्यंगोषुदोहेन

त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे॥ त्वमादिरंतो जगतोस्य मध्यं
घटस्य मृत्स्नेव परः परस्मात्॥१०॥ त्वं माययात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रवि-
ष्टः॥ पश्यंति युक्ता मनसा मनीषिणो गुणव्यवाये प्यगुणं विपश्चितः॥११॥ यथाग्निमेधस्य
मृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिं॥ योगैर्मनुष्या अधियंति हि त्वां गुणेषु बुद्ध्या कव-
यो वदंति॥१२

दिना॥ भुवि अन्नंब्रीह्यादिकर्षणादिना अंबु खननेन॥ उद्यमने पुरुषकारे वाणिज्यादिना वृत्तिं जीविकां॥ एवं ह्यं
बुनः उद्यमने घटीयंत्रादिनो हरणो॥ योगैरुपायैर्मनुष्या अधियंति प्राप्नुवंति॥ तथा कवयस्त्वां बुध्या गुणेषु अधियंति वदंति च॥१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥२१॥

हे नाथ सरोजनाभ अतिचिरादीप्सितमर्थं नयोगैकप्राप्यं त्वां सम्यगुज्जिहानं आविर्भवंतं प्रत्यक्षतः दृष्ट्वाऽद्य वयं निर्वृतिं गताः द
वार्ताः दवाग्निपीडिताः ॥१३॥ यद्विधेयं तत्कथयेति चेत्तत्राह हे अंतरात्मन् अशेषसाक्षिणस्तव बहिः किं वान्यैर्विज्ञाप्यम
स्ति ॥१४॥ तर्ह्येवं किंचित्कुरु हेति चेत्तत्राह ॥ अहमिति ॥ अग्नेः केनचिद्विस्फुलिंगा इव तेन त्वत्तो वयं ह्यभिभाताः संतः आत्मनः

गे त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थं ॥ दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा
इवार्ता दवगानमंभः ॥१३॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलं
समागतास्ते बहिरंतरात्मन् किं वान्यविज्ञाप्यमशेषसाक्षिणः ॥१४॥ अहं गिरित्रश्च सुरा
दयो ये दक्षादयो ग्नेरिव केतवस्ते ॥ किं वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमं
त्रं ॥१५॥ श्रीशुक उवाच ॥ एवं विरिंच्यादिभिरीडितस्तद्विज्ञाय तेषां हृदयं यथैव ॥ जगाद जी
मूतगभीरया गिरा बद्धांजलीन्संवृतसर्वकारकान् ॥ प्रत्यभिषिक्तः ताम् ॥१६॥

ज्ञाप्येयः किं वा विज्ञाः अतस्त्वमेव द्विजानां देवानां च मंत्रं विधत्स्व
इदं कुरु तेनोपायमुपदिशेत्यर्थः ॥१५॥ हृदयं मंत्र उपदेश व्याईतो अभिप्रेतं यथा तथैव विज्ञाय जगाद ॥ संवृतानि नियमितानि सर्वाणि कारकाणि का

राम
॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरस्यापि तथैवाभिप्रेतमित्याह॥ एक एवेश्वरः समर्थोपि॥१७॥ हे सुराः देवा अन्ये च गंधर्वादयः॥१८॥ वः आत्मनः यावद्भवो वृद्धिमेव
ति॥१९॥ अर्थस्य प्रयोजनस्य पदवीं सिद्धिं गतैः। ततः पश्चादहिमूषकवद्वध्यघातकभावेन वर्तितव्यमिति शेषः॥ यद्वा पेटिकायां नि

एक एवेश्वरस्तस्मिन् सुरकार्ये सुरेश्वरः। विहर्तुं कामसंतानाहमसुद्रोन्मथनादिभिः॥१७॥ श्री
भगवानुवाच॥ हं तब्रह्मन्नहोंगभो हे देवा मम भाषितं। स्रणुताव हिताः सर्वे श्रेयोवः स्याद्य
थासुराः॥१८॥ यातदानवदैतेयैः तावत्संधिर्विधीयतां॥ कालेनानुगृहीतैस्तैर्यावद्वो भव
आत्मनः॥१९॥ अरयोपि हि संधेया सति कार्यार्थगौरवे॥ अहिमूषकवद्देवा ह्यर्थस्य पदवी
गतैः॥२०॥ अमृतोत्पादने यत्नः क्रियतामविलंबितं॥ यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोऽमरो भ
वेत्॥२१॥ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं
सहायेन मया देवा निर्मंथध्वमतंद्रिताः॥२२॥

रुद्धो हि पेटिकायां निर्गमद्वारविधानार्थं प्रथमं मूषकेण सार्धं संधिं वि
धत्ते॥ पश्चात्तमेव भक्षयति विद्वत्स्य यतिनयार्थमार्गप्रवृत्तैः प्रथमं संधेयाः स्वर्थ॥२०॥ ततस्ते सहायत्वं कार्यं तदाह अमृतोत्पादन इति॥ यस्मान्म

सबीजसुसमस्यः॥ नंदरज्जु॥५८॥

भा॰ अ॰
॥२२॥

ननु तर्हि तेष्वमृतपानेनामराः फलं त्राह॥ क्लेशभाज इति॥२३॥ बलिभिः सहकारिभिः साध्यामर्थास्तदनुसरणं विना न सिध्यंतीति कृत्वा सामादि

क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः॥२३॥ यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः॥ न संरंभेण सि
ध्यंति सर्वार्थाः सांत्वया यथा॥२४॥ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात्॥ लोभः कार्यो न वो
जातु रोषः कामस्तु वस्तुषु॥२५॥ श्रीशुक उवाच॥ इति देवान्समादिश्य भगवान्पुरुषोत्तमः॥ तेषा
मंतर्दधे राजन्स्वच्छंदगतिरीश्वरः॥२६॥ अथ तस्मै भगवते नमस्कृत्य पितामहः॥ भवश्च जग्म
तुः स्वं स्वं धामोपेयुर्बलिं सुराः॥२७॥ दृष्ट्वारीनप्यसंयत्तान्जातक्षोभान्स्वनायकान्॥ न्यषेधद्दै
त्यराट् श्लोक्यः संधिविग्रहकालवित्॥२८॥ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः॥ श्रिया परमया
जुष्टं जिताशेषमुपागमन्॥२९॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महामतिः॥ अभ्यभाषत तत्
सर्वं शिक्षितं पुरुषोत्तमात्॥३०॥ तदरोचत दैत्यस्य तत्रान्ये ये सुराधिपाः॥ शंबरोरिष्टनेमिश्च ये

कमुपदिशति॥ यूयमिति द्वाभ्यां हे सुराः संरंभेण संभ्रमेण॥ सांत्वया साममार्गेणायथा सिध्यंति च त्रिपुरवासिनः॥३१॥

॥२४॥ वस्तुषु मथनादुत्पन्नेषु॥२५॥२६॥ सुरल्कवति मुपेयुः उपजग्मुः॥२७॥ असंयत्तानपि दृष्ट्वा श्लोक्यः कीर्त्यर्हः॥२८॥ वैरोचनिं बलिं जितमशेषं त्रैलोक्यं येन तं॥२९॥ तत्सर्वं अमृतोन्मथनादि॥३०॥ तत्र ये अन्ये असुराधिपाः पौलोमकालेयादयः शंबरादयश्च तेभ्यश्चारोचत॥३१॥

॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संविदंसमयं ॥३२॥ धपरिघाद्रवबाहवोयेषां ॥३३॥ ३४॥ विसर्जितः प्रस्थापितः ॥ सुपर्णोतत्रस्थितेवासुकेरगमनायोगादितिभाव ॥३९॥ ॥ इतिअष्टमे

ततोदेवासुराःकृत्वासंविदंकृतसौहृदाः ॥ उद्यमंपरमंचक्रुरमृतार्थेपरंतप ॥३१॥ ततस्तेमंदर
गिरिमोजसोत्पाट्यदुर्मदाः ॥ नदंतउदधिंनिन्युःशक्ताःपरिघबाहवः ॥३३॥ दूरभारोद्वहश्रां
ताःशक्रवैरोचनादयः ॥ अपारयंतस्तंवोढुंविवशाविजहुःपथि ॥३४॥ निपतन्सगिरिस्त
त्रबहूनमरदानवान् ॥ चूर्णयामासमहताभारेणकनकाचलः ॥३५॥ तांस्तथाभग्नमनसो
भग्नबाहूरुकंधरान् ॥ विज्ञायभगवांस्तत्रबभूवगरुडध्वजः ॥३६॥ गिरिपातविनिःपिष्टान्
विलोक्यामरदानवान् ॥ ईक्षयाजीवयामासनिर्जरान्निर्व्रणान्यथा ॥३७॥ गिरिंचारोप्यगरु
डेहस्तेनैकेनलीलया ॥ आरुह्यप्रययावब्धिंसुरासुरगणैर्वृतः ॥३८॥ अवरोप्यगिरिंस्कंधात्सुप
र्णःपततांवरः ॥ ययौजलांतउत्सृज्यहरिणासविसर्जितः ॥३९॥ इतिअष्टमेमंदराचलानयनेषष्ठो
ध्यः ॥६॥ ॥ ६८ ॥

भा· अ·
॥२३॥

तस्त्रमे मथ्यनोऽग्रतविषभीत्याखिलेजनैः ॥ कृतःसनऋपयारुद्रःपपौविषमितार्थ्यते ॥ फलभागेनतवाप्यमनेभागोभविष्यतीतिसंमंत्र्यवासुकिं
नेत्रंगिरौपरिवीयसर्वेदेवाअब्धिमथितुमारेभिरे ॥ १ ॥ वासुकेर्मुखंजीवंदैत्यानग्राहयितुमेवहरिंहरिःपुरस्तात्मुखंजग्राहेनतो४ मबनमुखं

शुकउवाच ॥ तेनागराजमामंत्र्यफलभागेनवासुकिं ॥ परिवीयगिरौतस्मिन्नेत्रमब्धिंमुदान्वि
ताः आरेभिरेसुरायत्ताअमृतार्थेकुरूद्वह ॥ १ ॥ हरिःपुरस्ताज्जगृहेपूर्वंदेवास्ततोभवन् ॥ तन्ने
च्छन्दैत्यपतयोमहापुरुषचेष्टितं ॥ २ ॥ नगृह्णीमोवयंपुच्छमहेरंगममंगलं ॥ स्वाध्यायश्रुत
संपन्नाःप्रख्याताजन्मकर्मभिः ॥ ३ ॥ इतितूष्णींस्थितान्दैत्यान्विलोक्यपुरुषोत्तमः ॥ स्मय
मानोविसृज्याग्रंपुच्छंजग्राहसामरः ॥ ४ ॥ कृतस्थानविभागास्तएवंकश्यपनंदनाः ममंथुःप
रमायत्ताअमृतार्थंपयोनिधिं ॥ ५ ॥ मथ्यमानेर्णवेसोद्रिरनाधारोह्यपोविशत् ॥ ध्रियमाणोपि
बलिभिःगौरवात्पांडुनंदन ॥ ६ ॥ नेसुनिर्विण्णमनसःपरिम्लानमुखश्रियः ॥ आसन्स्वपौरुषेणनष्टे

जगृहुः ॥ २ ४ ॥ कृतोधाररोत्स्थानविभागोयैः ॥ ५ ६ ॥ दैवेनहेतुनास्वपौरुषेनष्टेसति ॥ ७ ॥ ॥ ६२ ॥

राम
॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विघ्नेशस्य विधिं तेन रचितं विघ्नं अवितथः सत्योऽभिसंधिः संकल्पो यस्य ॥ ७ ॥ लक्षयोजनप्रस्तारो विस्तारो यस्यास्ति मितस्तथा तेन पृष्ठेन ॥ ८ ॥ तस्य गिरेरावर्तनं
भ्रमणं ॥ अंगकंडूयनं मेने ॥ १० ॥ आसुरेण असुराकारेण दैवेन देवाकारेण रूपेण विज्ञातः ॥ ११ ॥ १२ ॥ आत्मनि देवदैत्यमध्ये गोत्रे दाद्यरूपेण नेत्रे

विलोक्य विघ्नेशविधिं तदेश्वरो दुरंतवीर्योऽवितथाभिसंधिः ॥ कृत्वा वपुः काच्छपमद्भुतं महत्प्र
विश्य तोयं गिरिमुज्जहार ॥ ८ ॥ तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः ॥
दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ॥ ९ ॥ सुरासुरेंद्रैर्भुजवीर्यवेपितं प
रिभ्रमंतं गिरिमंग पृष्ठतः ॥ बिभ्रत्तदावर्तनमादिकच्छपो मेनेंऽगकंडूयनमप्रमेयः ॥ १० ॥ तथाऽ
सुराणाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ॥ उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागें
द्रमबोधरूपः ॥ ११ ॥ उपर्यगेंद्रं गिरिराडिवान्यः आक्रम्य हस्तेन सहस्रबाहुः ॥ तस्थौ दिवि ब्रह्मभ
वेंद्रमुख्यैरभिष्टुवद्भिः सुमनोभिवृष्टः ॥ १२ ॥ उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समे
अमेयाबोधरूपेणापरेणाहरिणा ॥ क्षोभितं नक्राणां चक्रं समूहो य धिताः ॥ ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रच
स्मिन ॥ १३ ॥

भा॰ अ॰
॥२४॥

हृदशश्चमुखानिचश्वासाश्च अहींद्रस्यसाहस्रं अपरिमिताः कठोराः येदृगादयस्तेभ्योनिर्गताभ्यामग्निधूमाभ्यामाहतंवर्चोयेषांते ॥ सरलाद्रुमविशेषाः
॥१४॥ देवांश्चभगवद्वशाघनाः समभ्यवर्षन् ॥ समुद्रोर्मिभिः उपगूढावायवश्चशीतलाववुः वर्णप्रवरादानियेषां ॥१५॥ ॥१६॥ धृतोऽद्रिर्येनसधृताद्रिः

अहींद्रसाहस्रकठोरदृग्मुखश्वासाग्निधूमाहतवर्चसोसुराः पौलोमकालेयबलील्वलाद्योदवा
ग्निदग्धाः सरलाइवाभवन् ॥१४॥ देवांश्चतच्छ्वासशिखाहतप्रभान्धूम्राम्बरस्रग्वरकंचुकान
नान् ॥ समभ्यवर्षन्भगवद्वशाघनाववुः समुद्रोर्म्युपगूढवायवः ॥१५॥ मथ्यमानात्तथासिंधो
र्देवासुरवरूथपैः ॥ यदासुधानजायेतनिर्ममंथाजितः स्वयं ॥१६॥ मेघश्यामः कनकपरि
धिः कर्णविद्योतविद्युन्मूर्ध्निभ्राजद्विलुलितकचः स्रग्धरोरक्तनेत्रः । जैत्रैर्दोर्भिर्जगदभयदै
र्दंदशूकंगृहीत्वामथ्नन्मथ्नाप्रतिगिरिरिवाशोभताथोधृताद्रिः ॥१७॥ ॥ छ

भगवान्परमपुरुषोनंतरमशोभतेत्यन्वयः कथंभूतः कनकपरिधिः पीतवासाः कर्णयोर्विद्योतमानाविद्युत्कुंडललक्षणायस्यसतथा ॥ मू
र्ध्निभ्राजंतोलुलिताः कचायस्यसतथा जैत्रैर्जिष्णुभिः दंदशूकंसर्पं प्रतिगिरिः प्रतिद्वंद्वीपर्वतः ॥१७॥ ॥ ॥१७॥

राम
॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हालाहलमिसाह्वानामयस्य ॥ संभ्रांता मीना उत्क्रान्ता मकरादयश्च यस्मिन्तस्मात् तिम्यादिभिराकुलात् ॥ १८ ॥ तद्विषं अप्रति अप्रतिमं ॥ प्रतिक्रिया
रूपमिति वा कुतः उग्रो वेगो यस्य ॥ तद्देवा हृद्दिशि दिशि दिश्रीति ॥ यद्वा ॥ उग्रा वेगा रोमांचस्वेदादयो यस्मात् ॥ अतएव सद्यो विलोक्य भीता अन्ये

निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः संभ्रांतमीनोन्मकराहिकच्छपात्ति
मिद्विपग्राहतिमिंगिलाकुलात् ॥ १८ ॥ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्र
ति ॥ भीताः प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवं ॥ १९ ॥ विलोक्य तं देववरं त्रि
लोक्या भवाय देव्याभिमतं मुनीनां ॥ आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः
॥ २० ॥ प्रजापतय ऊचुः ॥ देवदेव महादेव भूतात्मन्भूतभावन ॥ त्राहि नः शरणापन्नांस्त्रैलोक्यदह
नाद्विषात् ॥ २१ ॥

न्यैनकेनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः ॥ १९ ॥ त्रिलोक्या उद्भवाय देव्या सह अद्रौ कैला
से आसीनं तथापि मुनीनामभिमतं तेषामेवापवर्गाय तपो जुषाणं ॥ २० ॥ निर्गुणः सगुणश्चैव वशिः बहिः पराक्रमैः ॥ स्तुवंतः प्रजेशानां नामत्यं तांतर
तयोः ॥ २१ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥२५॥

२२॥ न खलेवं भूतो विष्णुरिति प्रसिद्धं तत्राह । गुणामप्येति ॥ अस्य जगतो यदा सर्गाः स्थितिध्वंसेन दाहे ॥ ममनू ब्रह्मकृस्तत्र सिद्धं ज्ञानं ब्रह्मादिसंज्ञां धत्से २३
तत्र हेतुः खं ब्रह्मेति ॥ स दमनो भीवान् देवतिर्यगादिरूपान् भावयतीति तथा ॥ स्वं ज्ञानं तु खल्वभिरिक्तं नास्तीत्याह । आत्मैव खलु नानाशक्तिभिर्जगद्रूपेणा
भासः यस्मादीश्वरः ॥२४॥ स्वतः सिद्धज्ञानसमुत्पादयन् ॥ जगदात्मना आभानप्रकारमाह । त्वं शब्दस्य वेदस्य योनिः अतस्त्वं तत्सिद्धज्ञानः स्वजग

त्वमेकः सर्वजगतः ईश्वरो बंधमोक्षयोः ॥ तं त्वामर्चन्ति ( ) आलाः प्रपन्नार्तिहरं गुरुं ॥२२॥ गुणामप्यास्व
शक्त्यास्य सर्गस्थित्यप्ययान् विभो ॥ धत्से यदा स्वदृक् भूमन् ब्रह्मविष्णुशिवाभिधां ॥२३॥ ब्रह्म परमं
गुह्यं सदसद्भावभावनः ॥ नानाशक्तिभिराभातः त्वमात्मा जगदीश्वरः २४ त्वं शब्दयोनिर्जगदा
दिरात्मा प्राणेन्द्रियद्रव्यगुणः स्वभावः कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनन्ति
॥२५॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपंकजं ॥ कालं गतिं तेऽखिलदेवतात्म

दादिर्महत्तत्त्वं ॥ आत्मा च अहंकारः कथं भूतः प्राणेन्द्रियद्रव्याणां कारणभूता गुणा यस्य राजसा नो दिशश्च कर्णौ रसनं जलेशं ॥२६॥
दिविर्विषयः इत्यर्थः स्वभावात् यश्चलमेव क्रतुः संकल्पः सत्यमृतं वेति यो धर्मः सत्त्वं महदादिरूपत्वे हेतुः त्रिवृत् त्रिगुणात्मकपदक्षरं प्रधानं त्व
तदाम्नायं तदामनंति ॥ यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाह । रित्यर्थः ॥२४॥ अखिलदेवतात्मागिनः सर्वा देवता इति श्रुतेः ॥ सोग्निस्ते मुखं

श्लोकभवद्वितीयोनेपुष्पदुःखस्यस्वंबंधः ॥२६॥

राम
॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परेअवरेवयेआत्मानोजीवास्तेषामाश्रयस्तवात्माहंकारः ॥२७॥ त्रयीमयात्मनवेदत्रयमेत्री ॥२८॥ पंचोपनिषदः तंसुरूपाघोरसद्योजातावामदेवेशानरूपा
मंत्राः ॥ ये मुखैरष्टोत्तरविंशन्मंत्राणांवर्गः ॥ तेषामेवमंत्राणांपदच्छेदेनाष्टोत्तरत्रंशल्कलात्मकामंत्राइत्यर्थः ॥ अवस्थितिः उपरतावस्था ॥२९॥ अधर्म

नाभिर्नभस्तोश्वसनंनभस्वानुरूपंचवस्त्रंषिजलंस्मरेत ॥ पूरावरात्माश्रयणंतवात्मासोमोमनो
द्यौभगवन्शिरस्ते ॥२८॥ कुक्षिः समुद्रागिरयोस्थिसंघारोमाणिसर्वौषधिवीरुधस्ते ॥ छंदां
सिसाक्षात्तवसप्तधातवःत्रयीमयात्मनहृदयंसर्वधर्मः ॥२९॥ मुखानिपंचोपनिषदस्तवेश
येस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यंपरमार्थतत्त्वंदेवस्वयंज्योतिरवस्थितिस्ते ॥२९॥ छा
यात्वधर्मोर्मिषुयैर्विसर्गोनेत्रत्रयसत्वरजस्तमांसि ॥ सांख्यात्मनःशास्त्रकृतस्तवेक्षाछंदोम
यादेवऋषिःपुराणः ॥३०॥ नतेगिरित्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यंज्योतिःप

स्तोर्मिषुदंभलोभादिषुयेरुर्मिभिर्विसर्गः ॥ प्रतिसर्गः संहारः ॥ यद्वा ये सत्वादिभिः विवि रंपरत्वरजस्तमश्चसत्वनयत्रह्मविरस्तभेदं ॥३१॥
धः सर्गः ॥ नानिनेत्रत्रयं ॥ हेदेवछंदोमयः ऋषिर्वेदः सतवेक्षाईक्षणं ॥ सा

सा श्वानुग्निगोपानुमनुर्वेदः नमोवाहं छंदोमयइति ॥३०॥ इति
स्तितिपरप्लानि रविलानोत्लोकपालाद्विनागास्पुनभवति
कुंजः पयाजप्ताहिनामिकिलयोनिः यत्रिरसामेदेवस्य ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰ उ॰

॥२६॥

कामश्चअध्वरश्चदक्षयज्ञः त्रिपुरा तथा च ये अनेक भूतद्रुहस्तान् क्षपयतः संहरतस्तेन त्वमेकः स्तूयते न भवति॥ अल्पाल्पमेतदित्यर्थः। गर्गमुख्या सोप्य
वनपभावी खेनसिद्ध तन्निर्देश्यः स्तूयते लंन भवतीत्यत्र हेतुः यस्त्वं भवान् स्वनेत्रवह्निविस्फुलिंगस्याग्निखयेदं जगद्भस्मितं भस्मजातं न वेदनाले
चयस्यपि॥३२॥ तदेवं नित्यपरानुग्रहेत्वयं त्वां येनैं दंतिनेनिम ल्लाइत्याकुः॥ यिउभयासह वरं तत्र सा विजरंरतं कामिनेकत्स्यंने प्रलंपनित

कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तूयते न तत्ते॥ यस्त्वंतकालइदमात्म
कृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं न वेद॥३२॥ येत्वात्मरामगुरुभिर्हृदि चिंतितांघ्रि
द्वंद्वं चरंतमुमयातपसाभितप्तं॥ कत्थंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तवहा
तलज्जाः॥३३॥ ॥ ७ ॥ श्रीगोविंदायनमः ॥ ७

यास्मशाने चरंतं उग्रकूरस्पपरुषं च हिंसकं कत्थंते॥ कथंभूतं॥ आत्मारामाश्चते गुरवो विरक्त हिनेभ्यः सेष्टारस्तैर्हृदि चिंतितमंघ्रिद्वंद्वं यस्य तथाभूतमपि त
पसाभितप्तमपि नेनूनं तव तोतिमविदन्तिति काकुः लब्धीलाने वविदुरित्यर्थः। अतो हा त लज्जा॥ त्यक्तत्रपाः कथमात्मारामैः सेवितचरणयुगल
स्य कामित्वसंभवः कथं वा तपसाभितप्तस्य श्मशानस्योग्रत्वं परुषत्वं वा संभवतीत्यविचार्यैव प्रलपादित्यर्थः॥३३॥ ॥ ॥३३॥

राम

॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानं तावन्निंदकानां वा न महांतोपि न वंत त्वं न जानंतीत्याहुः तत्तस्मात्तव स्वरूपस्य गमने ज्ञाने ब्रह्मादयोपि न समर्थाः संस्तवने तु कुतः शक्ताः स्युः तत्र च
यं कथं प्रभवाम यतस्तेषां सर्गे अत्यंतार्वाचीनाः ॥ तथापि यदेतत्संस्तवनं तदात्मशक्तिपरिमितमात्रमित्यर्थः ॥३४॥ तदेवाहुः ॥ एतत्परमिति न परं स्व
पं तथापि त्वद्दर्शनादेव कृतार्था वयमित्याहुः मृडनाय हीति ॥३५॥३६॥ मतृप्र मा वम अविचार्य विषपाने प्रवृत्तं मां कथं चिद्दिद्विग्य प्रिया वारयेदिति जिज्ञा

तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः किमुत संस्तवने वयं
तु तत्सर्गसर्गविषया अपि शक्तिमात्रं ॥३४॥ एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लो
कस्य व्यक्तिस्ते व्यक्तकर्मणः ॥३५॥ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः
सर्वभूतसुहृद्देव इदमाह सतीं प्रियां ॥३६॥ शिव उवाच ॥ अहो वत भवान्येतत्प्रजानां पश्य वैश
सं ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ॥३७॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे
एतावान्हि प्रभोरर्थो यद्दीनपरिपालनं ॥३८॥ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः ॥ बद्धवै

कृपानाममनुत्ताप गतन्नाह ॥ अहो वतेति सार्धैश्चतुर्भिः वैशसं दुःखं प्राणपरिप्सू रेषु भूतेषु मोहितेष्वात्ममायया ॥३९॥
नां प्राणरक्षणेच्छूनां मे मया प्रभोः समर्थस्य अर्थः कार्यं ॥३७॥३८॥ किंच बद्धवैरेषु परस्परं जिघांसत्सु ॥३९॥ ॥ ॥ छ ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥२७॥

कृपयतः कृपां कुर्वतः पुंसः ॥४०॥ मे मम तः स्वस्ति क्षेमं भवतात् तत्र सुखेन जीवितमस्त्वित्यर्थः ॥ जग्धुमत्तुं ॥४१॥ करतलीकृत्य करतलपरिमितमात्रं कृत्वा ॥४२॥ जल
कल्मषः जलदोषो विषं ॥ यस्मात् गले नीलं चकार साधोः कृपालोः ॥४३॥ प्रस्कन्नं गलितं अपरे च ये सविषाः ते पि जगृहुः अनेन विषस्य नीव्रतोक्ता ॥४६॥

पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ॥ प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥४०॥ तस्मादिदं गरं भुं
जे प्रजानां स्वस्तिरस्तु मे ॥ एवमामंत्र्य भगवान् भवानीं विश्वभावनः ॥ तद्विषं जग्धुमारेभे प्रभावज्ञा
न्वमोदत ॥४१॥ ततः करतलीकृत्य व्यापि हालाहलं विषं ॥ अभक्षयन्महादेवः कृपया भूतभाव
नः ॥४२॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥ यच्चकार गले नीलं तच्च साधोर्विभूषणं ॥४३॥
तप्यंते लोकतापेन साधवः प्रायशो जनाः ॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥४४॥ निशम्य
कर्म तच्छंभोर्देवदेवस्य मीढुषः ॥ प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ॥४५॥ प्रस्कन्नं पिबतः
पाणेर्यत्किंचिज्जगृहुः स्म तत् ॥ वृश्चिकाहिविषौषध्यो दंदशूकाश्च ये परे ॥४६॥ ॥ इति श्रीभागव
ते महापुराणे अष्टमस्कंधे अमृतमथने सप्तमोध्यायः

॥ इति अष्टमे सप्तमोध्यायः ॥ श्रीसांबसदाशिवः ॥ छ ॥

राम
॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमे मथ्यमाने ब्धौ लक्ष्म्या विष्णोर्हृते ऽसुरैः धन्वंतरेर्हृते सोमे मोहिन्या द्रवर्ष्यते ॥१॥ हविर्धानी सुरभिः ॥२॥ देवयानस्य ब्रह्मलोकमार्गप्रापक
स्य यज्ञस्य संबंधिनेह विषे ॥२॥ ईश्वरशिक्षया प्रागेव कृतनया ॥३॥ भगवतो यः श्वेताद्रिः कैलासः तत्सम हिम हिमानं ॥ दंतैः शिखरतुल्यैर् हरं

शुकउवाच १ पीते गरे वृषांकेण प्रीतास्ते मरदानवाः ॥ ममंथुस्तरसा सिंधुं हविर्धानी ततो भवत् ॥१॥ तामग्निहो
त्रीमृषयो जगृहुर्ब्रह्मवादिनः ॥ यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥२॥ ततउच्चैःश्रवानाम
हयो भूच्चंद्रपांडुरः ॥ तस्मिन्बलिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ॥३॥ ततऐरावतो नाम वारणें
द्रो विनिर्गतः ॥ दंतैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिं ॥४॥ ततोभवत्पारिजातः सुरलोक
विभूषणं ॥ पूरयत्यर्थिनो यो र्थैः शश्वद्भुवि यथा भवान् ॥५॥ कौस्तुभाख्यमभूद्रत्नं पद्मरा
सचेद्रवत्यां द्रुरइत्यनुषंग ॥४॥५॥ ६॥ ॥ गो महोदधेः ॥ तस्मिन्मणौ स्पृहां चक्रे वक्षोलंकरणे हरिः ॥६॥
॥ छ ॥ छ छ ॥ श्रीरामायनमः श्री० ॥ छ

२८
भा॰ अ॰
॥२९॥

वल्गुभिर्गत्यादिभिः स्वर्गिणां रमण्योऽतिकर्न्य ॥७॥ सुदामापर्वतः तत्रैकस्यां दिशि जाता सौदामिनी स्फटिकादिमयगिरिशृंगे ऽधिकं विस्फुरंती वि
द्युदिव कांत्यादिशो रंजयती श्रीः संपत्साक्षान्मूर्तिधारिणी सती सैव भगवत्परा रमाऽविरभूदित्यर्थः ॥८॥ तस्या रूपादिभिर्महिम्ना आक्षिप्तं चे
तो येषां ॥९॥ भगवद्वक्षस्थितप्राप्तिया विलोकितानां देवानां यथाहं वै सर्वे संपन्नाः इति मत्सुराणां च तद्विपर्ययं च क्रे अभिषेकमहोत्सवद्रव्यं कं त्व

ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः ॥ रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः
॥७॥ ततश्चाविरभूत्साक्षाच्छ्री रमा भगवत्परा ॥ रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा
॥८॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥९॥
तस्याश्चासनमानिन्ये महेंद्रो महदद्भुतं ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि ॥१०॥ अभिषे
चनिकाभूमिराहरत्सकलौषधीः ॥ गावः पंचपवित्राणि वसंतो मधुमाधवौ ॥११॥ ॥ छ

ज्ञानादिपरिहारेण भगवत्प्राप्तिप्रकारमाह ॥ तस्याश्चासनमित्यादि अथासीद्भूरूपी स्वतः प्राक्कनेतग्रंथेन ॥१०॥ आभिषेचनिकाः अभिषेको
चिताः पंचपवित्राणि पंचगव्यानि मधुमाधवौ चैत्रवैशाखभवं फलपुष्पादियोगं तत्तेऽपि हृद्वैकेऽसत एवार्थः मधुमासेभवं मध्विनिवा ॥११॥ ॥

२८
राम
॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिषेकं अभिषेकोचितं विधिं नर्तकानां स्त्रियः नर्तक्यः ॥१२॥ शंखवेणुवीणाश्च व्यनादयन् तुमुलो निःस्वनो येषां तान् मृदंगादीन् ॥१३॥ १५॥
१४॥ पद्मं आश्रयं कवं नित्यं ॥ अव्यभिचारिणो नित्याः संतो गुणा यस्मिन् तत् तन्नान्वविंदत् कचिच्छस्य विद्वेषस्य सद्भावात् ॥१९॥ न देवा हन्त यस्मिन्

ऋषयः कश्यपाद्याश्चक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गंधर्वा नर्तक्यो ननृतुर्जगुः ॥१२॥ मेघा
मृदंगपणवमुरजानकगोमुखान् ॥ व्यनादयं शंखवेणुवीणास्तुमुलनिःस्वनान् ॥१३॥ ततोभि
षिषिचुर्देवीं श्रियं पद्मकरां सतीं ॥ दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥१४॥ समु
द्रः पीतकौशेयवाससी समुपाहरत् ॥ वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां ॥१५॥ भूषणानि वि
चित्राणि विश्वकर्मा प्रजापतिः ॥ हारं सरस्वती पद्ममजो नागाश्च कुंडले ॥१६॥ ततः कृतस्वस्त्ययनोत्प
लस्रजं नदद्द्विरेफां परिगृह्य पाणिना ॥ चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं ॥१७॥
स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं ॥ ततस्ततो नूपुरवल्गुसिंजितैर्विसर्पती हेम
॥ ध २९ ॥ ॥ श्री० २९ ॥ ॥ लतेव सा बभौ ॥१८॥ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्य

भिचारिसद्गुणं ॥ गंधर्वसिद्धासुरयक्षचारणत्रैपिष्टपेया
दिषु नान्वविंदत ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰ ॥३०॥

त देवा हन्त न मि मि ति त्रिभिः ॥ मन्युर्निर्जयो नास्ति दुर्वाससः प्रभृतिषु गुरुरुद्रशुक्रादिषु संगवर्जितं ज्ञानं नास्ति ॥ महत्स्वपि ब्रह्मसोमादौ न कामनिर्जयः परतो
व्यपाश्रयः परापेक्षं इंद्रादिः स किमीश्वरः ॥२०॥ न भूतसौहृदं परशुरामादिषु न मुक्तिकारणं त्यागः शिबिप्रभृतिषु ॥ पुंसः कार्तवीर्यादेर्वीर्यम
स्ति अजवेगनिष्कृतं कालवेगेन परिहृतं तु न भवति ॥ गुणसंगवर्जितः सनकादिः द्वितीयः मम वरो नहि ॥ समाधिनिष्ठत्वात् ॥२१॥ चिरायुष्य

नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितं ॥ कश्चिन्महांस्तस्य न कामनिर्जयः स
ईश्वरः किं परतो व्यपाश्रयः ॥२०॥ धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिका
रणं ॥ वीर्यं न पुंसोस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसंगवर्जितः ॥२१॥ क्वचिच्चिरायु
र्न हि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः ॥ यत्रोभयं कुत्र च सोप्यमंगलः सुमंगलः क

ष्यपि मार्कंडेयादेः शीलं मंगलं नास्ति ॥ इंद्रियदमनशीलत्वात् ॥ क्वचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ आयु श्च न कांक्षते हि मां ॥२२॥
षस्तु स्थैर्यं न वेद्यं दुर्ज्ञानं भगवद्द्वेषेण अकस्मादेव मृत्युसंभवात् ॥ यत्र क्व च श्रीरुद्रमार्कंडेयादिवदिंद्रियदमनाद्यभावाच्छीलं मंगलं चायुर्निश्चेयस
मयमस्ति ॥ न चान्यः पूर्वोक्तः कश्चिद्दोषः तथापि सोप्यमंगलः श्मशानवासाद्यमंगलचेष्टितः श्रीमुकुंदं स्वीकृत्याह कश्चेति ॥ कश्चित्तु मंगल
निरवद्यश्च स तु मां न हि कांक्षते आत्मारामत्वात् ॥ ३ ॥ २२ ॥

राम ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविमन्स्यपरमांनिरपेक्षमपि मुकुंदमेवव्वरं वव्रेनत्किं॥ अव्यभिचारिभिः सद्भिर्धर्मज्ञानादिभिर्गुणैर्नजैकाश्रयतया चैनैरपेक्ष्येणावरं सर्वोत्तमंनत्र
हेतुः अगुणाश्रयंप्रकृतिगुणातीतंपाठांतरेप्ययमेवार्थः॥ अनन्यस्वस्यदृष्टिं॥ किंचसर्वैर्गुणैःशोभामादिभिरपेक्षितंवृतं॥ अयंभावः॥ यद्यपि
स्वयमात्मारामत्वेनाप्यनिरपेक्षः तथाप्याश्रितात्अशिमादिसिद्धीर्यथानोपेक्षतेतथामामपिनोपेक्षतेनत्वावनेवतत्सेवधाहंकृतार्थ्यास्यांकिमनैः॥

एवंविमस्य व्यभिचारितद्गुणैर्वरंनिजैकाश्रयतया गुणाश्रयं॥ वव्रेवरंसर्वगुणैरपेक्षितं रमामुकुंदंनिरपेक्षमीप्सितं॥ २३॥ तस्यांसदेवात्तउरांनीनवकंजमालांमाद्यन्मधुव्रतवरूथगिरोपघुष्टां॥ तस्योनिधायनिकटेतदुरस्स्वधाम सव्रीडहासविकसन्नयनेनयाता॥ २४॥ ॥

प्राक्तैरिरितितमेवहत्तवनीति॥२३॥ तदेवाहतस्यांसदेवोकमनीयांनवकंजमालांनिधायतदनुग्रहंप्रतीक्षमाणातस्थौतस्यनिकटेतस्थौ
कथंभूतांमालांमाद्यंतोयेमधुव्रताः॥ भ्रमरास्तेषांवरूथस्यगिराउपघुष्टांनादितांकथंभूताश्रीःसव्रीडहासेनविकसन्नयनंतेनतस्यउरःस्व
धामयातासतीवसः॥ प्रतीक्षमाणातस्थावित्यर्थः॥२४॥ ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० अ० गवानपि त्रैलोक्याभिहृद्वये स्ववक्षस्तस्याः स्थानं दत्तवानित्याह ॥ तस्या इति विशिष्टा ॥ तस्या विभवाय स्यात्तस्याः ॥ त्रिजगतो जनन्याः श्रियः परं सुहि

॥३१॥ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणे
नेनिरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥२४॥ शंखतूर्यमृदंगानां वादित्राणां पृ
थुः स्वनः ॥ देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥२५॥ ब्रह्मरुद्रांगिरोमुख्याः सर्वे वि
श्वसृजो विभुं ॥ ईडिरेऽवितथैर्मन्त्रैस्तल्लिंगैः पुष्पवर्षिणः ॥२६॥ श्रीशुक उवाच ॥ श्रिया वि
लोकिता देवाः सप्रजापतयः प्रजाः ॥ शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां ॥२७॥ निःसत्त्वा
लोलुपा राजन्निरुद्योगा गतत्रपाः ॥ यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥२८॥ अथासी
द्वारुणी देवी कन्या कमललोचना ॥ असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥२९॥ अथोदधेर्मथ्यमा
रोधयत्तत्र वर्धयत ॥२४॥२६॥ तल्लिंगैर्विष्णुप्रतिपादकैः ॥ नात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमा ८ म

अवितथैर्यथार्थैः ॥२७॥२८॥ वारुणी वरुणादेवता यस्याः सा तन्मयी सुरा ॥२९॥३१॥ ॥ छ ॥ ॥३१॥

दीर्घौ पीवरौ दोर्दंडौ यस्य सः कंबुग्रीवः शंखवन्नाभिरेखात्रिरेखा सुहृत्ना ग्रीवा यस्य ॥३२॥ स्निग्धाः कुंचिताः केशानां मंतोपि यस्य ॥३३॥ इक्ष्वाकूय ज्ञभागभोक्ता
३४॥ अमृतेन आमृतं तद्दृर्णं ॥३५॥३६॥ मिथः दैत्यानां परस्परं कलहो स्याद्नेन योगमायया मोहिन्या वोऽर्थं साधयिष्यामि ॥ अजो नाखिद्यतेत्याहेति द्वौ

दीर्घपीवरदोर्दंडः कंबुग्रीवोऽरुणेक्षणः ॥ श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥३२॥ पीत
वासा महोरस्कः सुमृष्टमणिकुंडलः ॥ स्निग्धकुंचितकेशांतः सुभगः सिंहविक्रमः ॥३३॥ अमृ
तापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षात् विष्णोरंशांशसंभवः ॥ धन्वंतरिरिति
ख्यात आयुर्वेददृगिज्यभाक् ॥३४॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतं ॥ लिप्संतः सर्ववस्तू
न्यक्षिकलशं तरसाहरन् ॥३५॥ नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने ॥ विषण्णमनसो देवा हरिं
शरणमाययुः ॥३६॥ इति तद्दैन्यमालोक्य भगवान् भृत्यकामकृत् ॥ मा खिद्यत मिथोऽर्थं वः साधयि
ष्ये स्वमायया ॥३७॥ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसां ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥३८॥

पः ॥३७॥ न वेदे गाह ॥ मिथ इति ॥ तर्षः कामः ॥ न घ्नन्तानि चेतांसि येषां इत्येवं सम्भवला तां कलिरभूत् ॥३८॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰अ॰
॥३२॥

दुर्बलानां बाह्लीकोऽग्रप्रकारमाह देवा इति द्वाभ्यां ॥ ये देवाः तुल्येनायासेन हेतवः साधकाः तुल्य आयासो हेतुस्त्व धनादिर्येषां मिति वा सत्रयागे यथा सर्वे
षां समफलत्वं तद्वत् ॥ तथा च श्रुतिः ऋद्धिकामाः सत्रमासीरन्निति विधियजमानाः सत्रे ऋत्विजः इति च ॥ ४१ ॥ ४१ ॥ तद्रूपं वर्णयति पंचभिः प्रेक्षणीय
तुल्यमिव …मं सर्वेष्ववयवेषु सुंदरं ॥ समानयोः कर्णयोराभरणे …स्मिन् ॥ सुकपोलं च नद्धुन्नतनासिकं चाननं यस्मिन् ॥ ४२ ॥ ४३ ॥ नव

देवाः स… हेतिषे तुल्यायासहेतवः सत्रयागइवैतस्मिन्नेष धर्मः सनातनः ॥ ४१ ॥ इति स्वास्थ्यसंप
धन्वे देवेनाजानमत्सराः ॥ दुर्बलाः प्रबलीनाजन…हीनकल्मषा नाम्नुडः ॥ ४१ ॥ एतस्मिन्नंतरे विष्णुः
सर्वोपायविदीश्वरः ॥ योषि…पमतिर्दृश्यं संदधार परमाद्भुतं ॥ ४२ ॥ प्रेक्षणीयोत्सवरूपामं सर्वा
वयवसुंदरं ॥ समानकर्णाभरणं सुकपोलोन्नताननं ॥ ४३ ॥ नवयौवननिर्दिष्टस्तनभारकृतोदरं
मुखामोदानुरक्तालिझंकारोद्विग्नलोचनं ॥ ४३ ॥ बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकां ॥ सु
ग्रीवकंठाभरणं सुभुजांगदभूषितं ॥ ४४ ॥

यौवननिर्दिष्टयोः स्तनयोर्भरेण च कृतं मुदरं यस्मिन् ॥ सुष्ठु ग्रीवा यस्मिन् कं
ठे आभरणं यस्मिन् ॥ नचेतत्त्व ॥ शोभना ग्रीवा यस्य तेन कंठाभरणं यस्मिन्निति वा ॥ सुभुजयोरंगदाभ्यां भूषितं ॥ ४४ ॥ ॥ ७८

राम
॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरजां वरेणांसंवीतोनितंब एव द्वीपः विशालत्वात् तत्र शोभायस्याः तया कांच्या प्रकर्षेण विलसन् वल्गु यथा न तथैवं चलतोश्चरणयोर्नूपुरं
यस्मिन् ॥४५॥ सव्रीडेन स्मितेन सह विक्षिप्ताकंपिता या भ्रूः तस्या विलासेन सह यान्यवलोकितानि तैर्दैत्ययूथपानां चित्तस्सु मुहुर्मुहुः का
मुद्दीपयत् ॥ इत्यष्टमेष्टमः ॥ न वै ममोहिनैर्दैत्यैरर्पितेमृततमाजने ॥ तद्वेवनेन देवेभ्यो मतं दत्तमपेयते ॥१॥ अहो रूपं सौंदर्यं धाम द्युतिः इति

विरजां वरं संवीतनितंबद्वीपशोभया ॥ कांच्या प्रविलसद्वल्गुचलच्चरणनूपुरम् ॥४५॥ सव्रीडस्मितवि
क्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ॥४६॥ इति श्रीभागवते म
हापुराणे अष्टमस्कंधेऽमृतमथने अष्टमोऽध्यायः ॥ श्रीशुक उवाच ॥ तेऽन्योन्यतोसुराः पात्रं हरंतस्त्य
क्तसौहृदाः ॥ क्षिपंतो दस्युधर्माण आयांतीं ददृशुः स्त्रियं ॥१॥ अहो रूपमहो धाम अहो अस्या नवं
वयः ॥ इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ का त्वं कंजपलाशाक्षि कुतस्त्या वा किं चिकीर्षसि ॥ क
स्यासि वद वामोरु मथ्नतीव मनांसि नः ॥३॥ न वयं

वदंतः का त्वमित्यादि पप्रच्छुः ॥२॥ मथ्नतीव क्षोभयंतीव ॥३॥ कस्यासीत्यत्र
कमुक्तं स्वामिः ॥ यतस्त्वं न केनचित्स्पृष्टैवास्यां गः ॥ नेति द्वाभ्यां त्वां अमरादिभिरस्पृष्टैवं न जानीमः इति न अपितु जानीम एव ॥४॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानमिदं त्वदृष्टैतत्त्वाभ्यां रोवसंपादितमित्याऊः ॥ नूनमिति ॥ सर्वेंद्रियाणां मनसश्च प्रीतिं विधातुं सघृणेन किं प्रेषितासि ॥ किं वा यदृच्छयैव आगता

नूनं त्वं विधिना सुभ्रु प्रेषितासि शरीरिणां सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किं ॥५॥ सा त्वं नः
स्पर्धमानानामेकवस्तुनि मानिनि ॥ ज्ञातीनां वद्धवैराणां शं विधत्स्व सुमध्यमे ॥६॥ वयं कश्यप
दायादा भ्रातरः कृतपौरुषाः ॥ विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥७॥ इत्युपामंत्रि
तो दैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत् ॥८॥ श्रीभगवानुवा
च ॥ कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः ॥ विश्वासं पंडितो जातु कामिनीषु न याति हि
॥९॥ सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ॥ सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां
॥१०॥ श्रीशुक उ० ॥ इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः ॥ जहसुर्भावगंभीरं ददुश्चामृतभाजनं

सि नैवं नूनं प्रेषितैवेत्यर्थः ॥५॥ ६॥ भेदो विग्रहो यथा न भवेत्तथा ॥७॥ ८॥ संगताः अनुरक्ताः ॥९॥ हे सुरद्विषः ॥१०॥ भावेन केनाप्यभिप्रायेण गंभीरं यथा भ

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईप्सितमिते नशोभायस्यालयामणाहृतं साधुवा असाधुवाययद्यस्युपेत अंगीकुरु मन नहि हि विभजे ॥ १२ ॥ असुरपुंगवादैत्यश्रेष्ठाः प्रमाणामियत्तां मज्ञानं
नः ॥ १३ ॥ १४ ॥ यथोपजोषं यथाप्रीति ॥ अहृतस्यलक्षणं ॥ अहृतं पत्रनिर्मुक्तम् मुक्तं पासः स्वयंभुवा ॥ श्रीसंतमामां गलिकेषुनावन्मात्रेन सर्वदा ॥ प्राग
ग्रेषुकुजेषुविविक्तेषु ॥ १५ ॥ धूपैरामोदितायांमुरभीकृतायां ॥ १६ ॥ अथतस्यांशालायांहेनरेंद्र साकलशपाणिराविवेशाकथंभूता ॥ मणिबंधा

तंशोगनीलामजमाजनंनहरिर्विभर्षईप्सितमिन्नशोभगाणिरे ॥ पद्यम्युपेनकच्चसाध्वसाधुवाहृ
तेमयावीविनजेमुधाभिमानं ॥ इत्यभिव्याहृतेनतस्याआकर्ण्यासुरपुंगवाः ॥ अप्रमाणविद
लस्यात्तं तेयथ्यन्वमस्तत ॥ १४ ॥ अथोपाप्यकृतलानाकुलाचहविषानलं ॥ दत्वागोविप्रभृते
भ्यः कामस्वल्पयनाह्निजेः ॥ १४ ॥ यथोपजोषंवासांसिपरिधायाहृतानिते ॥ कुंजेषुमाविश्रा
न्तंवेश्माश्वभिभूषिताः ॥ १५ ॥ मांशुरेवप्रविष्टेषुसुरेषुदितिजेषुच ॥ धूपामोदितशालायांजु
घांधामास्यदीपकैः ॥ १६ ॥ नस्यांनरेंद्रकरभोरुलसद्दुकूलश्रोणीतरालसगतिर्मदविह्वलाक्षी
दाकनिष्ठकरस्यकरभोवहिः करभः सदृशौ सुवृत्तौ ऊरू यस्याः ॥ साकूजनीकनकनूपुरसिंजितेनकुंभस्तनीकलशपाणि
मा उच्चात्कमनीयंदुकूलंयस्मिंतेनश्रोणीतटेनविशालयाश्रोण्या ॥ लसामंदागतिर्यस्याः सापाठांतरेकरभसदृशायोरूवौलसन्तदुकूलंयस्याः सावासै

रघुविवेक ॥ २७ ॥

श्रोणीतटेन अलसगमनेति स्थूलमद्गविहितं कामिनीपक्षः ८

भा॰ अ॰ तां श्रियः सखीं संवीक्ष्य देवासुराः संमुमुहुः कथंभूतां कनकमये कुंडले यस्याः सा चासौ चारुः कर्णद्वयो यस्याः ध्यायतां विगलितो विस्रस्तः स्तनपट्टि
कामा अंतो यस्याः ॥१८॥ एवं तान्मोहयित्वा यत्कृतवान्तदाह त्रिभिः ॥ असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयं अन्यायं मत्वा तां सुधां ते
॥३४॥ भ्यो न व्यभजत ॥ अयं भावः ॥ दैत्येभ्यो वीर्यं साध्वसाधु वा सर्वमनुमतमेव अतो मद्भक्तान्देवानेव सुधां पाययिष्यामि किंच तैर्ये प्रार्थय विभजसे

तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्यां ॥ संवीक्ष्य संमुमुहुरु
त्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकांतां ॥१८॥ असुराणां सुधादानं सर्पाणामि
व दुर्नयं ॥ मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥१९॥ कल्पयित्वा पृथक्पंक्तीरुभये
षां जगत्पतिः ॥ तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु ॥२०॥ दैत्यान्गृहीतकलशो वंचय
न्नुपसंचरैः ॥ दूरस्थान्पाययामास जरामृत्युहरां सुधां ॥२१॥ ॥

स्युक्तं न चैते भ्यो जातु सेवक्रूरेभ्यो दानं न्याय्यं ॥ अनतेभ्यः सुधां न दद्यामिति ॥१९॥ पंक्तीः पृथग्विविक्ताः कल्पयित्वा विधाय तासु पंक्तिषु स्वे राम
षु स्वेषु तत्सजातीयेषु तांश्च असुरानपि प्रतारणार्थमेवोपवेशयामास ॥२०॥ उपसंचरैः वक्रमानप्रियवाक्यादिना नानतिक्रम्य गमनैः दूर ॥३४॥
स्थानपि देवान् ॥२२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यां कृत: स्नेहो यै: स्त्रिया सह विवादस्य जुगुप्सया ॥२२॥ कृत अतिप्रणय: स्नेहो यै: प्रणयापायेन कातरा: भीता: एते नावत्कृपणा: सर्वं किंचि
त्सिव्वंतु स्वरूपं तु धीरा: क्षणं गती स्व ध्वंइत्यादि बहुमानेन चाऽबद्धा: नियंत्रिता: समयपालनादिभि: षड्भिरेभै: कारणै: अप्रियं किंचिदं पि

ते पालयंत: समयमसुरा: स्वकृतं नृप तूष्णीमासन्कृतस्नेहा: स्त्रीविवादजुगुप्सया ॥२२॥ त
स्यां कृतातिप्रणया: प्रणयापायकातरा: बहुमानेन चाबद्धा नोचु: किंचन विप्रियं ॥२३॥ देव
लिंगप्रतिच्छन्न: स्वर्भानुर्देवसंसदि प्रविष्ट: सोममपिबच्चंद्रार्काभ्यां च सूचित: ॥२४॥ चक्रेण
क्षुरधारेण जहार पिबत: शिर: हरिस्तस्य कबंधस्तु सुधयाऽप्लावितोऽपतत् ॥२५॥ शिरस्त्व
मरतां नीतमजो ग्रहमचीक्लृपत् यस्तु पर्वणि चंद्रार्कावभिधावति वैरधी: ॥२६॥ पीतप्रायेऽमृते
देवैर्भगवान्लोकभावन: ॥ पश्यतामसुरेंद्राणां स्वरूपं जगृहे

नोचु: किंतु तूष्णीमासन् ॥२३॥ देवरूपं कृत्वा चंद्रार्कौ
यो मध्ये प्रविष्ट: सोममृतममपिबत् ॥२४॥ हरिस्तस्य शिरो जहार ॥ अप्लावित: असंस्पृष्ट: ॥२५॥ ग्रहं स्वर्भानुं पर्वादिवद्ग्रहत्वाधिकारिणं ॥२६॥ २८७

भा॰ अ॰
॥३५॥

हरिभक्तानामेवोद्यमः फलति नान्येषामित्येवं आख्यानतात्पर्यमाह। एवमिति। समादेशादयो येषां हेतुर्भेदाद्भिः अर्थः समुद्रेक्षिप्सवीन्धादि वि-
विधः कल्पः फलं केषांचिन्नाशकेषांचिन्नेति वैविध्यं येषां ते फले वैषम्यवन्तो बभूवुरित्यर्थः। तदेवाह। तत्रेति तेषु यस्य पादपंकजरजः श्र-
यणाद्देवा अमृतं फलमापुः। स एव सेव्य इत्यर्थः। यत्तु दैत्यानि संबंधात्। २७। एतदेवोपपादयति यदिति। असुः प्राणाः वसु धनं। प्राणादि-
भिर्देहात्मजादिषु नृभिर्यद्युज्यते प्रयुज्यते देहाद्यर्थं यत्क्रियत इत्यर्थः। तदसदव्यर्थं भवति कुतः पृथक्त्वात् भेदाश्रयत्वात्। शाखानिषे-

एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोपि फले विकल्पाः। तत्रामृतं सुरगणाः फलमं-
जसापुर्यत्पादपंकजरजः श्रयणान्न दैत्याः॥ २७॥ यद्युज्यतेसुवसुकर्ममनोवचोभिर्देहात्म-
जादिषु नृभिस्तदसत्पृथक्त्वात्॥ तैरेव सद्भवति यत्क्रियते पृथक्त्वात्सर्वस्य तद्भवति मूलनि-

षेचनवत्। तैरेव प्राणादिभिरीश्वरोद्देशेन यत्क्रियते तत्तु सन्महाफलं भवति। कुतः (षेचनं यत्॥ २८॥ ॥ ॥
अपृथक्त्वात् ईश्वरस्य सर्वत्रानुगतत्वात्। तत्र दृष्टांतः यत्तरोर्मूलनिषेचनं तत् यथा सर्वस्य स्कंधशाखादेरपि भवति। यद्वा। स्पष्टोपपंचम्यो-
पृथक्त्वं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत्क्रियते तदसत्। अपृथक्त्वं पर्यालोच्यैश्वरदृष्ट्या तैरेव तेष्वेव च यत्क्रियते तत्सत् भवति। तिर्य्योः पं-
समानं। २९॥ ॥ छ

राम
॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमेनवमः॥ दन्नामेमत्सरादैत्यैराद्येत्नुमघ्येसुरैः॥ दैत्यमायाविमोहात्सुदेवेषाविषमोहरिः॥ तदेवमन्मनावाहितैर्नीभक्ताना मितीरितं
भक्तमत्सरतःप्राणाहानिःपुनरुदीर्यते॥ २॥ ४॥ रणःसंग्रामः उदन्वतः समुद्रस्यरोधसितीरेवभूव॥ ५॥ अन्योन्यंमममाताद्यनिजघ्नुः॥ ६॥

॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेअमृतमथनेनवमोध्यायः॥ श्रीशुकउवाच॥ इ
तिदानवदैतेयानाविंदन्नमृतंनृप॥ युक्ताःकर्मणियत्नाश्चवासुदेवपराङ्मुखाः॥ १॥ साधयि
त्वामृतंराजन्पाययित्वास्वकान्सुरान्॥ पश्यतांसर्वभूतानांययौगरुडवाहनः॥ २॥ सप
त्नानांपरामृद्धिंदृष्ट्वातेदितिनंदनाः॥ अमृष्यमाणाउत्पेतुर्देवान्प्रत्युद्यतायुधाः॥ ३॥ ततः
सुरगणाःसर्वेसुधयापीतयैधिताः॥ प्रतिसंयुयुधुःशस्त्रैर्नारायणपदाश्रयाः॥ ४॥ तत्रदै
वासुरोनामरणःपरमदारुणः॥ रोधस्युदन्वतोराजंस्तुमुलोरोमहर्षणः॥ ५॥ तत्रान्योन्यंसप
त्नास्तेसंरब्धमनसोरणे॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधा
युधैः॥ ६॥ शंखतूर्यमृदंगानांभेरीडमरिणांमहान्॥ हस्त्यश्वरथप
त्तीनांनदतांनिःस्वनोऽभवत्॥ ७॥

१०॥ ॥ श्रीगोविंदायनमः ॥ ७ ॥ ॥ ॥ ७॥ ॥ श्री० ७ श्री० ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा· अ·
॥ ३६ ॥

चित्रध्वजपटादिभिश्च वीराणां मालाभिश्च राजिभिर्देवदानववीराणां ध्वजिन्यौ यादसां मालाभिः सागरा विवरेजतुरिति त्रयाणामन्वयः ॥ पादोभि

रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः समसज्जन्त संयुगे ॥ ८ ॥ उष्ट्रैः केचि
दिभिः केचिद्खरैरभियुयुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥ गृध्रैः कंकैर्व
कैः श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥ शिवाभिराखुभिः
कैः कृकलासैः शशैर्नरैः ॥ वस्तैरेकैकशलभैः हंसैरन्यैश्च सूकरैः ॥ ११ ॥ अन्ये जलस्थलखगैः
सत्त्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ॥ १२ ॥ चित्रध्वजपटै राजन्नातप
त्रैः सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्बर्हिचामरैः ॥ १३ ॥ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभू
षणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ १४ ॥ देवदानववीराणां ध्वजिन्यौ पांडुनंद
न ॥ रेजतुर्वीरमालाभिर्यादसामिव सा

रितिचासितैरमलैराजपत्रैश्च बर्हैश्च चामरैश्च व्यजनैः ॥ १३ ॥ वातेनोद्धूतैरुत्तरीयैश्च उ
ष्णीषैः ॥ सूर्यरश्मिभिः सुतरां स्फुरद्भिः ॥ १४ ॥ १५ ॥

राम
॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असुराणां या चमूः तस्याः पतिः स बलिः यानमास्थितः उदये उदयगिरिशिखरे स्थितः चंद्र इव विरेजे ॥ इति त्रयाणामन्वयः ॥१६॥१७॥ १८॥ स

वैरोचनिर्बलिः संख्ये सोसुराणां चमूपतिः ॥ यानं वैहायसं नाम कामगं मयनिर्मितं ॥१६॥ सर्वसां

ग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनं ॥१७॥ आस्थितस्तद्विमा

नाग्र्यं सर्वानीकाधिपैर्वृतः ॥ बालव्यजनछत्राग्र्यै रेजे चंद्र इवोदये ॥१८॥ तस्यासन्सर्वतो यानै

र्यूथानां पतयोऽसुराः ॥ नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥१९॥ द्विमूर्धा कालनाभोथ प्र

हेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥२०॥ हयग्रीवः शंकुशिराः कपि

लो मेघदुंदुभिः ॥ तारकश्चक्रदृक्शुंभो निशुंभो जंभ उत्कलः ॥२१॥ अरिष्टोरिष्टनेमिश्च मयश्च

त्रिपुराधिपः ॥ अन्ये पौलोमकालेया निवातकवचादयः ॥२२॥ अलब्धभागाः सोमस्य केवलं क्ले

शभागिनः ॥ सर्व एते रणमुखे बहुशो निर्जितामराः ॥२३॥ सिंहनादान्विमुंचंतः शंखान्दध्मुर्महारवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना॰ अ॰
॥३७॥

सर्वेषां ते सवर्णा निघसिन्निनिमदः धारासारदुर्दिनं ॥२५॥ नानावाहादीनि येषां ते देवा असुराश्च ॥२६॥ मिथो युयुधुः ॥२७॥ द्वंद्वान्येवाह युयोधेति स

ऐरावतगतः दिक्करिणामारूढः शुशुभे स्वराट् ॥ यथास्त्रवद्यस्वर्णामुदयाद्रिमहर्मपतिः ॥२५॥ नसास
नसर्वतो वा नानावाहध्वजायुधाः ॥ लोकपालाः सहगणा वाय्वग्निवरुणादयः ॥२६॥ तेन्योन्यम
भिसंरब्धाः क्षिपंतो नामभिः मिथः ॥ आह्वयंतो विशंतो ये युयुधुर्द्वंद्वयोधिनः ॥२७॥ युयोध वलिरिं
द्रेण तारकेण गुहो स्यत ॥ वरुणो हेतिना युध्यन्मित्रो राजन् प्रहेतिना ॥२८॥ यमस्तु कालनाभे
न विश्वकर्मा मयेन वै ॥ शंबरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥२९॥ अपराजितेन नमुचिरश्विनौ
वृषपर्वणा ॥ सूर्यो वलिसुतैर्देवो वाणज्येष्ठैः शतेन च ॥३०॥ राहुणा च तथा सोमः पुलोमा युयुधे
निलः ॥ निशुंभशुंभयोर्देवी भद्रकाली तरस्विनी ॥३१॥ वृषाकपिस्तु जंभेन महिषेण विभावसुः ॥ इ
ल्वलः सह वातापिर्ब्रह्मपुत्रैररिंदम ॥३२॥ कामदेवेन दुर्मर्षउत्कलो मातृभिः सह ॥ वृहस्पतिश्चोश

नाभिः ॥ अस्यत आस्यत् अयुध्यतेत्यर्थः ॥२८॥ २९॥ सूर्यो देवः एक एव शतेन वलिसुतैः वाणज्येष्ठो येषां नसा नरकेण शनैश्चरः ॥३३॥

४

तैः ॥३०॥ निशुंभशुंभौ कौशिकी देवी ॥३१॥३२॥३३॥ ॥

राम
॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२४ ॥ २६ ॥ आरोहंतीत्यारोहाः नैः सहिता अन्ये च वाहाः सर्वे तु केवलं गजादयः उक्ताः कथंभूताः निकृत्ता बाह्वादयो येषां छिन्नानि ध्वजादीनि येषां ॥ २७
तेषां देवादीनां पदाघातै रथांगैश्च चूर्णिता दारयो धनाद्रुताभूमेरुच्छ्रितै रेणुर्दिशः खं द्युमणिं च सूर्यं च च्छादयन्नदेवखादेन्यवर्तत ॥ कथंभूता

मरुतो निवातकवचैः कालेयैर्वसवो मराः ॥ विश्वेदेवाश्च पौलोमै रुद्राः क्रोधवशैः सह ॥ २४ ॥ न
एवमाजावसुराः सुरेंद्राहेहेन संहत्य च युध्यमानाः ॥ अन्योन्यमासाद्य निजघ्नुरोजसा जिगीष
वन्तीस्याशरासितोमरैः ॥ २५ ॥ भुशुंडीभिश्चक्रगदार्भिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधै
रपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंडिपालैश्च शिरांसि चिच्छिदुः ॥ २६ ॥ गजाश्वरं
गाः सरथाः पदातयः सारोहवाहा विविधा विखंडिताः ॥ निकृत्तबाहूरुशिरोधराग्रयः छिन्न
ध्वजेषासतनुत्रभूषणाः ॥ २७ ॥ तेषां पदाघातरथांगचूर्णिता दायोधनाद्रुल्बणाउत्थितस्तदा ॥ रे
णुर्दिशः खं द्युमणिं च छादयन्नन्यवर्तताऽसृक्सरिद्भिः परिलु

त ॥ असृक्सरिद्भिः रक्तसरणीः परिप्लुतात्मस्मि
क्रात्यहापांशुबनात हे तोन्यवर्तत भावेक्तः रक्तधाराणां तस्यंयेत मुच्छलनादि स्पर्धः ॥ प्रथमांतपाठे रेणोर्विशेषणं ॥ २८ ॥ ॥ ॥ ६८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥३८॥

शिरोभिर्महाभुजैश्च करभसदृशैरुरुभिश्च सारराम्ः प्रकर्षेण आस्तृता सती वभौ॥ कथंभूतैः शिरोभिः उद्धृतानि उत्सन्नितानि किरीटानि कुंडलानि च येभ्यस्तैः संरंभ
युक्तान्दृष्टौष्ठपुटेःपरिदृष्टाधरच्छदा ओष्ठायेषुतेः॥३९॥ पतितानि यानि खड्गिरांसि तत्र स्थैः शक्तिभिः तैः पश्यं न इत्यर्थः उद्यतान्यायुधानि येस्तैर्दोर्दंडैर्युक्ताः

शिरोभिरुद्धृतकिरीटकुंडलैः संरंभदृष्टिभिः परिदृष्टदच्छदैः महाभुजैः साभरणैः सहायुधैः सासालता
न्नैः करभोरुभिर्वभौ॥३९॥ कबंधावलत्रवोस्तेतुः पश्यंतः खड्गिराश्लिभिः उद्यतायुधदोर्दंडैराधावं
तोभराकूधे॥४०॥ वलिर्महेद्रदुराभिस्त्रिभिरेरावणं शरैः॥ चतुर्भिश्चतुरो वाहानेकेनारोहमाछि
यत॥४१॥ सतानापततः शक्रस्ता वद्धिः शीघ्रविक्रमः॥ चिछेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव
॥४२॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे॥ तां ज्वलंतीं महोल्काभां हस्तस्थामछिनद्धरिः॥४३॥
ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः॥ पद्यद्यच्छस्त्रमादद्यात्सर्वं तदछिनद्विभुः॥४४॥ ससर्जाथा
सुरीं मायां तर्द्धानगतोऽसुरः॥ ततः प्रादुरभूच्छैलः सुरानीकोपरिप्रभो॥४५॥ ततोनिपेतुस्तरवोदह्य
(मानादवाग्निना शिलाः सटंकशिखराश्चूर्णयंतो
४०॥वाहान्नैरावतपादरक्षकान्॥आरोहंगजयंतारमाछिपत्नविमाध
॥४१॥ दुर्मर्षः असहनो वलिः॥४३॥ टंकवत्तीक्ष्णायैः शिखरैः सहिताः॥४६॥ ॥ ॥ ॥

राम
॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वलनपिंगलवक्त्राश्च अंगारान्मुमुचुरित्यनुषंगः ॥४९॥ अथाक्रार्षः अथाक्षीदित्यर्थः ॥५०॥ उद्धूतैस्तरंगैरावर्त्तैश्च भीषणाः ॥५१॥ एवमन्यैश्च दैत्यैः सृज्य

महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ॥४७॥
यातुधान्यश्च यातुघ्नाः ॥ स्थूलहस्ता विवाससः ॥ छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्र
भोः ॥४८॥ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्घोरा ज्वलनपिंगल
वः ॥४९॥ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः ॥ तां वनं निकरद्वालुपाविबुधविद्वि
नीमथाक्रूः ॥५०॥ ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ॥ मंदवडवाग्नेरुद्धूततरंगावर्त्तभी
षणाः ॥५१॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासु मायासु निषेदुः सुरसैनि

मानासु ॥५२॥ ७ ॥ ॥ ७ ॥ ॥ ॥ (काः ॥५२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥३९॥

यत्रयदातत्रतदोतेर्ध्यातः तन ॥५२॥ अष्टौआयुधस्त्रकावाहवोयस्यश्रीस्वकोस्तुभश्चअनर्घ्यकिरीटंकुंडलेच ॥ उल्लसंतिश्रीकौस्तुभादीनियस्मिन्
५४॥ असुराणांकूटंकर्ममंत्रादिप्रयोगः तस्माज्जाताः ॥ महिनामहिम्ना ॥ हरेःस्मृतिरेवसर्वेषांविपदांविमोक्षणारूपाकिमुतहरेःप्रवेशइत्यर्थः

नतत्यतिविविधियत्रविदुरिद्वादपोनप ॥ ध्यातःमादुरभूत्तत्रभगवान्विश्वभावनः ॥५३॥ ततःसुप
र्णांसकृतांघ्रिपल्लवःपिशंगवासीनवकंजलोचनः ॥ अष्टरूपनाष्टायुधवाहुरुल्लसच्छ्रीकोस्तु
भानर्घ्यकिरीटकुंडलः ॥५४॥ तस्मिन्प्रविष्टेऽसुरकूटकर्मजामायाविनेशुर्महिनामहीयसः
स्वप्नोयथाहिप्रतिवोधआगतेहारस्मृतिःसर्वविपद्विमोक्षणाः ॥५५॥ दृष्ट्वामृधेगरुडवा
हमिभारिवाहआविध्यशूलमहिनोदथकालनेमिः ॥ तल्लीलयागरुडमूर्ध्निपतद्गृहीत्वाते
नाहनन्नृपसवाहमरिंत्र्यधीशः ॥५६॥ मालीसुमालिनिवलौयुधिपेततुर्यच्चक्रेणकृत्तशिर
(सावथमाल्यवांस्तं ॥ आहत्यतिग्मगदयाहन

५५॥ इभादिवाहःसिंहवाहः अहिनोतविक्षेप ॥ लीलयैवतद्गृहीत्वा
अहनत्नहिनत्नृप ॥५६॥ यस्यचक्रेणकृत्तशिरसोपेततुःतंतथाभूतमपिआहत्यसंहत्यअंडजंदुंगरुडंअहनत्तंहंतुंगदामुल्लिन्यइत्यर्थः
आद्योहरिः ॥५७॥

राम
॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति अष्टमे दशमः ॥ एकादशे तु देवेषु दैत्यघाति षु नारदः ॥ देवान् वारयच्छुक्रो मन्त्रान् दैत्यान जीवयत् ॥ १ ॥ उदयच्छत् उल्लिन्ये ॥ २ ॥ ३ ॥ निवद्धा
न्यक्षीणि ये षां तान् बालान् जित्वा नरः कपटद्यूतैर्यथा तेषां धनं हरति तथा हे मूढ मायेशान् नः अस्मान् जेतुमिच्छसि ॥ ४ ॥ मन्त्रभा

इति श्रीभागवते महापुराणे अष्टमस्कंधे दशमोध्यायः ॥ शुक उवाच ॥ अथो सुराः प्रत्युपलब्ध
चेतसः परस्य पुंसः परयानुकंपया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान् रणे यैरभिसंहताः
पुरा ॥ १ ॥ वैरोचनाय संरब्धो भगवान् पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः
॥ २ ॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितं ॥ मनस्विनं सुसंपन्नं विचरंतं महामृधे ॥ ३ ॥ नटव
न्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान् नटो जहरति तद्धनं ॥ ४ ॥ आरुरु
क्षंति मायाभिरुत्सिसृप्संति ये दिवं ॥ तान् दस्यून् विधुनोम्यज्ञान् पूर्वस्माच्च पदादधः ॥ ५ ॥ सोहं दुर्मा
यं ग्रथिद्रत्याह ॥ आरुरुक्षंति आरोढुमिच्छंति ये च ऊ । ((यिनस्ते घ वज्रेण शतपर्वणा शिरो हरिष्ये मंदात्मन् घटस्व ज्ञातिभिः
त्सिसृप्संति ऊर्ध्वं लंघयितुमिच्छंति मोक्षमिच्छंतीत्यर्थः ॥ अधो विधुनोमि पातयामि ॥ ५ ॥ ॥ ६ ॥ छ ॥

श्री: ॥ ८ ॥

भा॰ अ॰ ॥४०॥

७॥कालरज्ञानं कालयंत्रितं अतो न हृष्यंति न त्रएव विवेकेप्यसमर्पंडिताः अनिपुणाः ॥८॥ तत्र कीर्त्तिजयादौ आत्मानं साधनं मन्यमानानां वो गि

वलिरुवाच ॥ संग्रामे वर्त्तमानानां कालचोदि[त]कर्मणां ॥ कीर्त्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्र

मात् ॥७॥ तमिमं कालरज्ञानं जनाः पश्यंति सूरयः ॥ न हृष्यंति न शोचंति तत्र यूयमपंडिताः ॥८॥ न

वयं मन्यमानानामात्मानं तत्र साधनं ॥ गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥९॥ शुक उ

वाच ॥ इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः ॥ आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥१०॥ एवं

निराकृतो देवो वैरिणा तथ्यवादिना ॥ नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥११॥ प्राहरत्कु

लिशं तस्मा अमोघं परमर्दनः ॥ सयानेनापतद्भूमौ छिन्नपक्ष इवाचलः ॥१२॥ सखायं पतितं दृ

ष्ट्वा जंभो बलिसखः सुहृत् ॥ अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥१३॥ स सिंहवाह आसा

द्य गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥१४॥ गदाप्रहारव्यथितो — विह्व

रो न गृह्णीमः मर्मसु ताडनं याभिस्ताः ॥९॥ विभुमिंद्रं वीरो बलिः ॥१०॥ लितो गजः ॥ जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥१५॥ राम ॥४०॥

तोत्रमंकुशः जेनाहत इव ॥११॥ समानः विमानसहितः ॥१२॥ ॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६॥१७॥ नमुचिर्बलः पाकश्चेति त्रय आजग्मुः ॥१९॥२०॥ त्रयाणां पश्चविक्रमाणां ह हरीनिति त्रिभिः ॥ हर्यश्वस्य इंद्रस्य तावद्भिर्दशभिः

नतोरथो मातलिना हरिभिर्दशभिर्नैहत ॥ आनीतो द्विपमुलरूपस्य थमाहरू हे विभुः ॥१६॥ न
स्य तस्य जयनर्कर्मयंतुर्दीर्णदसत्तमः ॥ स्थूलेनज्वलता तं तु समयमानो हनन्मघे ॥१७॥ से
हे रूजांसुदुर्मर्णा सत्वमालंब्यमातलिः ॥ इंद्रो जम्भस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥१८॥ जं
भं श्रुत्वाहतं तस्य ज्ञातयोनारदाहृषेः ॥ नमुचिश्च बलः पाकः तत्रापेतुस्त्वरान्विताः ॥१९॥
वचोभिः परुषैरिंद्रमर्दयंतो सममर्मसु ॥ शरैरवाकिरन्मेघा धाराभिरिव पर्वतं ॥२०॥ हरी
न्दश शतान्याजौ हर्यश्वस्य बलः शरैः ॥ तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥२१॥ श
ताभ्यां मातलिं पाको रथं सावयवं पृथक् ॥ सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे ॥२२॥ न
शरैः ॥२१॥२२॥ आहत्य इंद्रं विव्याध ॥२३॥ प्राहट्कालीन ॥२४॥ मुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः ॥ आह

सत्यभ्यन्नर संख्येसनोयरवतोयदः ॥२३॥
सर्वोतः शरकूटेन शाक्रं सरथसारथिं ॥ छाद
यामासुरसुरः प्राहट् सूर्यमिवांबुदाः ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ
॥४१॥

वरिष्ठकृपया: वरिष्ठ: भिन्नानौर्येषां ते भिन्ननावदनस्र्थ: ॥२५॥ तुराषाडिंद्र: अम्बादिसहितो विनिर्गत: अग्रणी: सारथि: ॥२६॥२७॥ शोका

[illegible] अलक्ष्यं गत्वलमतीव विव्हलं विबुद्ध कुल्

दैवगणा: सहानुगा: ॥ अमात्यका: शत्रुबलेन निर्जिता वरिष्ठक्रमया भिन्ननावो यथार्णवे ॥२४॥ त

तलक्ष्मणाद्भुतवद्वपुं जरोहानिर्गत: साम्बरथध्वजाग्रणी: ॥ वभौ दिश: स्वं पृथिवीं विरोचयन्नुत्

तेजसा सर्वपेइवरूपात्स्वयं ॥२६॥ निरीक्ष्यष्टनतां देव: पैरं भार्दितां रणे ॥ दयच्छद्रिपुं हंतुं वज्रं व

ज्रधरो रुषा ॥२७॥ सतेनैव वाष्टधारेण चिच्छेद सीबलपाकयो: ॥ शातीनां पश्यतां राजन्नजहार जनय

नमंयं ॥२८॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वित: ॥ जिघांसुरिंद्रं नृपते चकार परमोद्यमं ॥२९॥

अश्मसा[illegible]रमयं शूलं घंटावद्धेममन्त्रपर्णं ॥ प्रगृह्याभ्यद्रवत्कुद्धो हतोसीति वितर्ज्जयन् ॥ प्राहिणोद्देव

राजाय [illegible]नन्नदल्ममगरा इव ॥३०॥ तदापतद्गगनतले महाजवं विचिछिदे हरिरिषुभि: सहस्रधा

मर्षोम्यां युक्तपारुष्यक्रोधेनान्वित: शूलं इंद्रं हंतुं परमोद्यमं चकार ॥२९॥ तमाहनत्पकुलिशेन कंधरे रुषान्वित: त्रिदशाप

घंटावते घंटाभिर्युक्तं ॥३० ॥३१॥ ॥

राम
॥४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिवीर्यवत्त्वमभिनंदितिनस्तथा ॥३२॥ तथा पतत्रैः पक्षैः ॥३४॥ सारमयं वीर्याधिकं त्वाष्ट्रं तपएव वृत्रः सयेनवज्रेणमयाविपाटितः ॥३५॥

नतस्य ... त्वचमपि वज्रकुंठितो विभेदयः सुरपतिनोजसेरितः ॥ नदद्भुतं परमं वीर्यवृत्रभिन्नि ति

रस्थेनानमुचिशिरोधरत्वचा ॥३२॥ तस्मादिंद्रोः विभेच्छ चोर्वज्रः प्रतिहतोपतत् ॥ किमिदं देव

येनेतनमत्तं लोककविमोहनं ॥३३॥ येनमेद्र्वेमद्रीणां पक्षच्छेदः प्रजात्येयकृतानिविशतां मा

रैः पातैः पततां भुवि ॥३४॥ तपःसारमयं त्वाष्ट्रं वृत्रोपेनविपाटितः ॥ अन्ये चापि बलोपेताः

सर्वालेरसुतात्वव ॥३५॥ सोयंप्रतिहतो वज्रोमयामुक्तोऽसुरेल्पके ॥ नाहंनदादंदेदंब्रह्म

तेजोप्यकारणं ॥३६॥ इति शक्रं विषीदंतमाहवागशरीरिणी ॥ नायंशुक्रैरथ्योनाईर्वधमर्हति

दानवः ॥३७॥ मयासेधद्धरोदत्तोमरस्तुर्वैनार्द्रशुष्कयोः ॥ अतोन्यंचिंतनीयस्तउपायोमघव

दंडं लकुवतुल्य ब्रह्मतेजः दधीचः सामर्थ्यं ॥३६॥ आर्द्रशुष्काभ्यां मरत्तुर्नैवेति ॥३७॥३८॥ ॥ छ (न्त्रियोः ॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३९॥ उभयोः सख्यमेवाह ॥ नन्द्युक्षेराणं चार्द्रेणाक्षेनेनतथा चक्रुः इति ॥ अपांफेनेन मुचेः शिरश्छेदो दत्त इति ॥४०॥५२॥ अनुचरैरनुगीयमानाइत्यर्थः

तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपायमुभयात्मकं ॥३९॥ नन्द्युक्षेण
न चार्द्रेण जहार नमुचेः शिरः ॥ तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुं ॥४०॥ गंधर्वमुख्यौ जगतु
र्विश्वावसुपरावसू ॥ देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥४१॥ अन्येप्येवं प्रतिद्वंद्वान्वाय्वग्निवरु
णादयः ॥ सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ॥४२॥ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप
वारयामास विबुधान्दृष्ट्वा दानवसंक्षयं ॥४३॥ नारद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्र
यैः ॥ श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥४४॥ शुक उवाच ॥ संयम्य मन्युसंरंभं मानयंतो
मुनेर्वचः ॥ गीयमाना अनुचरैर्ययुः सर्वे त्रिविष्टपं ॥४५॥ येवशिष्टा रणे तस्मिन्नारदानुमतेन ते ॥ ब

उपगीयमानैरनुचरैः सहेतिवा ॥४५॥४६॥ ॥ ७ ७ लिं विपन्नमादाय अस्तं गिरिमुपागमन् ॥४६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविनष्टा अवयवा येषां विद्यमाना: शिरोधरा येषां तान् ॥४७॥ प्रत्यापन्नानि पुन: प्राप्तानि इंद्रियाणि स्मृतिश्च येन स: ॥४८॥ इत्यष्टमे एकादशोध्याय: ॥
द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकं ॥ भवं संमोहयामास हरि: पुनरसांत्वयत् ॥ असुह्यत्त्वत्सुरा विष्णुमायया नात्र तदद्भुतं ॥ इति वक्तुं महादेवमोहो
यमुपवर्ण्यते ॥ हरि: सोममपाययदिति इदं निशम्य स यत्रास्ते तत्र तद्रूपं द्रष्टुं ययाविति तत्रेणान्वय: ॥१॥२॥ सोमया उमया सह ॥३॥ त्वयि किंचिन्न वा॰

तत्राविनष्टावयवान्विद्यमानशिरोधरान् ॥ उशना जीवयामास संजीविन्या स्वविद्यया ॥४७॥ ब
लिश्चोशनसास्पृष्ट: प्रत्यापन्नेंद्रियस्मृति: ॥ पराजितोपि नाखिद्यल्लोकतत्वविचक्षण: ॥४८॥
इति श्रीभागवते महापुराणे अष्टमस्कंधे देवासुरसंग्रामे एकादशोध्याय: ॥ शुक उवाच ॥ वृष
ध्वजो निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वा सुरगणान्हरि: सोममपाययत् ॥१॥ वृषमा
रुह्य गिरिश: सर्वभूतगणैर्वृत: ॥ सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदन: ॥२॥ सभाजितो भगवता
सादरं सोमया भव: ॥ सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन् हरिं ॥३॥ महादेव उ० ॥ देवदेव जगद्व्यापिन्

श्चर्यं वयं त्वाश्चर्यमानसा: ॥ इति वक्ष्यन्महादेवस्तुष्टाव हरिमष्टभि: ॥ त्वयि महामायाविनि परमेश्वरे न हि किल किंचिदघटितमिव वयं तु परमकौतूह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥४२॥

हत्वेनदुष्टमागताइतिवक्ष्यमाणंसंबोधयन्स्तौति॥ हेदेवदेवकुतोहेदेवानांदेवइत्यतआह हेजगद्व्यापिन्॥ नकुतः हेजगन्मय॥ नहिकिंप्रधानं॥ नहिजगदी
श॥ नन्वकुतस्तत्राह॥ सर्वेषामपित्वंहेतुः॥ अतईश्वरः आत्मत्वाच्चनजडंप्रधानंत्वमित्यर्थः॥४॥ ननुजगन्मयत्वोक्त्याजगतउत्पत्त्यादिना। सत्यत्वेनत
ज्ञाद्येनचममापिकिंतथात्वंनेषेनहिनहीत्याह आद्यंतौमध्यंचअस्यजगतोयतोब्रह्मणः भवंतिअस्यचअव्ययस्यएतानिआद्यंतमध्यानिनसंति
यच्चब्रह्मइदंकारास्पदंहश्यंअहंकारास्पदंद्रष्टृवहिर्भोग्यंअन्यद्भोक्तृचतत्सत्त्वंचविद्रूपंचब्रह्मैवभवान्अतोनतत्त्वविकारादिज्ञोकेत्यर्थः॥५॥न
वैवंमन्तव्यमुमुक्षूणामाचारःप्रमाणमित्याह॥ नैवैवंति॥ उपभयतः॥ इहामुत्रचसंगंसक्तिं॥६॥ ननुब्रह्मैवचेदहंतर्ह्यसंगोदासीनस्यममचरणंभो
जोपासनयाकिंतेषांतत्राहीत्वमिति ब्रह्मत्वेपित्वंनासंगन्मुदासीनः किंतुविश्वस्यप्रपंचस्योदयादीनांहेतुः तदुपाधीनामात्मनांजीवानांईश्वरश्च

आद्यंतावस्ययन्मध्यमिदमन्यदहंबहिः॥ यतोऽव्ययस्यनैतानितत्सत्यंब्रह्मचिद्भवान्॥५॥ नैवंवरणं
भोजंश्रेयस्कामानिराशिषः। विसृज्योभयतःसंगमुनयःसमुपासते॥६॥ त्वंब्रह्मपूर्णममृतंविगुणंविशो
नत्रस्फलदाता॥ नहिंहिकिंराजादिवत्कयाप्यपेक्षयासेवकेभ्यःफलद (कमानंदमात्रमविकारमनन्यदन्यत्॥ विश्वस्यहेतुरुदयस्थि
दामिनहिनहि॥ अनपेक्षएवत्वंनहिंहिकिमीश्वरत्वेनतत्राहनेरात्मभिः नस्फलदानायममपेक्ष्यनइतितदपेक्षत्वस्यअभावत्वदपेक्षणानया॥ अनपेक्षत्वमेवदर्शयि
तुंनदीयंब्रह्मत्वंविशिनष्टि॥ पूर्णंअमृतंचसुखरूपंविषयसुखेत्वेलक्षण्यार्थमाह॥ अविकारंनिस्यंआनंदमात्रंचकुतः विशोकंतत्कुतः विगुणं॥ किंचअनन्यत्
नविद्यतेअन्यद्यस्मात्ब्रह्मव्यतिरिक्ताभावादपि॥ निरपेक्षत्वमित्यर्थः॥ नहिसर्वात्मकत्वेनतद्विकारप्रसंगोदुर्वारः तत्राहअन्यत्सर्वेभ्योव्यतिरिक्तंच॥ का
र्यात्वात्॥ नह्येवंभूतस्यसुर्व्वित्तकब्रह्मस्वरूपस्यत्वानपेक्षास्ति॥ अतः केवलंभक्तानुग्रहार्थमेवतवैश्वर्यमितस्वार्थमित्यर्थः॥७॥ ॥ छ ॥ ॥

राम
॥४३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनन्यत्वमभ्यस्तं चैकस्य कृतं इत्याशंक्याह दृष्टान्तेनोपपादयति ॥ सदसत्कार्यकारणं रूपं ॥ द्वयं अद्वयं च परमकारणं च त्वमेवैकः ॥ कृतं कुंडलादिरूपं द्वयं अकृतं केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति कथं तर्हि भेदप्रतीतिस्तत्राह अज्ञानत इति कुतः यस्मान्निरुपाधिकस्यैव तव मायागुणव्यतिकरो भेदः ॥ न स्वतः ॥ ॥ अत एवं त्वां बहुधा वर्णयंति तत्त्वजल्पकेपि न ज्ञो नमीत्याह द्वाभ्यां ॥

एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ॥ त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पुरुषं परेशं ॥ अन्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ॥ १ ॥

त्वां ब्रह्म वेदांतिनो मन्यंते ॥ त्वां धर्मं मीमांसका मन्यंते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुतं परं पांचरात्राः महापुरुषं पातंजलाः ॥ १ ॥ राम ॥

परायुर्ब्रह्मायुर्ब्रह्मा सत्त्वसर्गाः सत्त्वगुणो न सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु न त्वमो न जानंनंति किं पुनस्त्वां हे ईश ॥ अभद्रं राजसं ताम
सं सत्त्वं तं उस्यात्रिरेति निःश्वस्य पातेन जानं नैतीति किमु वक्तव्यं ॥१०॥ किंतु त्वं सर्वं जानासीत्याह ॥ सत्त्वं मंबे अवबहं त्से ब्राह्मो पि जानासि ॥ किंत त्सर्वं ॥ स
मीहितं त्वत्कृतं अदः स्थिति जन्मनाशं अमुष्य जगतो जन्मादि भूतानामीहितं च जगतो भव बंधं मे. सेवा व्याप्तो दृष्टान्तः ॥ चराचराख्यं देहजातं ख

नाहं परायुर्कषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्त्वसर्गाः ॥ यन्मायया मुषितचेतन
स ईश देत्यमस्यो न्यः किमुत त्वाश्व दुमद्भृत्नाः ॥१०॥ सत्त्वं समीहितमदः स्थितिजन्मनाशं
भूते हितं च जगतो भवबंधमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतया
वगमावरुंत्से ॥११॥ अवतारा मयात्र दृष्टा रममाणस्य ते गुणैः ॥ सोहं तद्द्रष्टुमिच्छामि यत्ते यो
षिद्वपुर्धृतं ॥१२॥ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः ॥ न हि द्दृक्ष्व आयाताः परं को
च यथा वायुराविशति तथा ॥ कत्वमवरुंत्सेन दात्मकतया तस्य सर्वस्यात्मत्वे पेत्यर्थः ॥ आत्मत्वे हेतुः अवग (तु हत्वेहितः ॥१३॥
मः ज्ञानरूपइति ॥११॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति अवतारा इति द्वाभ्यां ॥१२॥ १३॥ ॥ ॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ ॥ सुरकार्याणि योषिद्वेषेणाभविष्यंतीति पश्यता आर्यभाव ॥ अवरुयंतावतुमताने दैत्यान् वंचयित्वा देवेभ्यो मृतं दत्तं नचैवैषमर्यं रूपां मेरणाकृत्तं मुनि
नं अतो वचनमोहनादि सारं कामिनीरूपं मयाघटनमिति ॥१५॥ तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामस्तस्योदयो यस्मात् ॥१६॥१७॥ विचित्राणि
पुष्पाणि अरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिन् लसत् दुकूले न पर्यस्ते परिहृते नितंबे मेखला यस्याः तां ॥१८॥ उत्पतनपतनं कंदुकलीलावशेन

श्रीशुक उवाच एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना प्रहस्य भावगंभीरं गिरिशं प्रत्यभा
षत १४ श्रीभगवानुवाच कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि
गते पीयूषभाजने १५ ॥ तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां बहु मंतव्यं संकल्प
प्रभवोदयं ॥ १६ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्च
क्षुर्भव आस्ते सहोमया ॥ १७ ॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ।
विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलां ॥ १८ ॥ आवर्तनोद्वर्तनकंपितस्तनप्र
पे आवर्तनोद्वर्तनेन मनोन्नमनेनाभ्यां कंपितयोः स्तनयोः प्रकृष्टहारा (रुपुष्टहारोरुभरैः पदे पदे प्रभज्यमानामिव मध्यतन
ष्पं वोरुभारैः प्रतिपदं मध्ये प्रभज्यमानामिव चलत्स दमेव प्रवालवत्कोमलं तत्तत्तनो नयंती ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰ अ॰ ॥४५॥ दिक्षु भ्रमतः कंदुकस्य चापलेः चांचल्यैः भ्रभ्रांशो हिम्नतारे आयते लोले चंचले लोचने यस्याः स्वकर्णाभ्यां विभ्राजिते ये कुंडले ताभ्यां उल्लसंतौ कपोलौ
ताभ्यां चनीलालकैश्च मंडितमाननं यस्याः ॥२०॥ संनह्यंती बध्नंती जगद्विमोहयंती ॥२१॥ तां वीक्ष्य देवः श्रीरुद्रः आत्मानं मंतिके स्थितामुमां स्वगणा
श्चन वेद ॥ कथं भूत इत्येवं भूतया कंदुकलीलया यायाऽपह्रीडा न यया अस्फुटस्मितं तेन सह विसृष्टो यः कटाक्षस्तेन मुष्टो वंचितः ॥ अत एव स्वयं
दिक्षु भ्रमत्कंदुकचापलैर्भ्रांतोद्विग्नतारायतलोललोचना ॥ स्वर्णकर्णविभ्राजितकुंडलोल्लस
त्कपोलनीलालकमंडिताननां ॥२०॥ श्लथदुकूलं कबरीं च विच्युतां संनह्यंतीं वामकरेण वल्गुना
विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया ॥२१॥ तां वीक्ष्य देव इति कंदुकलील
येषद्व्रीडाऽस्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमं
तिक उमां स्वगणांश्च वेद ॥२२॥ तस्याः कराग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ॥ वा
सः ससूत्रं लघु मारुतोऽहरद्भवस्य देवस्य किलानुपश्यतः ॥२३॥ एवं तां रुचिरापांगीं दर्शनीयां मनो
यत स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वल आत्मा मनो रमां ॥ हृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल ॥२४॥
यस्य ॥२२॥ कंदुकमनुव्रजत्याः स्त्रियाः लघु सूक्ष्मं वासः ससूत्रं कांचीसहितं ॥२३॥ विषज्जंत्यां कुर्वितकटाक्षेरात्मानं निरीक्षमाणायां ॥२४ राम ॥४५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तसंदेतस्याः समीपंययौ ॥२५॥ अंगेहेराजन् ॥३०॥ ३३ ॥ एवंतामनुधावन्हरः सरित्सरः सुशैलादिषुच सन्निहितोनभूत्व ॥२५॥ ३४ गंदुहं

तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः ॥ भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ ॥२५॥ सा तमायांत
मालोक्य विवस्त्रा व्रीडिता भृशं ॥ निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत ॥२६॥ तामन्वगच्छद्भगवा
न्भवः प्रमुषितेंद्रियः ॥ कामस्य च वशं नीतः करेणुमिव यूथपः ॥२७॥ सोनुव्रज्यातिवेगेन गृहीत्वा
निच्छतीं स्त्रियं ॥ केशबंध उपानीय बाहुभ्यां परिषस्वजे ॥२८॥ सोपगूढा भगवता करिणा करिणीय
था ॥ इतस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा ॥२९॥ आत्मानं मोचयित्वांग सुरर्षभभुजांतरात् ॥ प्रा
द्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥३०॥ तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ॥ प्रत्यपद्य
त कामेन वैरिणेव विनिर्जितः ॥३१॥ तस्यानुधावतो रेतश्चस्कंदामोघरेतसः ॥ शुष्मिणो यूथपस्येव
वासितामनुधावतः ॥३२॥ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यास
न्महीपते ॥३३॥ सरित्सरस्सु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र संनिहितो हरः ॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ अ॰
॥४६॥

त्दुहू मायया जडीकरणं ॥३६॥३७॥ स्वां निष्ठां स्वकृतिं ॥३८॥३९॥ कालेन स्वप्नादिनिमित्तेन माया कालरूपेण भागशोरजआद्यंशेन समेनाम

स्कन्नेन सिद्धोपस्य सात्मानं देवमायया ॥ जडीकृतं नृपश्रेष्ठ सन्न्यवर्तत कश्मलात् ॥३५॥ अ
थावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदु हाद्भुतं ॥३६॥ तमविक्ल
वमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुं ॥३७॥ श्रीभग
वानुवाच ॥ दि॰ ॰ालं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः ॥ ॰न्मे स्त्रीरूपया स्वैरं मोहितो
॰ङ्ग मायया ॥३८॥ को नु मे॰तितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृजतीं भा
वान्दुस्तरामकृ॰त्मभिः ॥३९॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता का
लेन कालरूपेण भागशः ॥४०॥ शुक॰ ॥ एवं भगव॰॰ राजन् श्रीवत्साङ्केन सत्कृतः ॥ आमं
त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥४१॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः ॥ सम
(तामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥४२॥

दधीनासती ॥४१॥ ॥४२॥ ४२ ॥ ७ ॥

राम
॥४६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टाध्यायार्थनिगमनंइतीति ॥ ४५ ॥ एतत्कीर्तनादेःफलमाह एतदिति ॥ ४६ ॥ भगवतात्कृतंभक्तपक्षपातंतस्मैनमस्करोति ॥ असतामविषयं भा
वेनभजनेनैवगम्यमंघ्रिंप्रपन्नान् सिंधुमथ्यंसिंधोर्मथनेजातममृतंयः आशयत् ॥ अभोजयत् ॥ ४७ ॥ इत्यष्टमेद्वादशः ॥ त्रयोदशेतुवर्ण्यं

अपिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः अहंकलानामृषभोविमुह्येयथावशो
न्येकिमुतास्वतंत्राः ॥ ४३ ॥ यमामपृछस्त्वमुपेत्ययोगात्समासहस्रांतउपारतंवै ॥ सएषसाक्षा
त्पुरुषःपुराणोनयत्रकालोविशतेनवेदः ॥ ४४ ॥ श्रीशुकउवाच ॥ इतितेभिहितस्तातविक्र
मःशार्ङ्गधन्वनः ॥ सिंधोर्निर्मथनेयेनधृतःपृष्ठेमहाचलः ॥ ४५ ॥ एतन्मुहुःकीर्तयतोनुशृ
ण्वतोनरिष्यतेजातुसमुद्यमःक्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनंसमस्तसंसारपरिश्र
मापहं ॥ ४६ ॥ असदविषयमंघ्रिंभावगम्यंप्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं ॥ कपट
युवतिवेषोमोहयन्यःसुरारीन्तमहमुपसृतानांकामपूरंनतोस्मि ॥ ४७ ॥ इतिश्रीभा० अष्टमस्कं

तेसप्तमादीन्यनुक्रमात् ॥ मन्वंतराणिसर्वाणिषड्विधानिपृथक् [illegible] पृथक् ॥ १ ॥ ॥

सप्तमादिमन्वंतराण्याह ॥ मनुरित्यादिना यावदध्यायसमाप्ति ॥३॥ आदित्यादयो देवास्तत्रान्वयः ॥४॥५॥ भगवतो जन्म अवतारः तमेवाह ॥ आ
दित्यानां विवस्वानर्यमा पूषेत्याद्यक्रमाणां मध्ये अवरजः जन्म यस्य सः ॥६॥ शक्त्या अवतारेणान्वितानि ॥७॥ अष्टमं मन्वंतरकथामाह ॥ विव

शुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु
॥१॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते ॥२॥ करू
